कुवलयानन्दव्याख्यालंकारचंद्रिकाख्या

४४५

योयेन संसृजेद्वर्षं सोऽपि तत्तुल्यतामियात् पादन्यूनं चरेत् सोऽपि तस्य तत्सवनं द्विजः इति व्यासः [illegible] पतितेनापि तिष्ठन् योयजति
इति सम्यग्ज्ञाता [illegible] कालेन नतत्तुल्यादि शोधनम् चान्द्रायणं परा को वा हिजातीनां विशोधनम् [illegible] पतितेन [illegible] नपंक्ति
कलहस्त्रीगमने [illegible] प्रायश्चित्तम् योयेन पतितेनैषां संसर्गं याति मानवः स तस्यैव व्रतं कुर्यात् तत्संसर्गविशुद्धये [illegible] एकशय्यासनं पंक्ति
भाण्डपक्वान्नमिश्रणं याजनाध्यापने योनिस्तथा च सहभोजनं नवधा संकरः प्रोक्तो न कर्तव्योऽधमैः सहेति योनिः पानं किं नैकपात्रे तत्पात्रपरित्यागं इति
पानं के स्त्रीगमनं चेति हारीतः पतितसंप्रयोगं च ब्राह्मणेन यौनेन वा [illegible] सकाशात् [illegible] परित्यागे सन्निपतितेभ्यः
वासिष्ठः एतेषां कर्मणां मध्ये केन कर्मणा कियता कालेन पतति तन्नदाहरति देवलः संवत्सरेण पतति पतितेन सहाचरन् एकपात्रे भोजनेन भोजनाम
नेरायनैः यौनस्रौवमुखैः संबन्धैः सद्य एवेति मुखौ मुखोऽध्यायनमध्यापनं च एकपात्रभोजने विसद्य [illegible] याजनं [illegible] संबन्धस्था
ध्यायसहभोजनम् सत्वाम [illegible] पतति [illegible] नसंशयः इति देवलोक्तेः अथ संसर्गप्रायश्चित्तं [illegible] कानी [illegible] यौनस्रौवमुखैः
कपाल [illegible] मध्ये कयानामनशय्यैकपंक्तिभोजनभेदात्तत्र्या [illegible] एकपंक्ति [illegible] भोजनतस्य
तिरस्कृतस्य [illegible] जनादि भेदादनेकविधः तत्र हारीतः पतितस्य कुमारी विवस्त्रा मग्नोपोषिता प्रातः [illegible]
नममेतद्विविक्तेषु [illegible] पानानीयेच्च दहे वोदहेदिति
मेव तत्र [illegible] प्रतिलोमम्निग्नस्त्री
दोषः पुनः [illegible] मेति [illegible] कौमारां [illegible]

वल्लज वान २ खुरा सानी ज वान २ [illegible]
मिलावे २ भाग गुड साथ गोली करे [illegible]
[illegible] गोली खावे आमवात [illegible]

[illegible] दिलाने [illegible]
पादिनिलभाते ॥
कृतो प्राजापत्यंच

[illegible] प्रायश्चित्तं क
तृतीयाभार्गवीयः स्त्रीलोमशान्त्यर्थीयमेति नवमांशः तस्यार्थः प्रायश्चित्तम् [illegible] प्रायश्चित्तं [illegible]
पतितस्त्री [illegible] पीयूते कालेऽसंत्यजं कुर्यात् प्राजापत्यं तु लोपके तस्मात् [illegible] दवाचुनस्तम्
भोजनम् [illegible] अन्यगोवधे मतः [illegible] तानपत्नालेदज नवे
[illegible] तत्स्याज्जं मूल्यवादद्यादित्यब्रवीद्यमः [illegible] याज्ञवल्क्यः [illegible]
[illegible] पतितेन वै [illegible] तीनां प्रायश्चित्तान्ते पुनः संस्कारं कुर्यादिति [illegible] प्रायश्चित्त
[illegible] प्रतिग्रहो [illegible] मितात्तरः [illegible] कार्यं विसर्जन
[illegible] गणं भवेदिति पराशरः प्राजापत्यं चरेत् [illegible] गोघातीव्रतं [illegible] इति

[illegible] पतितस्य [illegible] भोजये [illegible]

कु॰
टी॰ अ
१

॥ ॐ श्रीगणेशाय नमः॥ अनुचिंत्य महालक्ष्मीं हृदि लोचनचंद्रिकाम्। कुर्वे कुवलयानंदग्रंथालंकारचंद्रिकां
॥१॥ चिकीर्षितां विप्रसिद्ध्यै इष्टदेवतां स्तौतीति॥ अमरीति॥ अत्र चरणमेव पंकजमिति मयूरव्यंसकादिसमासाश्र
यात्परिणामालंकारः। चरणे आरोप्यमाणस्य पंकजस्यारोपविषयाचरणात्मतापरिणतिं विना दुरितदूरीकर
णक्रियार्थत्वासंभवात्परिणामः। क्रियार्थश्चेद्विषयी विषयात्मनेति तल्लक्षणात्। न च पंकजमिव चरणमिति पू
र्वपदार्थप्रधान उपमितिसमास एवास्त्विति शंक्यं। अमरीकबरीभारस्य केशपाशस्य संबंधिनी सौगंध्यलोभात्
तैर्यासंसरणो भ्रमरी तया मुखरीकृतमिति विशेषणस्यानुगुण्याभावात्। तस्य पंकजगतत्वेनैव प्रसिद्धेरिति।
एतद्विशेषणावगतेन च पादपतनेनाभिव्यज्यमानो गौरीविषया स्मरांगनागता रतिः कविगतां तां पुष्णातीति प्रे
योलंकारोपि बोध्यः॥२॥ परस्परेति॥ प्रोचौ पुरातनौ जायापती अर्थादुमामहेश्वरौ स्तुमः। किंभूतौ। प्रपंचस्य जीव
वर्गस्य मातापितृरूपौ निरुपाधिकृपाश्रयत्वाद्धितोपदेष्टृत्वाच्च। तथा परस्परस्य संबंधिन्यास्तपःसंपत्तेः फलव
दाचरितं तेन परस्परस्य रूपं ययोस्तौ। अत्र परस्प[illegible]दस्य क्रियाविनिमयविवक्षायां कर्मव्यतिहारे सर्वनाम्नो
द्वे वाच्ये इति वार्तिकेन द्विर्भावे समासवद्भावे पूर्वपदस्य सुसुपः रुर्वक्तव्य इत्यनेन सुपः स्वादेशे च परस्परश
ब्दव्युत्पत्तेः। पार्वती तपःसमृद्धिफलायितः परमेश्वरः परमेश्वरतपःसंपत्फलायिता च पार्वतीत्यर्थो लभ्यते। तपः
संपत्तेश्च फलत्वं निरतिशयानंद इति तदुपमया परस्परे परमप्रेमास्पदत्वलक्षणः शृंगारो व्यज्यमानः सौभाग्या
तिशयव्यंग्यमुखेन शिवयोर्भावप्रकर्षे पर्यवस्यतीति सहृदयैकलनीयम्॥ मातापितराविति॥ रूपकाभ्यामुक्तो
पमयोः संसृष्टिः। परस्परं चोपमयोः फलायितेत्येकवाचकानुप्रवेशलक्षणः संकर इति दिक्। संप्रति पाद विवि
तानामलंकाराणां व्युत्पत्तेः स्वतोऽपुरुषार्थतया फलत्वायोगात् तस्याः रसास्वादोपयिकत्वेन फलत्वं प्रेक्षावतां प्रवृ
त्तग्रंथप्रवृत्तये सूचयितुं शृंगाररसाधिदेवतं श्रीकृष्णं प्रति रसास्वादं प्रार्थयते॥३॥ उद्घाटेति॥ स मुकुंदो मे मह्यं
भाग्यवशाश्रुतिके भग्नावर्णितया सदाप्रकाशमानं अथो विगलितवेद्यांतरमानंदरसावेश इति व्युत्पत्तेः। रसपदा
भिधेयं दिशतु ददात्वित्यर्थः। यथाश्रुतमुक्तिप्रार्थनायामकृतेऽसंगत्यापत्तेः। सकः। योधन्यो महामहिमपुण्यप्रा

भावस्य त्वप
रोक्षत्वे प्रेयोलं
कार इष्यते इति

पार्वती परमे
श्वरयोर्निरति
शयानंदोपम
या

फलवदाच
रितरूपयोः

प्र

९

लिभिर्नारदादिमुनिभिर्योगकलया कौशलेन हृदयाब्जस्य उदरे रसोर्मध्यवर्त्तिनो हृदयपुंडरीकस्य केशरमुकु
लकोशे अधोमुखतया विद्यमाने उद्घाटरेचकप्राणायामेनोर्ध्वमुखं कृत्वा चिरादद्भुकालं यथा रुचि यथेष्टं गृह्य
माणोपि रामरूपाद्यभिमतमूर्त्तिध्यानगोचरीक्रियमाणोपि परंतः पूर्णरूपमस्य तथाभूतोऽपरिच्छिन्नवृत्तस्व
पः अविरतं निरंतरं मुक्तिदशायां स्फुरति प्रकाशत इति विरोधालंकारः। योगिगतभगवद्विषयकरतिभावस
कविगतं प्रेयांगतया प्रेयोलंकारः। मुकुंदस्वरूपमूलस्य निधिविशेषोपमाध्वनिः। चिकीर्षितस्य ग्रंथस्य प्रयोज
नाभिधेये दर्शयति॥ अलंकारेष्विति॥ एतन्मो मया त्वयि अलंकारेषु अर्थालंकारेषूपमादिषु विषये बालाना
मव्युत्पन्नानां तेषु अवगाहनस्य व्युत्पत्तेः सिद्धय इत्यर्थः। तेषां येल्लक्ष्यलक्षणे तयोः संग्रह इति नित्यसापेक्षलक्ष्य
मासः। लक्ष्यमुदाहरणं अलंकारत्वं च रसादिभिन्नत्वे सति शब्दार्थान्यतरनिष्ठाया विषयितासंबंधावच्छिन्न
चमत्कृतिजनकतावच्छेदकतावच्छेदकत्वम्। अनुप्रासादिविशिष्टज्ञानादुपमादिविशिष्टार्थज्ञानाच्च चमत्कारोदया
त्तेषु लक्षणसमन्वयः। शब्दार्थयोर्ज्ञानविशिष्टचमत्कृतिजनकतायां विषयितयावच्छेदकत्वेन तद्विशेषणी
भूतानुप्रासोपमादेस्तन्निष्ठावच्छेदकतावच्छेदकत्वात्। रसवदाद्यलंकारसंग्रहाय व्यंग्योपमादिसंग्रहाय
च भेदद्वयगर्भसत्यंतोपादानम्। परकीयग्रंथापहारशंकानिरासायाह॥ येषामिति। येषामलंकाराणां चं
द्रालोके चंद्रालोकाख्यग्रंथे। तएवास्त्यनंतरं लिख्यंते इति शेषः। तत्रास्थितानामपि केषांचिदलेखनात्प्राय
इत्युक्तम्। यथाऽनंतरश्लोको नराद्भुतं तत्रैव दृश्यते। हृदये खेलतोरुच्चैस्तन्वंगी सौरयाशिवेति। स्वयं त्व?म
देव विरचितमिति। एवं च तदीयत्वेन कथनाद्दोषशंकानिरासः। संप्रत्यर्थालंकारेषु निरूपणीयेषु बहुलाल
कारघटकतया सुप्रसिद्धतया च प्रथममुपमालंकारं लक्षयति॥ उपमेति॥ अयं च लक्षणनिर्देशः। शेषं लक्ष
णम्। सादृश्यस्य लक्ष्मीश्चमत्कृतिविषयजनकता तद्विशिष्टं सादृश्यमिति यावत्। धर्मधर्मिणोरभेदोप
चारात्। लक्षणं व्याचष्टे। यत्रेति। यत्र काव्ये। द्वयोरित्यस्य सप्तम्यर्थः। तच्च शक्तिलक्षणान्यतरसहकारेण बोधकत्व
संबंधेन। उपमानमधिकगुणं चंद्रादिः। उपमेयं वर्ण्यमानं कामिनीवदनादि। सहृदयः काव्यभावनादि
परिपक्वबुद्धिः। व्यंग्यस्य मर्यादा प्रतीतिनियमरूपा यया सा व्यंजनेत्यर्थः। अत्र च उपमानोपमेययोरिति स्व

कु. व. टी. २

रूपकायनेशतत्त्वालंकारसंगीलक्ष्यादर्शाभावात्। आत्माश्रयापादकत्वाच्च उपमानत्वोपमेयत्वयो रूपमाघटितत्वात्। एत
द्योग्यस्त्रीमनिष्ठत्वमिति। इत्थं चालंकारत्वे सति सादृश्यमुपमालंकारलक्षणं बोध्यम्। एवमग्रेऽप्यधिकारप्राप्तमलंकारत्व
विशेषलक्षणं बोध्यम्। हंसीत्यादि। अत्र तावदिवार्थसादृश्यनिरूपिततत्त्वसंसर्गेण हंस्यादेरन्वयः। सादृश्ये च प्रयोजकत्वसं
सर्गेण स्वर्गंगावगाहनाश्रयत्वरूपे साधारणधर्मे तस्य च स्वरूपसंबंधेन कीर्तौ सादृश्ये निपातार्थतया नामार्थप्र
तिसादृश्यत्वसंबंधेन विशेष्यत्वविशेषणत्वे च बाधकाभावात्। तथा च हंसीनिरूपितसादृश्यप्रयोजकस्वर्गंगाकर्मकावगा
हनाश्रयत्ववती कीर्तिरिति बोधः। न चैवं स्वर्गंगां गाहनमिव प्राप्तश्रीसादृश्यम्। तं ग्रन्थे धात्वर्थस्य समानधर्मत्वोक्तिर्वि
रुद्धेति वाच्यम्। तदाश्रयत्वस्य समानधर्मत्वे तस्य तथात्वेऽपि साक्षात्त्वेन विरोधाभावात्। तथा सति तत्रैव कुतो न
सादृश्यान्वय इति चेन्न। धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतासंसर्गेण शाब्दबोधे विशेष्यतया विभ
क्त्यर्थोपस्थितेर्हेतुत्वात्। न च निपातार्थभिन्नवृत्तित्वेन प्रकारताविशेषणीयेति वाच्यम्। घटो न पश्यतीत्यादौ घटाद्य
न्विताभावस्य कर्मतासंसर्गेण दर्शनान्वयापत्तेः। यदि तु धात्वर्थेऽपि नञर्थवशात् सादृश्यान्वयोऽनुभवसिद्धस्तदा धा
त्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतासंबंधेनान्वयबुद्धिं प्रति नञ्जन्योपस्थितेः प्रतिबंधकत्वमात्रं परिकल्प्य घ
टो न पश्यतीत्यादौ पूर्वोक्तान्वयबोधो निराकरणीय इति दिक्। एवमरविंदमिव सुंदरं वदनमित्यादावरविंदादिनि
रूपितसादृश्यस्य प्रयोजकतासंसर्गेण सुंदरपदार्थैकदेशेऽपि सुंदरत्वेऽनुभवबलादन्वयस्तद्विशिष्टस्य चाभेदेन
मुखादौ। इत्थं चारविंदनिरूपितसादृश्यप्रयोजकसौंदर्यवदभिन्नं वदनमित्यन्वयबोधः। अरविंदसुंदरमिति
समासे त्वरविंदपदेनारविंदनिरूपितसादृश्यप्रयोजकं लक्ष्यते। तच्चाभेदेन पदार्थैकदेशे सौंदर्येऽन्वेति। एवं चा
रविंदनिरूपितसादृश्यप्रयोजकाभिन्नसौंदर्यवदभिन्नं वदनमित्यन्वयबोधः। एकदेशान्वयायोगादरविंदनिरू
पितसादृश्यं वदनमिति बोधः। सादृश्यस्य निपातार्थतया भेदेन नामार्थान्वयबोधकाभावात्। अरविंदमिव भातीत्य
त्र भातेर्ज्ञानार्थकत्वेऽरविंदपदस्यारविंदनिरूपितसादृश्यप्रकारकज्ञानविषयत्वे लक्षणा। तस्य चाभेदेन मुखादाव
न्वयः। प्राचां तात्पर्यग्राहकम्। पूर्वोक्तदिशा वा सादृश्यस्यैव प्रकारतासंसर्गेण धात्वर्थेऽन्वयः। अत्रैव सौंदर्येण
ति धर्मीपादनेन तृतीयार्थस्य प्रयोजकस्य सादृश्ये ... सौंदर्यप्रयोज्यारविंदनिरूपितसादृश्यप्रकारतो इति बो
धः। प्राचां कल्पे त्वरविंदमेव सर्वार्थबोधकमिति तत्तात्पर्यग्राहकमिति ध्येयम्। इयं च सादृश्यपदार्थीतरत्वम्

२

तेसादृश्यबोधरीति रूपदर्शिता। तस्य समानधर्मरूपत्वे तु चंद्र इव मुखमित्यादौ चंद्रवृत्तिधर्मवन्मुखमि
ति बोधः। अत्रैवाह्लादकमिति समानधर्मोपादाने इवार्थस्य धर्मस्याह्लादकत्वपदार्थैकदेशेऽन्वयः। तदसहिष्णु
तायां तु चंद्रनिष्ठाह्लादकत्वमिति। आह्लादकपदस्य लक्षणा चंद्रादिपदं तात्पर्यग्राहकं। चंद्रसादृश्यमित्यत्राप्ये
कदेशे सादृश्येऽन्वयः। सम्बंधकत्वात्। सादृश्यपदं वा चंद्रसादृश्यविशिष्टे लाक्षणिकम्। अत्रैवाह्लादकत्वेने
त्युक्ताभेदस्तृतीयार्थस्तस्य च सादृश्यपदार्थैकदेशे धर्मेऽन्वयस्तथा चाह्लादकत्वाभिन्नं चंद्रवृत्तिधर्मवदभि
न्नं मुखमिति बोधः। सादृश्यपदमेव वा सर्वार्थबोधकमितरत्तात्पर्यग्राहकमित्येवं विधान्वयसरणिश्रे
यस्तत्र तत्र शाब्दनिपुणैरनुसंधेया इत्यलं प्रसक्त्या। पूर्णोपमित्यनंतरमालंकारिकैरिति पूर्णोयम्। तत्त्वे च विशे
षतु उपात्तशब्दशक्तिप्रतिपादितोपमानोपमेयकत्वे विशेषतः शब्दोपात्तसमानधर्मकत्वे च सति विशेषतः स्वनि
ष्ठशाब्दगम्यत्वम्। स्वपदमुपमापरं। उपमानलुप्तायामपि लक्षणयोपमानप्रतिपत्तेस्तद्वारणाय शक्तेति उपमे
यलुप्तायां स्मरवृद्धयंतीत्यादौ वाक्येन उपमेयस्याध्याहृतेनात्मानमिति शब्देन बोधनादुपात्तेति शब्दविशेषणम्।
एवमपितन्वीस्तनेनैत्रोपमेयस्य कोकस्य सदृशेन हृपूत इत्येवं विधायां लुप्तोपमानायामुपमानस्य सादृश्यप
देशोपात्तत्वाद्विशेषत इति। उपमेयोपमानतावच्छेदकरूपेणेत्यर्थः। धर्मलुप्तायामप्युपमावाचकेन सामान्यतो
धर्मस्योपात्तत्वाद्विशेषत इति। उपमायां च निरूप्या इववद्वायथाशब्दा इत्याद्यभियुक्तोक्ति संगृहीता इवा
दयः। अत्र निपातरूपस्येवादेरुपसर्गवद्द्योतकत्वमेव कथमन्यथा शशैरुस्रै रिवोदीच्यानुद्धरिष्यन्नसू
न्निवेत्यादावुस्रादिपदोत्तरतृतीयादिसंगतिः। उस्रादेरुद्धरणक्रियां प्रत्यकरणत्वात्। इवार्थसादृश्यान्वयित्वे
न करणीभूतसादृश्यविशेषणत्वेन तृतीयादिसंगतिरिति वैयाकरणमतं तन्नादरणीयम्। उपास्यते गुरु
रित्यादौ धात्वर्थोपासनक्रियाया अकर्मकतया कर्मलकारानुपपत्तिरूपबाधकस्योपसर्गवाचकतायामि
वेवादिवाचकतायामभावेन दृष्टांतवैषम्यस्य स्फुटत्वात्। विशेषणविशेष्ययोः समानविभक्तिकतायां वि
शेष्येण सहैकार्थमवेद्यत्र विशेषणम्। तत्र विशेषणलिंगादयः प्रायो विशेष्यस्या विशेषण इत्य
लुप्तासनस्येवोपमानोपमेययोरपि तस्योर्लिंगसंख्याविभेदे पिह्युपमानोपमेयता। विभक्तिः पुनरेकैव।

समानविभक्तिकतायां

चन्द्र इव मुखं (वत्) मुखं वा निवा

कुवल· दी·
३ ३

लिङ्ग· संख्याविभेदेपि
तिकारिको ... [illegible]
...वृत्तेहस्त... उपमा
नानं त्वेदं उपमेया
पमान... वाभी
वाट

उपमाने ... [illegible] ...नुशासनस्य सत्त्वेनोपमानपदोत्तरतृतीयादेः साधुत्वार्थं तयोरुपात्तेश्च। तस्माद्वाचकत्व
मेववादीनां युक्तमिति तत्। अन्यथा सकलालंकारिकसंमतस्यैव मेतच्छब्दस्य प्रयोगे श्रोत्रीयस्य दत्तजलांजलित्वा
पत्तेः। रूढप्रयोजनयोरन्यतरस्याभावेन चंद्रादिपदे न चंद्रसदृशलक्षणाया निषिद्धत्वाद्वाचकत्वरूपेणैवार्थतद्दोषा
पत्तेश्च। अपि चैवादेर्द्योतकत्वनये चंद्रादेरुपमानस्य पदार्थैकदेशतया तत्र साधारणधर्मान्वयानुपपत्तिः। तस्योपमेयसा
धीनत्वांगीकारे च लिंगवचनभेदस्य दोषत्वानुपपत्तिरिति दिक्। उपमानेत्यादि॥ उपमानत्वं चोपमानिरूपकत्वेन विव
क्षितत्वम्। तदाश्रयत्वेन विवक्षितत्वं चोपमेयत्वं। साधारणत्वं च धर्मस्य स्वारसिकमौपचारिकं बिंबप्रतिबिंबभावकृतमाव
स्तुप्रतिवस्तुभावेन समासभेदाश्रयणेन वेत्यनेकधा चित्रमीमांसायां प्रपंचितम्। तत्र स्वर्गंगावगाहनस्पर्धया त्वमौपचारि
कं। कीर्तितस्य स्वारसिकत्वाभावात्॥ उपादानादिति॥ वाच्यस्योपादानं निर्देशः। इतरेषां तु शब्देन प्रतिपादनं तदिति चिंतनी
यम्। साधारणप्रकारविशेषोपदर्शनायोदाहरणांतरमाह॥ यथावेति॥ गुणदोषावर्थात्परस्य गृह्णन् जानन् बुधः
पंडितः पूर्वं पूर्वनिर्दिष्टं गुणं शिरसा श्लाघते आदरातिशयेन शिरसाऽभिनंदयति। परं परतो निर्दिष्टं दोषं कंठे नियच्छति। नि
रुणद्धि। वाचा कण्ठाद्बहिर्न निःसारयतीत्यर्थः। क इव इंदुक्ष्वेडौ चंद्रगरलौ गृह्णन् उपाददान ईश्वरो हर इव। सोपि हि पूर्वं चंद्रं
शिरसा श्लाघते तत्पूर्वकं धारयति। परं च गरलं कंठे नियच्छति स्थापयतीति। क्ष्वेडस्तु गरलं विषमित्यमरः। प्रकृते·
अत्र यद्यपीति। साधारणस्तत्त्वेनाभिमतो धर्मः। गृह्णन् शिरसा श्लाघते पूर्वमित्यादिनोक्तो यद्यपि नैकोनसाधारण इति यो
जना। गृह्णन्नित्यादिनोक्त एकोपि धर्मः साधारणो नेति वा। यथाश्रुते साधारणत्वाभावोक्तेरसंगतत्वापत्तेः। साधारण्यभा
वे हेतुः। उपमानइत्यारभ्य इति भेदादित्यंतेनोक्तः॥ समाधत्ते। तथापीति। वस्तुगत्या साधारण्याभावेपीत्यर्थः। यथाक्रमं
चंद्रगुणयोर्गरलदोषयोश्चेत्यर्थः। बिंबप्रतिबिंबभावेन प्रतीयमानसादृश्ययोरुपमानोपमेयधर्मयोर्यौ भिन्नशब्दो
पात्तत्वरूपेण भेदात्। अभेदाध्यवसायात्। एतच्च साधारणधर्मतेत्यनेनान्वितम्। ज्ञानादीत्यादिना शिरसा वहनाभिनंद
नयोः कंठस्थापनतद्बहिरनुद्घाटनयोश्च संग्रहः। गृह्णन्नित्यादीत्यादिना च शिरसा श्लाघते कंठे नियच्छतीत्यन
सर्ग ३ योः संग्रहः। अभेदाध्यवसायादिति। अभेदाध्यवसायाद्बाहार्यनिश्चयादित्यर्थः। साधारणधर्मतेतीति। साधारण
धर्मत्वाभिमानविषयतेतीत्यर्थः। पूर्वस्मात्पूर्वोदाहरणात्। इति विशेष इत्यन्वयः। न चैवं साधर्म्यप्रतीत्युपमानेने
पि वस्तुतस्तदभावात्कथमुपमालक्षणसमन्वय इति वाच्यम्। चमत्कारविशेषप्रयोजकसाधारणत्वाध्यव ३

साधर्म्यविषयधर्मस्यैवोपमालक्षणत्वमित्यभिप्रायादिति। लोके बिंबप्रतिबिंबभावोपदेशस्य गगनजलाशयादि
गतचंद्रादिविषयतया प्रसिद्धेः कथं प्रकृते तदुपदेश इत्याशंकायामाह। वस्तुत इत्यादि। अभिन्नयोरेव तयोः पृथग्वस्थि-
तयोः पृथगिति भिन्नशब्देनेत्यर्थः। बिंबप्रतिबिंबभाव इति। बिंबप्रतिबिंबभाववद्वाच्यमित्यर्थः। समयः संके-
तः। पूर्णोपमानोदिसमग्रता प्रसिद्धेस्तद्विपरीतायां लुप्तोपमायां सर्वलोपनियमाशंकानिरासाय लक्षणपूर्वकं
तां विभजते। वर्ण्येत्यादिना। चकारो वाशब्दार्थः। तदनंतरं च लोपे इत्यध्याहार्यम्। एवं चेतरेतरयोगाविवक्षया वर्ण्य-
स्योपमानस्य धर्मस्योपमावाचकस्य वा लोपे अन्यतमानुपादाने लुप्तोपमा सा च सा चैकद्वि अनुपादानेन पृथग्
भिन्नेति पूर्वापराभ्यामुक्तं भवति तद्विदित्यादीनुदाहरणानि। अर्थितो व्याचष्टे। उपमेत्यादीनामिति। वस्तुतो लाघवात्तु
र्णां भिन्नत्वं लक्षणे बोध्यम्। लक्षणवाक्यगतक्रममुपेक्ष्योदाहरणक्रमानुसारेण विभागं दर्शयति। यच्चेत्यादि। वाच-
कलुप्तेति। वाचकत्वं चात्रानुपूर्वीविशेषवत्तयोपमाबोधने निरूढत्वम्। तच्छेषशास्त्रानिरूढलक्षणया वा। तत्राद्यमि
वादेर्द्वितीयं तु स्वहृदित्यादेरिति तदभावात्त्रिदशोरीत्यादौ वाचकलोपः समासानुशासनेन निरूढलक्षणावेगमपि
आनुपूर्वीविशेषवत्तयाशक्तविशेषस्य तद्बोधनात्। शास्त्रकृत इति। शास्त्रप्रयुक्त इत्यर्थः। कर्पूरंतीयते इति। अत्र
सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्य इत्यनेन विहितः क्विप् लुप्तोऽपि स्मर्यमाणो धर्ममात्ररूपमाचारं बोधयति। कर्पूर
पदं च लक्षणया कर्पूरसादृश्यं तस्य चातिरिक्तत्वेपूर्ववत्प्रयोजकतासंसर्गेणाचारेऽन्वयो धर्मरूपत्वेऽत्वभेदेन। वस्तुतस्तु
क्विलोपप्रतिसंधानेऽपि। तथा बोधात्कर्पूरादिसादृश्यप्रयोजकाभिन्ने वाचारलक्षणयेतीति युक्तम्। ननु वाचकस्येवादे
रनुपादानाल्लोपो युक्तः साधारणधर्मत्वाचाररूपस्य क्विबुपात्ततया कथं लोपस्तत्राह। कर्पूर इवानंदात्मकाचारार्थस्य
क्विप इति। कर्पूरस्येवेतीवार्थवृत्तिः। आनंदात्मकः जनकतासंबंधेन वस्तुगत्या आनंदस्वरूपो यश्चाचारस्तद्बोधकस्य
क्विप इति। कर्पूरस्येवेतीवार्थवृत्तिः। ... इत्यर्थः। ननु क्विब्लोपाल्लोप्याचारप्रतीतेः कर्पूरादिपदानामेव तद्बोधकत्वपक्षे कथं धर्मलोपसंगमनीय इति केचित्। अत्र
त्वर्थः। ननु क्विलोपाल्लोप्याचारप्रतीतेः कर्पूरादिपदानामेव तद्बोधकत्वपक्षे कथं धर्मलोपसंगमनीय इति केचित्। अत्र
त्रयोश्च एवमपि द्योतकतया विहितक्विपो लोपात्तल्लोपव्यपदेशः। अत एव समानार्थकः काल्लोपापात्तः। तस्यलुप्तत्वादि
त्याहुः। नव्यास्तु। धर्ममात्ररूपस्याचारस्योपादानेऽप्यानंदत्वादिनाविशिष्टरूपेणानुपादानाद्धर्मलोपो युक्त एव।
इत्याहुः। ... तस्य तात्त्वदेर्धर्मलुप्तोदाहरणस्यासंगतत्वापत्तेः। न चैवं काचादावपि धर्मलुप्तास्यादिति वाच्यम्। इष्टापत्तेरि
त्याहुः। स्मरदग्धं यन्तीत्याजेति। ननूपमादौ चारइति कर्मभूतादुपमानादाचारे क्यचो विधानात्स्मरवधूरतिभिवा

ना

धर्ममात्ररूपस्य मान्यत उपादानेऽपि धर्मलुप्तापादने॰

प्रमायां

कर्त्रो प्रमाभि
न्नोपमात्वं लुप्ता
पमात्वः
तत्रसहन्तु वि

धर्मातिरि
क्तत्व

५४

ला

त

अत्र तल्लप
देनधर्मभद्र
सत्संनीत॰

हा

सर्हातमदं॰

कु॰व॰ चरंतीलयमनमेपि आत्मानमन्यो वेति कथं निर्णयस्तत्राह। विशेषणेति॥ एतत्पद्यं नु रूपाचरणस्य कौतिकरणत्वात्‌ रूपवि
टी॰ शेषणस्य समर्थनादित्यर्थः। स्वरसतः स्वीयत्वावगमादिति भावः। न चात्मन उपमेयस्य तन्वीपदेनोपादानात्कथं लोप
४ इति वाच्यम्। तस्य द्वितीयांततया कर्मभूतोपमेयासमर्पकत्वात्। आत्मानमित्यध्याहृतेनैव तद्बोधात्। अत्र च स्मर
ना॰ वधूपदेन स्मरवधूसादृश्यं लक्ष्यते। तस्य च प्रयोजकसंसर्गेण भेदेन वाचारेऽन्वयः। तथा च स्मरवधूसादृश्याभिन्न
५ आत्मकर्मको य आचारस्तदाश्रयस्तन्वीति बोधः। काकतालीयेति॥ वृत्तिविषये॰ समासविषये॰ ज्ञापकादिति॰ इवार्थस
मासाभावे तद्धितविषयादित्यनेनेवार्थविषयसमासानुवादोऽनुपपन्नः स्यात्। ज्ञापक इत्यर्थः। उभयत्र काकागमनताल
पतनयो रूपमेयमित्यनेनतरं क मेलेति शेषः। तेनेति। काकतालसमवेतक्रियापरयोः काकतालपदयोरिवार्थसमा
सेनेत्यर्थः। काकतालसमागमेति॥ अयं भावः। काकागमनतालपतनयो रूपमानत्वे तदुपमेययोः स्वीयगमनतन्व्यव
स्थानयोः पृथगनुपात्तत्वेनोपमेयतयाऽन्वयायोगात्काकतालसमागम एवोपमानं। इत्थं च काकतालसमागमस
ध्या॰ दृशः काकतालपदार्थस्तस्य चौदेवस्वीयतन्वीसमागमरूपे उपमेयेऽन्वय इति। तत इति। तादृशसमासोत्तरमित्यर्थः।
इति तदर्थ इति। काकतालपदलक्षितस्य काककृततालफलोपभोगसदृशस्याभेदेन तन्वीरतिलाभरूपेणोपमेये
नान्वयेदिति भावः। अत्र पतनदलितमिति। रहोदर्शनक्षुभितहृदयेति च बिंबप्रतिबिंबभावापन्नधर्मस्वरूपकथनेन
त्वेवमन्वयाकार इति बोध्यम्। न च सकृदुच्चरिताभ्यां काकतालपदाभ्यां कथमुपमानद्वयावगम इति वाच्यम्। अनुभवा
नुसार्यनुप्रासनेन व्युत्पत्तिवैचित्र्यस्य स्फुटप्रतिपत्तिरिति। एवं दुरूहत्वात्पद्यं व्याख्याय तत्रोपमानेन लुप्तादीन्‌ चतुरोपि भे
दान्‌ दर्शयितुमाह। तत इति। काकागमनेत्यादि। काकागमनतालपतनरूपो यः समागमस्तद्रूपस्येत्यर्थः। इदं च
काकागमनमिव तालपतनमिवेति महाभाष्यगतविग्रहविरोधशंकापरिहारायोक्तम्। समागमस्य तादृशक्रि
याद्वयाभिन्नत्वेनोक्तयुक्त्या तस्यार्थ एव पर्यवसानात्। विशिष्टोपमायां विशेषणावगतिवत्समागमोपमायामपि
षितदवयवक्रिययोर्थयाः संयोगं गम्यमानामुपमामभिप्रेत्य महाभाष्यकृता तादृशविग्रहवाक्यप्रणयनमित्याशयः। ध
र्मस्यानुपादान इति। तत्स्थाने अभवत्किं ब्रवीमि ते इति पाठे अनुसंधेय इति भावः॥ इति श्रीमत्तत्सदित्युपाख्यरामभट्ट
सूरिवर्यसूनुवैद्यनाथभट्टविरचितायामलंकारचंद्रिकायां कुवलयानंदव्याख्यायामुपमाप्रकरणं समाप्तिमग
मत्। श्रीर्जयति। यद्यप्युपमानिरूपणानंतरं तन्मूलालंकारेषु संभवात्सादृश्या उपमेयोपमेव प्रथमं निरूपयितुमुचि सू॰
ता न त्वारोपितसादृश्यनिबंधनोऽनन्वयस्तथापि तद्द्वितीयसदृशव्यवच्छेदफलकतया। ततीसदृशव्यवच्छेदफलि

तं अनन्वयं निरूपयतीति संबंधः यै॰

कामुपमेयोपमामपेक्ष्य शीघ्रोपस्थितिकमभिप्रेत्य प्रथमं निरूपयति ॥ उपमानोपमेयत्वमिति ॥ उपमानत्वमुप
मेयत्वं चेत्यर्थः । द्वन्द्वोत्तरश्रूयमाणत्वात् । विवक्षित इति शेषः । एवं चैकस्यैव वस्तुनो यदुपमानत्वमुपमेयत्वं च वक्ष्य
ते तदनन्वय इत्यन्वयः । असंभवशंकानिरासाय सध्येयुदाहरणोक्तिः । ननु कमलनयनस्य मैणि मैत्त्रिप्रलितिरिव मतिर्म
तिरिव चेष्टेत्यादिरशनोपमायामतिव्याप्तिः । तत्र मत्यादेरेकस्यैव वस्तुन उपमानत्वस्योपमेयत्वस्य च वर्णनात् । अ
थैकस्य वस्तुनो यदेकनिरूपितमुपमानत्वमुपमेयत्वं चेति विवक्षितं । एकपदस्यावृत्तिकल्पनात् । इत्थं च रशनोपमा
यां मत्यादेश्चेष्टादिनिरूपितमुपमानत्वं मत्यादिनिरूपितमुपमानोपमेयत्वमित्येकनिरूपितोपमानोपमेय
त्वविरहान्नातिव्याप्तिरित्युच्यते । तदा खमिव जलं जलमिव खमित्युपमेयोपमायामतिव्याप्तिः । तत्रैकस्यैव वस्तुनो ग
गनस्यैक जलनिरूपितस्योपमानत्वस्योपमेयत्वस्य च वर्णनादिति चेत् मैवम् । एकस्यैवेति विरोधद्योतकेवका
रबलेन स्वाश्रयनिरूपितयोरुपमानोपमेययोर्लाभेन तत्राप्यतिप्रसंगाभावात् । अस्ति हि इंदुरिंदुरिवेत्यनन्वये उप
मानत्वमुपमेयत्वं च स्वाश्रयेंदुनिरूपितं न तु रशनोपमायामुपमानोपमायो चेति संक्षेपः । अनन्वयपदप्रवृ
त्तिनिमित्तमाह । वर्ण्यमानमपीति । नान्वेतीति । न संबध्यत इत्यर्थः । साधर्म्यस्य अभिधानम् । आरूप्यारोपरूप
तया प्रतिपादनम् । सदृशान्तरव्यवच्छेदेन । सदृशान्तरव्यावृत्तिबोधद्वारेण । एतदेव विशदयति । इंदुरित्यादिना । इत्थं
च सदृशान्तरव्यावृत्तिसूचनद्वारानुपमेयत्वद्योतनरूपप्रयोजनवत्त्वादाद्याततो रुद्रो रुद्र इवेत्यादिवद्वाक्यमात्रतया
सादृश्यप्रतिपादने विना संबद्धप्रलापतापत्तिरिति भावः । उदाहरणान्तरमाह । पूर्वोदाहरणेति । विपुलत्वाद्दिरित्यादि
पादार्णभीर्यदारुणत्वयोः संग्रहः । इत्यनन्वयप्रकरणम् । अथोपमेयोपमां लक्षयति । पर्यायेणेति ॥ अयोगपद्ये
नेत्यर्थः । वाक्यभेदेनेति यावत् । तत् उपमानोपमेयत्वं । विवक्षितम् इति शेषोत्रापि बोध्यः । उपमेयोपमेति लक्ष्यनिर्देशः । उप
मेयेनोपमेति व्युत्पत्तिः । धर्मद्वयं धर्म्यैक्यदृष्टान्तमुदाहरणम् । अर्थी धनं । पूर्णश्रीः पूर्णसमृद्धिः । अत्र धर्मी यियोर्द्वयोर्वाक्यभेदेनोप
मानत्वमुपमेयत्वं च पर्यायेणेति लक्षणसमन्वयः । उपमानोपमेयत्वमात्रोक्तावनन्वयेतिव्याप्तिर्द्वयोरित्युक्तम् । एव
मपि सममत्वेषु शरदि प्रापुरहो कुमुद्वतारका इत्युभयविश्रान्तसादृश्यायामुपमायामितिव्याप्तिः । तत्र द्वयोः कुमुद्वता
रकयोः सादृश्याश्रयत्वरूपोपमेयत्वस्यैव तत्प्रतियोगित्वरूपस्योपमानत्वस्याप्यर्थतः प्रतीतेरतः पर्यायेणेत्युक्तम् । म
ननु मत्यादिदिव मति मैतिरिव चेष्टा चेष्टेव कीर्त्तिरिति विमलेति रशनोपमायामतिव्याप्तिः । तत्र द्वयोर्मतिचेष्टयोर्वा

मुपमेयत्वं च वर्णितं तत्राद्यौ पूर्वस्योपमानत्वं द्वितीयस्य तद्विपर्यासेन धर्मस्योपमानत्व ४

धर्मस्योपमेयत्वम्

काव्य० टी० ५ 5

कथमेदेनोपमानोपमेयत्ववर्णनादिति च । द्वयोरित्यनेन परस्परमुपमानोपमेयत्वस्य विवक्षितत्वात् । अन्यथा पर्या
यभेदेनैवान्वयवार्त्तां तद्वैयर्थ्यापत्तेरिति संक्षेपः । ननूपमाप्रतीयोभयरूपाया उपमाद्वयरूपाया वा उपमेयो
पमायाश्चत्वे कान्तरंलेकिं किं बीजमित्यत आह । द्वयोरिति । तथा चार्थविशेषद्योतकतया चमत्कृतिवैलक्षण्यमेव तत्र बी पा०
जमिति भावः । कथं तृतीयसदृशव्यवच्छेदलाभस्तत्राह । धर्मैक्ययोरिति । धर्मैक्ययोर्मध्य इत्यर्थः । त्वित्तः शब्देन तथा
च प्राप्तस्य पुनर्वचनं तदितरपरिसंख्यार्थमिति न्यायादिहापि तृतीयसदृशव्यावृत्तिलाभ इति भावः । खमिवेति । शरद्व
र्णनमिदं । खमाकाशमिव जलम् । कालुष्यापगमेन निर्मलत्वातिशयात् । शोभेत्यलम् । निर्मलत्वादीत्यादिपदेन स्वैर्त्या
तिशयपरिग्रहः ॥ गिरिरिवेति ॥ अत्र गजः प्रकृतः । अयमिति प्रकृतपरामर्शी सर्वनामनिर्दिष्टत्वात् । अत एवोपक्रमा
दर्पस्य मदधारे तान्वयो बोध्यः । अत्र पूर्वार्द्धे उच्चैर्विभातीति समानधर्म उपात्तः । उत्तरार्द्धे चास्रवतीति स उक्त इति दि
क् । इत्युपमेयोपमाप्रकरणम् ॥ प्रतीपमिति लक्षणनिर्देशः । ननूपमानोपमेययस्य वैवक्षिकतया मुखादेरप्युपमान
त्वसंभवाच्चन्द्र इव मुखमित्युपमायामतिव्याप्तिरित्यत आह । प्रसिद्धेति । प्रसिद्धोपमानस्योपमेयत्वं प्रतीपं प्रतीपपदवा
च्यम् । कुतः प्रातिलोम्यात् । प्रसिद्धोपमानप्रतिकूलत्वात् । उपमेयभावप्रातिलोम्यात् इत्यविसर्गपाठेपि प्रसिद्धोप
मानस्य य उपमेयभावस्तस्य प्रातिलोम्यादुपमानप्रतिकूल्यात् । उपमानस्योपमेयत्वकल्पनं प्रतीपमित्युच्यत इति
व्याख्येयम् । ननु प्रसिद्धस्योपमानोपमेयभावस्य वैपरीत्यादिति यथाश्रुतरीत्या । एवंविधप्रातिलोम्यस्य तृतीयपंच
मप्रतीपभेदाव्याप्तित्वेन प्रतीपपदप्रवृत्तिनिमित्तत्वायोगादिति । एवं चोक्तप्रकारेणोपमानप्रतिकूल्यं प्रतीपपदप्र पा०
वृत्तिनिमित्तत्वकथनेन प्रसिद्धोपमानप्रतिकूलधर्मः प्रतीपपंचकसाधारणं सामान्यलक्षणमिति सूचितम् । अतएव
वं पंचमप्रतीपव्याख्यानावसरे वक्ष्यति । उपमानप्रातिलोम्यादिति । प्रतिकूलत्वं च तिरस्कारप्रयोजकत्वम् । एतस्य चप
लं प्रतीपभेदसाधारण्ये तत्र तत्र स्फुटीकरिष्यति । यथा वेति । प्रोषितस्य प्रियां प्रति विरहवेदनानिवेदनमिदं । अयि प्रियेत्व
दीयसादृश्यपनविनोदो विरहयापनं तन्मात्रमपि मम दैवेन न क्षम्यते । एतदेव दर्शयति । यदित्यादिना । त्वन्नेत्रयोः समाना
साधारणी कांतिः शोभा यस्य तथाविधं यदिंदीवरं तत्सलिले मग्नम् । वर्षर्तुना जलवृद्धेः । तव मुखस्य छायया कांत्यानु
कारी सदृशः शशी मेघैरंतरितस्तिरोहितः । यपीत्यपि विभिन्नक्रमः । त्वद्गमनसदृशगतयो राजहंसास्तेपि गता इति । अत्र
कांतीत्यादि धर्मोपादानात्पूर्वार्द्धोदाहरणे वेल्लक्षणं बोध्यम् । ननूपमानादुपमेयस्याधिक्यवर्णनात्मपाद्व्यतिरेकालंकार
दस्य को भेदः । उच्यते । तत्र वैधर्म्यप्रयुक्तमुपमेयस्याधिक्यं विवक्षितम् । इह तूपमानत्वमात्रप्रयुक्तत्वात्साधर्म्यप्रयु

कमिति। प्रतीपं तदाह। अन्योपमेयेति॥ अन्यद्वर्ण्यं यदुपमानं तद्रूपं यदुपमेयं तस्य लाभेन वर्णनीय
स्य मुखादेरनादरो गर्वपरिहारो पि तत्प्रतीपमित्यर्थः। तस्य गर्वप्रसक्तिपूर्वकत्वेनोपमेयता। यास्त्रपि पूर्व
मप्राप्ता उपमानतिरस्कृतिविशेषप्रयोजकत्वादिति भावः॥ अतएव तल्लाभेनेत्युक्तं न तु सत्त्वेनेति। अप्राप्त
प्राप्तेर्लाभशब्दार्थत्वात्। विछित्तिविशेषेति। चमत्कारोत्कर्षमित्यर्थः। उक्तरीत्योपमानतिरस्कारातिशयप्रतीतेरि
ति भावः॥ गर्वमिति। असेवाक्षम। संवाहनायोग्यं। अवधिमिति मितियावत्। भद्रे ग्रामनेद्दृति संबोधनम्। नन्विति
ति। हेत्वर्थे। अनयानामनेकार्थत्वात्। पूर्वोदाहरणे कोत्युसमानधर्मोपादानमिह तु नेति भेदः॥ वर्ण्योपमेयेति। अस्य
सर्ववर्णस्य अनादरो पि तथा प्रतीपमित्यर्थः। अहमेवेति। सुदारुणनामतीव्रालङ्गुरुः श्रेष्ठः। तातेति सानुकंपसं ति
बोधने। मास्म दृप्यइति। दर्पं मा कृथाः इत्यर्थः॥ वर्ण्येनान्यस्येति। निरूपितत्वं तृतीयार्थः। वर्ण्यनिरूपिता यान्यस्य अनिष्पत्तिरिति संबन्धः
वर्ण्यस्योपमानस्य इत्यर्थः। अनिष्पत्तिवचः। उपमानं निष्पन्नैः। कदम्भिदितं इति न्यायात्। तत्प्रतीपम्। मुधे भावोऽलंकार
ति। किंत्वितिवार्त्तीयां त्वन्मुखाभमंबुजमितिवार्त्ता मुधा निष्प्रयोजनो ऽपवादः। अलीकार्थकत्वेनापवादस्य काशते:
निष्प्रयोजनत्वम्। उत्कर्षेति। उपमानतिरस्कारातिशयप्रयोजकत्वरूपेत्यर्थः। मुधापवादत्वादेवेति। मि
उक्तार्थमेतत्। आकर्ण्येति। वचनीयम्। अलीकतया निंदितम्। अतएव मुधेत्युक्तम्। लोकोत्तरे मुखास
न्निधाने न विशेषादर्शनादलीकत्वग्रहायोगात्। सन्निधानेपि विशेषाग्रहात् सामरेरित्युक्तम्। अत्र वच
नीयं पामरैरित्येताभ्यामुपमितेरनिष्पत्तिः प्रकाश्यते। प्रतीपमिति। कः अर्थः प्रयोजनमस्य तत्तथा अनर्थक
मितियावत्। तस्य भावः कैमर्थ्यं तदपि प्रतीपं मन्वते। आलंकारिका इति शेषः। ननूपमानस्य पद्मचंद्रादेरास्यादवि
शेषरूपप्रयोजनसत्त्वात्कथमनर्थकत्वमत आह। उपमेयस्यैवेति। उपमानपूर्वहत्वेन उपमानकार्यकारि
त्वेन। अयं चोपमानकैमर्थ्ये हेतुः। अतश्चोपमानकैमर्थ्यमित्यध्याहार्यम्। आह्लादविशेषादेरन्यलभ्यत्वेन प्रयो
जनत्वासंभवात् कैमर्थ्यमिति भावः। उपमानप्रयोजकपूर्वहत्वेन कैमर्थ्याकलक्यं प्रतीयतेति पाठे उपमानं प्रयोजकं य
स्या इति बहुव्रीहिः। ननूपमानकैमर्थ्यस्योपमानेतिपक्षे प्रतीपमिति वामनसूत्रेण हेयालंकारत्वेनोक्तत्वात्कथं प्रती
पत्वमत आह। उपमानप्रतिलोम्यात्। उपमानप्रतिकूलत्वादित्यर्थः। प्रतिकूलत्वं च तिरस्कारप्रयोजकत्वमित्युक्तम्।
तथा च प्रतीपसामान्यलक्षणाक्रांतत्वात्प्रतीपं तभेवएवोचितइति भावः। तदोजस इति। नैषधीये नैषधवर्णने।

कुल० टी० ६ विशिष्टत्वान्नयमत्वमौ...प्रतापस्य तद्यशसस्त्व स्थितौ सत्यां इमौ च द्वौ स्तर्यौ तत्प्रतापज्योत्स्नादेः कार्यस्य ताभ्यामेवोप
पत्तौ निरस्त्वैकान्तविलिखितमिव यदा यदाकुरुते तदा मानोर्विद्योऽस्य परिघेकैतवात् लछ्लात्। कुंडलनौवैयर्थ्यसूचिकारेखा व
णो करोतीत्यन्वयः। अत्र चनायं परिवेषः। किंतु कुंडलना इत्यपह्नुतौ कैमर्थ्यरूपप्रतीयमानत्वात्तयोरंगांगिभावल
क्षणः संकरः। यद्यहमायमित्यादिवद्वत्तत्पदेवीणायामकरणे न दोषः। इति वाध्यम्। केचिदिदं प्रमत्तयः। अनन्वयोपमा पमेयो०
6 प्रतीयमानामिति। प्रतीपपदेन चाद्यमेदत्रयमेव गृह्यते न त्वेतत्भेदद्वयमपि। तत्रोपमितिक्रियानिष्पत्तेरभावेनो
पत्तौ। तद्भावस्यासंभवात्। वस्तुतस्त्वाद्यभेदत्रय... स्यापि नोपमान्तर्गतिर्युक्ता- चमत्कारं प्रति साधर्म्यस्य प्राधान्ये
नाप्रयोजकत्वात्। साधर्म्यनिबंधन उपमानतिरस्कार एव हि तत्र चमत्कृतिप्रयोजकतया विवक्षितो न तु साधर्म्य
मेवमत्र खतश्चमत्कारितया विवक्षितमिति सहृदयसाक्षिकम्। एवमनन्वयोपमेयोपमयोरप्युपमान्तर्गतिर्युक्त नै०
ते। अन्यथा सादृश्यवर्णनमात्रेणोपमान्तर्भावे धैर्यलावण्यगांभीर्यप्रमुखैस्त्वय्युदन्वतः। गुणैस्तुल्योसि भेदस्तु वपुषै
वेदृशेनेत इति व्यतिरेकालंकारस्याप्युपमान्तर्गति... स्यात्। तत्र साधर्म्यसमानाधिकरणं वैधर्म्यमेव चमत्कारे प्र
धानं न तु साधर्म्यमिति चेत्। तत्स्यामिदं प्रतीपादिष्वपीति सहृदयैराकलनीयम्। एतदेवास्वरसबीजमभिसंधा
योक्तं केचिदिति। अन्ये वामनादयः। अत्र चास्वरसबीजं प्रागेवावेदितम्। इति प्रतीपप्रकरणम्॥ रूपकं लक्षयति। वि
षयाभेदेति। रूप्यते व्यावृत्ततया ज्ञायते धर्मी अनेनेति रूपं तत रूपस्यासौ तद्रूपस्तस्य भावस्ताद्रूप्यं चंद्रकार्यकारि कौर
त्वादि। विषयिण उपमानस्याभेदताद्रूप्याभ्यां विषयस्योपमेयस्योपरंजनमिव रंजनं स्वापरक्तबुद्धिविषयीकर
णमितियावत्। तत् रूपकमित्यर्थः। रूपकं तदिति पाठः। रूपकमिति पाठे तदित्यध्याहार्यम्। उपात्तविवा विशिष्टविष घा १५
यधर्मिकाहार्यारोपनिश्चयविषयीभूतमुपमानाभेदताद्रूप्यान्यतररूपकमिति तु निष्कर्षः। मुखं चंद्र इत्यादौ नामा
र्थयोरभेदान्वयव्युत्पत्तिवशादाहार्यचंद्राभेदनिश्चयाल्लक्षणसमन्वयः। मुखमपरश्चंद्र इत्यत्र तु न चंद्राभेदो विषयः।
अपर इति भेदस्य विवक्षितत्वात्। अपि तु चंद्रकार्यकारित्वरूपं ताद्रूप्यमिति तत्रापि लक्षणसंगतिः। न च तस्य मु प०
खे सत्त्वात्कथमारोप इति वाच्यम्। चंद्रकार्यसजातीयकारित्वस्यैव मुखे सत्त्वात् इति। यद्यपि नामार्थयोरभेदान्व
यानुरोधादिहापि चंद्रपदलक्षितत्तत्कार्यकारिणो भेदसंसर्गेणैव मुखेऽन्वयादिभेदरूपकमेव तथाप्यु
पमानतावच्छेदकरूपेणाभेदमानएवाभेदरूपकत्वम्। तत्कार्यकारित्वादिरूपेण भेदमाने ताद्रूप्य

कार्य०

६

रूपकत्वमितितात्पर्यम्।अत्रकमलमनंमसिकमलेचकुवलयेतानिकल्पितिकायामित्यादौतिशयोक्तिवार
णायोपन्नेतिविषयविशेषणम्।आरोपस्यनिषेधानंगकत्वेनविशेषणीयः।तेनापह्नुतौनातिव्याप्तिः।आ
तिवारणायहृद्येति।त्वत्पादनखरत्नानांयदलक्तकमार्जनम्।इदंश्रीखंडलेपेनपांडुरीकरणंविधेरिति
निदर्शनावारणायविंवाविधिष्टेति।संशयोक्त्रेसयोर्निरासायनिश्चयोत्कृष्टमितिसंक्षेपः।आधिक्यत्यादि।आ
धिक्यमुपमानस्याभाविकीमवस्थामपेक्ष्योपमेयतादात्म्यवस्थायांवोध्यम्।एवंन्यूनत्वमपि।अनुभयं
आधिक्यन्यूनत्वोभयरहितम्।अभेदताद्रूप्यान्यतरमात्रम्।अयंहीत्यादि।अयंवर्त्तमानोराजा·येनहेतु
नापुरःनगर्याःशिवस्यापिपुरदग्धत्वात्स्मरणोवायमितिभावः।तार्त्तीयकमिति।तृतीयमेवतार्त्तीयकम्।तीयादी
केकुस्वार्थेवाच्यइतिवार्त्तिकात्।विलोचनेनविनेत्यन्वयः।शंभुरिति।अत्राप्ययमित्यनुषंजनीयम्।अन्यथाति
शयोक्त्यापत्त्यारूपकोदाहरणत्वासंगतेः।अयाराजभावावस्थायां।सममस्मात्लोचनतापा।एकरूपालोचनव
त्वाचा।मुखेंदुनेति।अत्रेंदुपदमिंदुकार्यकारिपरं।किमिंदुनेतिप्रसिद्धचंद्राद्वैविवक्षणात्।अतःअद्वताद्रूप्यरू
पकमिदं।नचोत्तरपदार्थप्राधान्यादिंदुकार्यकारिणिमुखाभेदमानान्मुखाभेदरूपकेस्यात्।नतुचंद्र
ताद्रूप्यरूपकमितिवाच्यम्।व्युत्पत्तिवैचित्र्येणमुखस्यस्वनिष्ठाभेदप्रतियोगित्वसंसर्गेणान्वयाभ्युपगमात्।
विशेषणानुयोगिकस्यापिविशेषणसंबंधतायाःस्वामित्वस्यपर्यवसायित्ववादिभिःप्राचीनैर्भेदसंबंधनमित्यादौ
वंगीकारात्।एवंचमुखनिष्ठाभेदप्रतियोगीचंद्रतत्कार्यकारीचेतिवोधान्नमुखाभेदरूपकापत्तिः।मुखप्रति
योगिकाभेदस्यमानादिति।एवमन्यत्राप्यूह्यम्।सुधेति।सुधासागरादुदिताउत्पन्नाप्रसिद्धालक्ष्मीः।इयंतु
नतथेतिन्यूनत्वोक्तिः।अतिरिच्यतइति।निष्कलंकतयाऽधिकोभवतीत्यर्थः।लक्षणश्लोकंव्याचष्टे।विषयु
पमानेत्यादि।विषयिणोऽभेदेनरूपेणचेतिपाठः।रूपेणाह्लादकत्वादिनाताद्रूप्येण।क्वचित्ताद्रूप्येणचेत्यपि
पाठः।परमार्थतस्तुप्रामाणिकपुस्तकेषुविषयिणोरूपेणविषयस्यरंजनमितियुक्ततरःपाठः।तेनतत्त्वे
त्यादेर्न्यूनतासमितिध्येयम्।हरिद्रादिनापटादिरंजनेप्रयुक्तस्यरंजनशब्दस्येहप्रवृत्तौवीजमाह।अन्यरू
पेणेति।रूपंरक्तपीतादि।अभेदताद्रूप्येचोक्तेतथान्यधर्मेणान्यस्यतद्वत्तासंपद्यतेनतुसाम्यादिहगौणारंजन
शब्दप्रयोगइतिभावः।तच्चेति।रंजनंचेत्यर्थः।प्रसिद्धेति।कविसंप्रदायप्रसिद्धोपमानाभेदेनलक्ष्यात्मकमि
त्यर्थः।ताद्रूप्याभयसाधारणत्वादितिभावः।अभेदेनरूपेणचेतिपाठेतु।तत्रैवतत्रचप्राप्तेऽहे
त्यर्थःरूपकपदस्याभेदताद्रूप्या

यथा मुखेन्दुः
मुखम् इत्यादौ
मुन्दुरथ त्रिधौ
गिकाऽभेदश्रा
लीचन्द्रपा
मुखं चन्द्र इत्या
दौ मुखे निष्ठाभे
दप्रतियोगी चन्द्र

मुखप्रतियो
गिकाभेदवच्च
न्द्रम्
चैत्रान्तयोगि
कस्वामित्व
प्रतियोगि
धनम्

५

२४ प्राति^

कुव॰ त्वयिकः। तेन पूर्वार्द्धस्यैव समर्थनमिति। नयोनरुक्रम। तावत् विधांतरोक्तेः प्राक् उद्देशक्रमल्लोम्येनेति। निर्द्देश
टी॰ क्रमवैपरीत्येनेत्यर्थः। एतदेव विशदयति। येनेत्यादि। विशेषणेनेति। हेतोः तृतीया पुरदग्धृत्वविशेषणे हेतु
२ कशिवाभेदानुरंजनादित्यर्थः। ननु न्यूनत्ववर्णने भेदापकर्षयोः प्रतीतेः कथं चमत्कारितेत्यत आह। अभेददा
र्ढ्योपादकत्वादिति। विशेषनिबंधस्य शेषाभ्यनुज्ञाफलकं तया निषिद्धातिरिक्तसकलगुणशालितापृतीतावेकदेश
७ विकृतमनन्यवदिति न्यायेनाभेदनिश्चयसंपादकत्वादित्यर्थः। विभावनोत। चंद्रज्योत्स्नेत्यादि। राजानं प्रति कस्यचि
दुक्तिः। हे भगवन्। चंद्रज्योत्स्नावद्विशदं पुलिनं यस्य तथाभूते ऽस्मिन् सरय्वाः अरयूनामकनद्याः सैकते सिकताम
यदेशे कयोश्चित् सिद्धतरुणयोः। चिरंतरं अप्रति चिरकालेवादरूपं द्यूतमभूत्। कीदृक् तदाह। एकः सिद्धयुवा कैटभदैत्य
विरोधं प्रथमं निहितं वक्ति वदति। अन्यः कंसं प्रथमं निहितं वक्ति। सः कंसकैटभयोर्निहंता तत्र तयोर्मध्ये पूर्वं को हतः तेन^
इति तत्त्वं कथयेत्यन्वयः। यद्यपि मुनिप्रभृतावेव भगवन्निति संबोधनमुचितम्। न राजादौ तथापि भगवतो दास्यवर्णनाद राज्ञो
नौचित्यं परिहरणीयम्। कचित्तु भवतेति पाठः। अत्र ज्योत्स्नापदेनैव चंद्रिकोत्लाभेपि चंद्रपदं शरदपूर्णचंद्रपरतया
नो पुष्टार्थम्। पुष्पमालेत्यत्र पुष्पपदमिवोत्कृष्टपुष्पपरतयेति बोध्यम्। वादयोग्यतासूचनाय युनोरित्युक्तम्। अ
यं हीत्युदाहरणे ऽभेदारोपहेतुभूतं पुरदाहकत्वरूपं साधर्म्यमुपात्तम्। इह तु जगद्रक्षकत्वादिकं ताद्रूप्यमानमिति
भेदः। वैधा इति। द्विधा। कौताधर्मिकत्वकनकधर्मिकत्वरूपविधाद्वययुक्तं अश्मं बलवदनिष्टानुबंधि सुखसा
धनत्वमुपमम्। सर्वेषामपि प्रमाणं वैधसानिमीण्ये विपुधान्यविवक्षयेत्यभिधानम्। अयमास्त इत्युदाहरणे पूं
भूसादृश्यं पंगम्यमानमिह त्वनासक्तिरूपं तदुपात्तमिति भेदः। त्वय्यंगत इति। राजानं प्रति कवेरुक्तिः। सेतुश्च भेद
प्रति हेतुः। भेद्यनं भेदः अमृतमथनम्। द्वीपांतरे शीत्वपिना सुतरामामस्मिन् द्वीपेनास्तीति सत्वतो। अयं राजभावावस्था
याम्। पुंमुर्विश्वमित्यत्र विश्वरक्षकत्वे साधर्म्यमुपात्तम्। इह तु नेति भेदः। किं पद्मस्येति। दयितं प्रति नायकोक्तिः।
तव वक्त्ररूपे इंदुकार्यकारिणि सति। अयमपरः प्रसिद्धः शीतांशुश्चंद्रः उज्जृंभते हृ उदितो भवति तस्मात्तव वक्त्रेंदुः
३ पद्मस्य रुचिं कांतिं किं न हरति। प्रयोजनमुद्दिश्य न मंदोपि प्रवर्त्तत इत्यायातः। प्रयोजनस्यान्यतः संभवे तदुज्जृंभणस्या
संगतेरिति किं न हरतीति काकाक्षिपि तु हरत्येवेति पर्यवसाने तदुज्जृंभणं व्यर्थमिति प्रतीति पर्यवसानम्। एवमग्रिम
यो^ वाक्ये ऽपि रुद्धो मकरः केतनं चिह्नं यस्य तथाभूतस्य समुद्रस्य च आलोकनमालोकः प्रकाशश्च तन्मात्रेण अभ्र
तेन दर्पाभिमानउज्जृंभणहेतुः स्यादिति अयुक्तमिति तत। यतः। इह वक्त्रेंदौ विंबाधरे तदप्यस्त्येवेति। समुचितपदा

वि॰

धाराहरेणयोज्यम्। यच्च गुणेस्यो न रवाक्यगतत्वेन तच्छ्रुष्टेपदत्वमत्वान्नतदनुसारेणैव न्यूनपदत्वदोषः। का
र्यकारित्वेत्यनेनाभेदव्यावृत्तिः। अस्यामुखेंदुनेत्यत्र किमिंदुनेति पुनरुपादानमात्रे भेदविवक्षाज्ञापकं इहत्वपरस्
स्यास्युपादानमिति शेषः। अचतुर्वदन इति। बादरायणो व्यासः। भालेलोचनमस्येति व्यधिकरणत्वेपि गमकत्वा
द्बहुव्रीहिः। ननु हरावपर इति विशेषणान्न देशे एव तादृग्रूपकं स्यात् इतरांशेत्वभेदरूपकमेवेत्याशंक्याह। अत्रे
ति। त्रिष्वपीति। एकत्रानेकारोपरूपायां रूपकमालायामेवैरूप्यायत्तात्पर्यं ग्रीष्मे केस्यैकत्रस्थितस्यापि साधारण्यमेवो
चितमिति भावः। अयमेव साध्वीत्यादिपूर्वोदाहरणाद्विशेषः। न्यूनरूपकस्य चमत्कारित्वं पूर्वमुक्तम्। रञ्जु संमत्साद्
रुयति। इदमिति। यद्यपि हेत्वनंतरं सइति शेषः। एकगुणहानौ अभिहितायामिति शेषः। गुणसाम्यदार्ढ्यं शेषगुणप्रयु
क्तसाम्यायोगव्यवच्छेदः। चतुर्वदनत्वाद्येकगुणव्यतिरेकस्य प्रमाणांतरसिद्धस्य पुनर्वचनं शेषगुणभावपरिसंख्या
प्र ५ र्थापयतीति भावः। अत्र च रूपकभेदत्वेनैव चमत्कारोपपत्तौ नालंकारांतरत्वं न्यूनत्ववर्णनस्य युक्तम्। समग्र
कालीनकार्याभावस्य लत्तेकाशांतराः संभिन्नस्य तद्वस्माले युक्तमित्यसरो समतमित्यनेन सूचितः। किमस्तु भिरिति। जेऽ
ति मूर्धवजलमयसाधारणं चंद्रसंबोधनं। अन्यपि तेने होरसुभिर्निमित्त भूतैर्भीमस्तु तायादमयेत्यामनः मयि निमज्ज
नु विलीयतामिति मन्त्रसे किमिति सोपहासकाकुः। तेन मैवं मस्या इत्यर्थः। अत्र हेतुमाह। किलनिश्चितं मम विबुधः
पंडितः स्मरः। तदर्पितांसः प्राणनिर्गमकालीन मनःप्रवेशश्रुत्वी यस्यास्तां श्रुतिनलमुखेंदुपरो मनःप्रवेशाधि
करणत्वेन न नलमुखचंद्रतात्पर्यवतीमाहेति। अयेकत्वे किं न अश्रद्धादिस्तु दाहरणे न्यूनत्वप्रयुक्तं शांतमाधिकं। इह तु
वि १५ गुणविशेषप्रयुक्तं गम्यमाने तदिति शेषः। सावयवत्वनिरवयवत्वादीति। आदिना समस्तवस्तुविषयत्वादि रूपैत
स्मभेदानां परंपरितत्वरूपभेदांतरस्य च परिग्रहः। तथाहि। सावयवे निरवयवे परंपरिते चेति त्रिविधं रूप
कं प्रत्येकं क्रमेण द्विविधं। समस्तवस्तुविषयम्। एकदेशविवर्ति च। केवलं मालाच। श्लिष्टवाचकं अश्लिष्टवाच
श्लिष्टकेव कं चेति। श्लिष्टाश्लिष्टभेदयोः केवलमालारूपत्वाभ्यां मत्स्य चतुर्विधमित्यष्टौ भेदाः॥ तत्र ज्योत्स्नाभस्मच्छुरणध परंपरितं
लमालात्व वला बिभ्रती तारकास्थीन्यंतर्धानव्यसनरसिका रात्रि कापालिकीयम्। द्वीपाद्द्वीपं भ्रमति दधती चंद्रमु
पंच प्रवृ द्राकपाले न्यस्तं सिद्धांजनपरिमलं लांछनस्य छलेनेति पद्ये रात्रौ कापालिकीत्वारोपस्य प्रधानतयाऽवयवि
ष्टमपि द्विधा: नोऽवयवरूपाणि ज्योत्स्ना भस्मेत्यादिरूपकाणीति सावयवत्वम्। समस्तस्य वस्तुन आरोप्यमाणस्य शब्दविषय

कुव॰
टी॰
८

४ स॰

तैव द्रष्टव्यम्। प्रौढमौक्तिकस्य यथा मुचांविदद्भः कुटजपुष्पवैधवः विधुतान्नमस्तिनाद्यमंडलेकुर्वत्तिस्मकुसुमोज
ज्ज्वलिश्रियमित्यत्र प्राधान्येन नभस्तिनाद्यमंडलत्वारोपस्यावयवभूतं विधुतान्नर्तीकीलत्वारोपणमार्थेन शेष्टमित्येक
देशविशेषाद्भूतयावर्त्तनादेकदेशविवर्त्तित्वम्। कुरंगीवांगानि स्तिमितयति गीतध्वनिषु यत्सखीं कांतो
दंतं मुतमपि पुनः प्रस्नपयतियत्। अनिद्रं यच्चांतः स्वपिति तदहो वेद्म्यभिनवां प्रवृत्तोस्याः सेक्तुं हृदि मनसिजः प्रेम
लतिकामित्यत्र प्रेमलतिकामिति वल्लीरूपं वपवम्। सोंदर्य्येतरंगिणीतरुणिमोत्कर्षसहर्षोद्गमः कांतः कामेण
कर्मनर्मरहस्यमुल्लासनावासभूः। विद्यावक्रगिरां विधेरनवधिप्रावीण्यसाक्षात्क्रिया प्राणाः पंचशिलीमुखस्य ल
ललनाचूडामणिः सा प्रियेत्यत्र च मालारूपं निरवयवं बोध्यम्। एवं लौकिकमहालोकप्रकाशितजगत्त्रयः। स्तूय
ते देव सद्वंशमुक्ताहारकेनकैर्भवानित्यत्र वेणुकुलयोः श्लिष्टेन वंशपदेन कुलेवेणुत्वारोपपूर्वक एव राज्ञि मुक्ताहार
त्वारोप इति श्लिष्टवाचकं केवलपरंपरितं रूपकम्। विद्वन्मानससंपादावतदेवमालारूपम्। चतुर्दशलोकव
ल्लिकंद इत्यत्राश्लिष्टवाचकं केवलपरंपरितम्। पर्यंको राजलक्ष्म्या इत्यादावालानं जयकुंजरस्य सोपादे चाश्लिष्ट
वाचकं मालापरंपरितं च द्रष्टव्यम्। विस्तरभयान्नेह प्रपंच्यते। इत्यलंकारचंद्रिकायां रूपकप्रकरणम्। परिण
मं लक्षयति। परिणाम इति। विषयनिष्ठायाः प्रकृतकार्योपयोगिताया अवच्छेदिका विषयात्मना परिणतिः
परिणामः। सा च विषयतादात्म्याध्यवसायविषयविषयितास्येवं च विषयाभेदसंसर्गविषयिणैव तदंगभिन्ने
नान्वेनेति स्वारसिक एव बोधः। ननु रूपक इव दृढ्रूपा भेदप्रतियोगिनान्वेनेति स्वारसिक एव बोधः। ननु रूपक
इव दृढ्रूपा भेदप्रतियोगिनान्वेनेत्यनुयोगित्वमुखइति रूपकादेव बोध्यः। असमासेप्युदाहरति। तीर्त्वेति मु
रारिनाटकगतमेतत्पद्यं। आत्मना तृतीयः सीतालक्ष्मणसहित इति यावत्। असौ प्रक्रांतो रामः। भूतेशस्य श्री
मौलिमालारूपाममरनदीं गंगां तीर्त्वा तस्मिनाविकाय गुहाय निषादपतये सौमित्रे लक्ष्मणस्य मैत्रीरूपमा
तरणमूल्यमुपकल्पितवान्। उपकाररूपतया। अथानेन तरं चित्रकूटं प्रतस्थप्रस्थितवान्। कीदृशः व्यामेन तिर्य
क्प्रसारितभुजद्वयांतरालेन ग्राह्यौ स्तनौ तावत्परिणाहौ यासां तथाभूताभिः शबराणां भल्लानां युवतिभिः।
कौतुकेनादंचतिकसंततिश्रद्धीण यत्र क्रियायां तथा दृष्टात् त्क्लेप्रात्। अत एव दृष्णमन्वीयमानोऽनुगम्य

८

मानइत्यर्थः। इति परिणामप्रकरणम्। अथोल्लेखालंकारं लक्षयति। बहुभिरिति। एकस्य बहुधोल्लेखादि
त्यन्वयः। उल्लेखनं उल्लेखो विषयीकरणं। हेतौ पंचमी। तथा चैवं विधोल्लेखाद्धेतो रुल्लेख इत्यस्या उल्लेख इति
मवक्रियते। व्यवहारे प्रति लक्षणस्य प्रयोजकत्वात्। स्त्रीभिरिति। स्वर्दुः स्वर्गसंबंधि द्रुमः। कल्पतरुः। कालोय
मः स प्रकृतो राजा। स्त्रोकं व्याचष्टे। यत्रेति। नाना विधेति। सौंदर्य दातृत्व शूरत्वादि रूपेत्यर्थः। तत्र द्रुमेति। रुच्य
त्वित्व भयादिरूपेत्यर्थः। एतच्च स्वरूपकथनेन तु लक्षणं तगतम्। ननु गृहीतृभ्यानिमित्तहृदयवशान्नाकारह
ये नोल्लेखेऽव्याप्तिरत आह। अनेकेनेत्यादि। तथा च लक्षणे बहुपदमनेकपरमिति भावः। एवं गृहीतृ विषयाद्य
न्यतमानेकत्वप्रयुक्तमेकस्योल्लिख्यमानानेकप्रकारत्वमुल्लेख इति लक्षणं बोध्यम्। सौंदर्यस्य तरंगिणीत्यादिमा
लारूपकवारणाय विशेषणं। तत्र गृहीतृभेदयुक्ते नानेकप्रकारत्वमिति नातिव्याप्तिः। बहुधा सारोल्लेखप्रभेद
साधारणाय न्यतमत्वप्रवेशः। नहि वचनेतदव्याख्यानावसरे करिष्यामः। अन्यतमानेकत्वप्रयुक्तं एकस्योल्लिख्यमा
नत्वमिति तावदुक्तौ विद्याविक्रमसौंदर्यतपसां निधिमागतम्। पश्यंति विबुधाः स्रसाः स्त्रियो ब्रह्मा श्रुकौतुकादित्यत्राति
रतेऽनेकप्रकारत्वमित्युक्तम्। न चोल्लिख्यमानप्रकारत्वमित्येवास्तु। उक्तोदाहरणे प्रकारस्य कस्याप्यनुल्लेखादेवान
तृ५ ति प्रसंगादिति वाच्यम्। एवमपि। मत्स्येंत्व ह्वाजिराजि पुरखरखुरपुट प्रोद्धूते धूलिजाते सालोकालोकभूमीधरमतुल
निरालोकभावप्रयाते विभ्रांतकामयंते रजनिरिति धिया भूतले सर्वलोकाः। काकाः क्रंदंति घूकानलविकलतया किं
चिनंदंत्युलूका इत्यत्र धूलिजालरूपस्यैकस्य वस्तुनोऽनेकैर्लोककाकोलूकैर्गृहीतृभिरेकेनैव रजनीत्वेन प्रका
रेणोल्लेखनादतिव्याप्तेर्वारणाय प्रकारेऽनेकत्वोपादानस्यावश्यकत्वात्। सेजानेर्मंजरीति स्तनकलशयुगं चैवि
तं चंचरीके स्तत्रासो ह्वासलीलाः किसलयमनसा पाणयः कीरदृष्टाः। तल्लोपायालपत्याः पिकनिनदधिया ता
डिताः कोकिलाकेरित्य चोल्लेद्रुसिंहलद्वरिमृगदृशां नाप्यरत्न्यं शरण्यमित्यनेकगतभ्रांतिपरायामतिप्रसंगवारण
यमेकस्येत्युक्तमिति संक्षेपः। यथा हमिति। स्त्रीभिः कामत्वोल्लिखेतासां रुचिरनुरागः प्रयोजकः। अर्थिभिः कल्पतरुत्वो
ल्लेखे तेषां लिप्सा प्रयोजिका। शत्रुभिर्यमत्वोल्लेखे तेषां भयं प्रयोजकमित्येवं यथायोग्यमित्यर्थः। उदाहरणांतरमाहाय
थावेति। श्रीकृष्णस्य मथुराप्रवेशवर्णनेयं। गोपैरिः। श्रीकृष्णः वृद्धाभिर्गजत्रातेति दृष्टइत्याद्यन्वयः। सकौतुकं सोत्कंठ
मिति दर्शनक्रियाविशेषणं सर्वत्र बध्यते। स्त्रोकं व्याचष्टे। यइति। तथा महाग्राहग्रहणेन युवतिसमूहे। पूर्व

कुव॰ टी॰ ए ९

मिति। उदाहृतइतिशेषः। उल्लेखइत्यनुवर्तते। आरोपरूपकसंकीर्णइतिपाठे॰। आरोपस्वरूपकेतत्संकीर्णइत्य
र्थः। आरोपरूपकेतिपाठस्यार्थः। उल्लेखप्रभेदांतरमाह। एकेनेति। व्याचष्टे। गृहीत्रिति। विषयभेदादित्यनंतर
मेकस्येतिशेषः। विषयपदमाश्रयसंबंधिनोरुपलक्षणं। अतएवलक्षणेगृहीतृविषयादीत्यादिपदेनतत्संग्रहः
कृतः। तत्रविषयसप्तमीनिर्दिष्टोविषयउच्यते। अधिकरणसप्तमीनिर्दिष्टस्त्वाश्रयः। षष्ठ्यादिनिर्दिष्टःसंबंधीतिवि
वेकः। गुरुरित्यस्यार्थकथनं। महानिति। गुरुर्महतिवाच्यवदितिविश्वः। पटुरितितत्पर्यवसितार्थकथनं। पटुर्दक्षः।
इत्यादौत्यादिनाकीर्त्तिविषयोऽर्जुनोधवलइतिवदर्थांतरस्यधनुर्विषयेभीष्मोभीषणइतिवत्गांगेयइत्यर्थांतरस्यच
संग्रहः। भीष्मस्तुभीषणेरुद्रेगांगेयेचनिशाचरेइतिविश्वः। क्रोडीकरणात्। एकवृंतगतफलद्वयन्यायेनसंग्रह
णात्। अरुणमिति। कपालिनोहरस्यभागधेयंभागं तत्त्वेनाध्यवसितंपार्वतीस्वरूपं चित्तेऽस्माविरस्तुप्रकटीभव
त्वितिसंबंधः। किंभूतंकुचयोः कुचविषयेऽरुणंस्थूलं। एवमग्रेपि। विलग्नमध्यः। विलग्नोमध्यलग्नयोरितिवि
श्वः। विपुलंआयतं। अधरेअधरोष्ठेअरुणंमारकं। अरुणाधरमितिपाठस्तुप्रक्रमभंगादप्रयुक्तः। चित्तेइतिकरुणा
शालीत्यत्रापिमध्यमणिन्यायेनसंबध्यते। एवंतद्धारास्तापस्त्वाप्ततामसेषुचतापिनः। दृगंतासांद्रकाः सं मो
भूयास्तुभूतयेममेत्यादावधिकरणानेकत्वप्रयुक्तः। यमः प्रतिमहीभृतांकुलवहोसितत्वेभृतांसखाखलुयुधि
ष्ठिरोधनपतिर्धनाकांक्षिणात्। गृहंधारणमिष्टतोकुलिशकोटिभिर्निर्मितंत्वमेकइहभूतलेबहुविधोविधात्रा
कृतइत्यादौसंबंधभेदप्रयुक्तोल्लेखोद्रष्टव्यइतिदिक्। इत्यलंकारचंद्रिकायामुल्लेखप्रकरणम्। अथज्ञान
प्राधान्यसाम्यात्स्मरणादीनालंकारान्लक्षयति। स्यादिति। स्मृतिभ्रांतिसंदेहैर्व्यवहृतैस्तथाहेतुभूतैस्तदंकम्।
तेषामेकस्तदंकः। तदंकोविद्यतेऽस्मिन्नतथाभूतांमत्वर्थीयात्प्रत्ययात्। अंकश्चिह्नसंज्ञेतियावत्। तेनतत्संज्ञा
संज्ञितमित्यर्थः। अलंकृतित्रयंव्यवहारविषयःस्यादितियोजना। एवंचस्मृतित्वभ्रांतित्वसंदेहत्वादीनित्री
णिलक्षणानि। तत्रस्मृतित्वंतावत्। स्मरामीत्यनुभवसाक्षिकोजातिविशेषः। भ्रांतित्वविशेष्यावृत्तिप्रकार
कज्ञानत्वं। संदेहत्वंतुनिश्चयभिन्नत्वेसतिसंभावनाभिन्नत्वपारिभाषिकं। स्मृतिभ्रांत्यादिवारणायसत्यंतम्।
उत्प्रेक्षावारणायसंभावनाभिन्नेति॥ चमत्कारित्वेपुनरखिलालंकारसाधारणंलक्षणत्रयेपिनिवेशनीय
मतोनसघटइतिस्मृताविदंरजतमिति। भ्रांतावयंस्थाणुःपुरुषोवेतिसंशयेऽस्मिन्नातिप्रसंगइतिध्येयम्॥ ६

गाहतेति। आकलयति स्मरतीति यावत्। सादृश्यानिबध्यमानैरिति चमत्कारित्वोपपादकम्। न त्वेत
स्यापि स्वातंत्र्येण लक्षणे प्रवेशः सादृश्यमूलकानामपि स्मरणादीनां चमत्कारित्वेऽलंकारतया अनिर्वार्यत्वात्
चमत्कारितैकजीवातुत्वात्तस्य। अत्र चमत्कारित्वं तु तेनैव वारणमिति व्यर्थं सादृश्यहेतुकत्वविशेषणम्।
न चैतदेवोपादीयतां न तु चमत्कारित्वविशेषणमिति वाच्यम्। उदाहृतेषु सादृश्यमूलकस्मरणादिषु तत्प्र
संगवारणार्थं। तस्यावश्यकत्वादिति संक्षेपः। दिव्यानामिति। माघे जलक्रीडावर्णनप्रस्तावे पद्यमिदम्। शौ
रिः श्रीवक्षाः। अंभस्तः जलात्। उत्तरंतीं निर्गच्छंतीं श्रियमिव स्त्रीं। इति स्मृतिभ्रांतिसंदेहप्रकरणम्। अप
ह्नुतिः॥ तत्र तावद्भेदप्रतिपत्तिनिरूपितांगित्वान्यतरवत्त्वनिषेधोपह्नुतिरित्यपह्नुतिसामान्यलक्षणम्। नि धो॥
षेधश्च नञादिसत्त्वे वाच्यः। केचित्तु तदभावात् कैतवादिपदैः परमतत्वोपन्यासादिभिश्च व्यंग्यः। तस्याः क्वचिद्भेद
प्रतिपत्तिसमानाधिकरणः क्वचित्तु तदधिकरण इति विवेकः। एवमभेदः क्वचिदारोप्यमाणः क्वचित्तु स्वाभाविक
एव। तत्प्रतिपत्तिरपि क्वचिद्व्यंजनया प्रायशस्तु वाच्यवृत्त्येति बोध्यम्। निषेधोपह्नुतिरित्येतावदुक्तौ। न द्यूतमेतत्कि
तव क्रीडनेन निशितैः शरैरिति प्रसिद्धनिषेधानुवादरूपे प्रतिषेधालंकारेऽतिव्याप्तिरतोऽभेदप्रतिपत्तिनिरूपित
त्वादिविशेषणमुपात्तं तत्र हि वृद्धप्रवृत्ते कितवप्रतियुद्धद्यूतत्वाभावो निशितैः शरैर्[illegible]क्रीडमानो द्यूत एव तव
प्रागल्भ्यं न तु युद्धं तत्तूपहासार्थं न तु युद्धेऽभेदप्रतिपत्तिप्रसंगः। तस्यास्तदुपन्यासं विनापि सिद्धत्वात्। नाप्यंगीभूततत्प्रति
तत्वेन तदुपायानपेक्षणादिति तद्वारणायाभेदप्रतिपत्तिनिरूपितांगित्वमात्रोक्तौ शुद्धापह्नुतिहेत्वपह्नुतिपर्यस्ता [illegible]॥
पह्नुतिकैतवापह्नुतिष्वतिव्याप्तिः। तत्र सर्वत्र नायं सुधांशुरित्यादिनिषेधस्याभ्यामगंगासरोरुहायभेदप्रतिपत्त्य
र्थत्वेन तदंगतयांगित्वाभावात्। अभेदप्रतिपत्तिनिरूपितांगत्वमात्रोक्तौ भ्रांतापह्नुतिच्छेकापह्नुत्योरव्या
प्तिः। तयोर्भ्रांतिशंकानिवारणरूपनिषेधस्य प्राधान्येनाभेदप्रतिप्रसंगत्वाभावात्। अतः स्वदन्यतरवत्त्वनिवेशः। तदा
ह॥ साम्यादपह्नवो यत्र सा विज्ञेया त्वपह्नुतिः। अपह्नवः यस्य सादृश्यं यस्मिन्नेवाप्यपह्नुतिरिति सर्वं चैतदुदाहरणव्याख्या
वो॥ नावसरे स्फुटीभविष्यति। एवं सामान्यलक्षणं मनसि निधाय शुद्धापह्नुत्यादीनां तद्भेदानां क्रमेणोपक्रमते। शुद्धापह्नुतिरि
ति लक्षणं व्याचष्टे। वर्ण्ये[illegible] इति कविमतेर्विकासः। स्फूर्त्तिशालितेति। तथा चोपमेये उपमानारोपकल्पक उपमेयध
[illegible]नाविषयत्वनिषेधः शुद्धापह्नुतिरिति लक्षणमिति भावः। अत्र चानुक्तनिमित्तत्वे कैतवादिपदाव्यंग्यत्वे च निषेध

कुव.
टी.
१०

विशिष्टत्वेनोपमानेन न हि त्वत्पदुतो केवलापह्नुतो च नातिप्रसंगः कोतः किं न हि नूपुर इति छेकापह्नुतावुपमेयधर्मस्य कांत
त्वस्य विवक्षितत्वादिति प्रसंगनिवारणाय यदं विशेषणं तत्र हि न कांतत्वनिषेधो नूपुरारोपार्थो यत्तु नूपुरारोपएव शंकि
तकांतत्वनिषेधार्थ इति तद्व्यावृत्तिः ॥ पर्यस्तापह्नुतिवारणायोपमेयधर्मस्येत्युक्तौ तत्रोपमानधर्मस्यैव वस्तुधर्मत्वादेर्नि
षेध इति नातिव्याप्तिरिति सर्वं सुस्थं पुंडरीकेति पुंडरीकं सितांभोजमित्यमरः ॥ एवं च सरोरुहपदं विशेष्यपरमिति भा
वः ॥ अंकमिति ॥ इंदोः दलितस्य स्फुटितस्येंद्रनीलमणेः शकलवत् खंडवत् मेयत्त दरीदृश्यते त ल्के पिकवयः ॥ अंकं कलंकं
शंकिरे पोकितवंतः ॥ परे ऽन्ये जलनिधेः पंकमेनिरेकं इति चित्तुनः ॥ सारंगं सं जगदिरे पसस्पर मबुवन् ॥ कर्त्तरि कर्म
व्यतिहार इति तदपरे इतरे अस्तुवः ॥ अन्ये छाया मा छायायेति छन्न ॥ विभाषासेनासुराछायेत्यादिना क्लीबत्वम् ॥ वयं तु
सांद्रे घने निशि रात्रौ पीतं अतएव कुक्षिस्थं अंधतमसे गाढध्वांतमाचक्ष्महे ब्रूमहे इत्यन्वयः ॥ ऊलेखिकः उत्प्रे
क्षामात्रविषयाः कलंकादयः ॥ अपि तु नास्वाभाविकस्यमच्छायात्वस्य समुच्चयः ॥ अर्थसिद्ध इति नायं वस्तुधर्मत्व
त्वनेति ॥ शाब्दोपानत्वाच्चेद्द्वः ॥ इह तु परमतत्वोल्कीर्तनेन स्वाभिमतत्वसूचनाद र्थगम्य इत्यर्थः ॥ एकत्रानेकापह्नु
वरूपतया पत्रवैचित्र्यं वाध्याहेत्वपह्नुतिमाह ॥ सएवेति ॥ शुद्धापह्नुवएवेत्यर्थः ॥ युक्तिपूर्व इति योज्यते साधर्म्यं
नेति युक्तिर्हेतुः ॥ तत्पूर्वस्तत्सहित इत्यर्थः ॥ तथा शुद्धापह्नुवलक्षणएव उक्तनिमित्तरूपस्य स्थाने उक्तनिमित्त इत्युक्तौ
हेत्वपह्नुतिलक्षणं संपद्यते इति भावः ॥ नेंदुरित्यादि विरहाकुलोक्तिः ॥ तीव्रोदारूणायतः अतो नेंदुः निशि रात्रौ
सत्वान्नार्कः उर्वस्तु वडवानल इत्यमरः ॥ नेशित्वेति ॥ निशभवो नैशस्तत्वमित्यर्थः ॥ अत्रापि चंद्रत्वं स्वाजिको धर्मः
सूर्यत्वेत्वौत्त्पत्तिकमिति वा ध्यम् ॥ मंथानेति ॥ मंथानो मंथनदंडः स चासौ अमरसिधरः पर्वतो मंदरस्तस्य मूलभा
गे यच्छिलासहस्रं तेन संघनाद्यो व्रणस्तस्य किणश्चिह्नमिंदुमध्येस्पुरति प्रकाशिते ॥ छायाभूमेः मृगो हरिणः
शशांकः शश इत्येषामतिपामराणामूर्खवर्तमानोमुक्तिः ॥ क्रियस्मात्त्वेषां छायादीनां तमइंदुमध्यभागे कथं चिद
पि केनापि प्रकारेण प्रसक्तिर्नास्तीत्यन्वयः ॥ वैशाखं मंथनं मंथा मंथानो मंथदंडुकेत्यमरः ॥ नास्तीति ॥ इति हेतो
रित्यर्थः ॥ पर्यस्तापह्नुतिमाह ॥ अन्यत्रेति ॥ सः अपह्नुवः ॥ तथा च तदारोपार्थस्तस्यापह्नुव इति लक्षणं निषेधस्य
चतस्याधिकरणे प्रतियोग्यारोपार्थत्व [illegible] संभवो न चास्याधिकरणे स्वारोप इत्यर्थो सिद्धये वारोपस्यान्या
धिकरणत्वमन्यत्रेत्यनेनोक्तं ॥ अतएव पर्यस्तापह्नुतिरित्युच्यते तेते पर्यस्तारोपविपरीतस्यारोपस्याधिकरणेति १०

[illegible]

तदर्थीत। नच चंद्रे चंद्रत्वनिषेधस्य कथमुखे तद्रूपारोपार्थत्वमिति वाच्यम्। आरोपदार्ढ्यसंपादकत्वेन
निषेधस्य तदर्थताया अनुभवसिद्धत्वात्। अत एव जटारोपरूपकमेवेदं नापह्नुतिरिति प्राचां सिद्धांतस्तदनु
सारेणैव च चित्रमीमांसायां प्रकृतस्य निषेधेन तद्रूपत्वप्रकल्पनमित्यपह्नुतिलक्षणमुक्तं। इह त्वलंकाररत्ना
२४ करोनुसारेणायं प्रभेद उपदर्शित सामान्यलक्षणाभिप्रायेणापह्नुतित्वेनोक्त इति निरवद्यम्। हालाहलेति।
हालाहलो विषं नैव भवति किंतु रमाललनाविबंजनाः पुरं केवलं अत्रास्मिन्विषये व्यत्यये वैपरीत्यं मन्वते अभ्युप
गच्छेति· कुतस्तत्राह। यस्मात् शिवस्तं हालाहलं निपीय सुखेन जागर्ति हरिस्तु इमां रमां स्पृशन्नस्त्रि द्रयामुसति।
स्मरन्निति पाठे स्मरन्नपि मुह्यति किमु स्पृशन्नित्यर्थः। तथा च रमाया विषरूपत्वे मोहजनकत्वं हेतुः। हालाहलस्य त
त्वापह्नवे च जागरस्य प्रयोजकत्वमिति बोध्यं। हालाहलो विष इति विग्रहः। अत्र स्पृशन्मुह्यतीति कार्यकारणयोः
पौर्वापर्यविपर्ययरूपातिशयोक्तिरलंकारः सहेतूक्तिः। तन्नेति हेतूक्ति तदनुक्ति रूपभेदादित्यर्थः। पूर्वापह्नुतिव
त्। शुद्धापह्नुतिवत्। द्वैविध्यं। शुद्धस्त्वापह्नुतिर्हेतुपर्यस्तापह्नुतिरिति द्विप्रकारत्वे। भ्रांतापह्नुतिरिति। अस्य प्रकृतस्य
भ्रांतिवारणं वार्यतेनेनेति वारणं तथा च भ्रांतिवारके तत्त्वाख्याने सतीत्यर्थः। भ्रांत्यपह्नुतिरित्यर्थः। एवं चैतत्त्वकथन
हेतुकभ्रांतिविषयनिषेधो भ्रांतापह्नुतिलक्षणं बोध्यम्। तस्य तापकारित्वरूपस्मरवृत्तांतस्य। नागरिकेति। नगरेभ
वो नागरिकस्तं ग्रामीणस्य प्रश्नः। सन्निधिकांश्वतरम्भः उचतिरुन्नता यस्यैवंभूत उभयतो मुखएव भागयोः पुच्छे
यस्यैवं भूतस्त्र कोयं महिष इति। नहि नहीत्युत्तरं महिषस्य नु बध्यते। अयं करिकलभः करिशावकः। कलभः
करिशावक इति कोशात् कलभ इत्येतावतैव सिद्धे करिपदमुत्कर्षेण करिबोधार्थः। अयमस्य शुंडदंडो न तु पु
च्छमिति पुच्छ इति पाठोप्यदूषितो दित्वात्साधुरेव अप्रयुक्तत्वं तु तत्र परं विचार्यमिति पूर्वोदाहरणे संदेहरूपभ्रांति
विषया। ज्वरत्वापह्नवः। ज्वरः किमिति प्रश्नेन तद्विषयसंदेहावगमात्। इह तु महिषत्वं निश्चयरूपभ्रांतिवि
षयस्व महिषत्वस्यैति· ततो भेदः। जटेति। विरहिण्या इयमुक्तिः। हे कुसुमशरपुरारातेः [illegible] रस्य भ्रांत्या मां किं
कुतः प्रहरसि ताडयसि इयता नेयं जटा किंतु वेणीकृता। अवेणी वेणी संपद्यते तथा कृतः कचानां कलापः तथा

कु॰व॰ टी॰ ११ गल्लेगरलं नैतत्। किंतु इयं कस्तूरी। एवं शिरसि नैषा शशिलेखा किंतु कुसुमं तथा इयमंगे भूतिर्भस्म न भवति
परं तु प्रियाविरहाज्जन्म यस्य एवं भूता धवलिमा पाण्डिमेति। अत्र वर्ज्यो बहुव्रीहिर्व्यधिकरणे जन्माद्युत्तरपद इति वा
मन सूत्राद्यधिकरणे विवहुव्रीहिर्न दुष्टः। कल्पितेति कुसुमशरे उत्प्रेक्षितेत्यर्थः। निषेधमात्रोन्नेयेति। निषेधस्य
प्रसक्तिपूर्वत्वादिति भावः। मेने इत्यस्वरसोद्भावनं। तद्वीजं तु उपमाबोधकस्याभावादेरसत्वेपि तद्रूपगमे रूपकस्य
उपमात्वस्यादिति स्पष्टमेव। छेकापह्नुतिरिति। छेको द्विविधस्तत्कृता अपह्नुतिरिं लक्षणानिर्दिशः। वाक्यान्यथायो तिप
जनहेतुकः। शंकित तात्विकवस्तुनिषेध इति तल्लक्षणम्। अन्यस्पर्शो कांतः इत्यन्यशंकाया निवर्तनीयत्वेन हे
तुतया व्यपदेशः। संतापात्। स्नातीति वत्। अत्र च शुद्धापह्नुतिवारणायाद्यं विशेषणं। मम किल श्रुतिमाहात
दर्थिकामित्यधिकता द्रूप रूपकवारणाय शंकितेति। न चानेनैव शुद्धापह्नुतिवारणे द्वावीत्यादि व्यर्थमिति वाच
म्। कस्य वा न भवेद्दोषः प्रियायाः सव्रणे धरे सभृंगं पद्ममाघ्रासी वीरिता पि मया धुनेति व्याजोक्तौ वक्तिप्रसंगवारक
त्वेन तत्सार्थक्यात्। यदृच्छयेति छेकापह्नुतेरस्याश्चायं विशेषो यत्तस्यां वचनस्यान्यथा नयनेनापह्नवः। अस्यामा
कारस्य हेत्वंतरवर्णनेन गोपनमिति। तथ्य निह्नव इति तात्विक निषेध इत्यर्थः। नूपुरो मंजीरः मंजीरो नूपुरोस्त्रियां
इत्यमरः। नर्मसखी क्रीडासखी अत्र कांतपरायाः प्रजल्पनमत्यदेल मन इत्युक्ते नूपुरतात्पर्यकत्ववर्णनेन कांत
त्वापह्नवो मुख्यः नूपुराभेदप्रतिपत्तिस्तु तदंगमिति वा। सीत्कारमिति। सीत्कारं तदनुकारि मुखध्वनिं शिक्षयति अध
रोष्ठं व्रणयति व्रणे स्यास्तीति व्रणी तं करोतीत्यर्थे तत्करोतीति णिच्। तथा च रोमांचं तनोति विस्तारयति। इति वाक्यत्रयं
नागरिकाभिप्रायेण प्रियसखीं प्रति कथयाश्चक्रम्। तदाकर्ण्य नागरिकः किमिति तद्वृत्ति शंकितवतीमन्यां प्रति तच्छंकानि
वर्तयिन्नदीत्यादिना हेमंतिकपवनपरत्ववर्णनेन तात्विकस्य नागरिकस्यापह्नवः सीत्कारशिक्षादिकर्तृत्वस्य नागरिक
इव पवनेपि सत्वात्। तदाह। अर्थयोजनयेति। विवक्षितसाधारणस्यार्थस्य विवक्षितार्थसंबंधित्ववर्णनयेत्यर्थः।
इदमित्युदाहरणमिति च ज्ञात्वभिप्रायेणैकवचनं हेमंतशब्दात्तत्रभव इत्यर्थे सर्वत्राण् तल्लोपश्चेत्यणि तल्लोपे च हैमन
इति रूपसिद्धिः। प्रजल्पन्नित्युदाहरणे। एकस्य वाक्यस्यान्यथा योजनमिह त्वनेकेषामिति भेदः। प्राग्योजनयेति। अर्थभेदे
पि श्लेषमार्गेणेत्यर्थः। पक्षे इति। क्रीडाया विरोमोक्षौ हे घनो वा युवामान्यान्तरहस्त्विति संबंधः। कीदृशः इति उत्स्वप्न
वचः स्वप्ने उद्गतं वचनं यस्य कघस्य अनुमाथ्यमत्र तु घराधया निर्भर्त्सितः सन्। तद्वचनं तत्परमेव राधापरमेव

व्यपदिशन् । कथयन् । इति किं हे पद्मे रमे त्वन्नयनेन सततं स्मरामि · नीले भवत्याः कुंतले केशपाशे मम भावो ऽतः कार
णवृत्तिं रूपः मुसति मां हे पद्मे प्राप्नोति । ननु चिंता संगो निवर्तितात्राह · किं करोमि अकिंचित्करो ऽस्मि यतस्ते तव हितैः पूर्वै
र्विभ्रमैर्विलासैः क्रीतो ऽस्मि मूल्येन गृहीतो ऽस्मीति । किं करोमीति पाठो युक्ततरः । तत्र चास्मीति · अहमर्थमव्ययम् ।
अहं किं करो दासः । क्रीतो ऽस्मीत्यर्थः · राधापरत्वे तु हे राधे इत्यपि तत्संबोधनम् । पद्मरूपे त्वन्नयने स्मरामीति विशेषः ।
शेषं पूर्ववत् । अत्र रामायां बोधकस्तन्नयनस्मरणरूपो न भेवाकार्यापि तु त्वत्संबोधकः पद्मरूपत्वन्नयनस्मरणरूप
इत्यपह्नवस्तत्र रमेवतद्व्यपदिशत्वित्यनेन प्रकाश्यते न चात्रार्थस्य रमाराधासाधारणत्वमपि लपद्मे इति लिंगवचनभि
न्नत्वाद्योजनेवेति । विषयांतरे विवहितविषयभिन्ने इत्यर्थः । अवस्था जाग्रत्स्वप्नादिरूपा । वदंतीति । पत्यौ भर्तरि सखी
धिया सखीभ्रमेण जारवृत्तांतं सुखास्सुखवान्नीवदंती धूर्तिका चिंतयति बुध्वा सखीत्यादि वाक्यशेषमपूरयत् । पूरितव
ती सखीति पुनः संबोधनम् । प्रतार्यतास्सूचनाय ततः उक्तवृत्तांतामेतस्य । प्रबुद्धा जागरणवती अत्र नासौ जाग्रदवस्था
वृत्तांतः किंतु स्वापिक इत्यवस्थान्तेदयोजनयापह्नवः । सखीत्यादिवाक्यशेषेण प्रकाश्यते । कैतवापह्नुतिरिति लक्षणमि
ईदृशः । व्याजाद्यैः पदैर्निह्नुतेर्थस्य अभिव्यक्तौ सत्यां कैतवापह्नुतिरिति व्यवहर्तव्यमित्यर्थः । कैतवेनापह्नुतिरिति व्युत्पत्त्येवो
जाद्यैरित्यनेन मिष कपट छल छद्म कैतवादयो गृह्यंते । एवं च कैतवादिपदैर्व्याजापह्नुतित्वे लक्षणे बोध्यते । राचा
वाणैः हृक्यातः कराहत । अपह्नवः निषेधः । प्रतीयत इति । असत्यत्वस्य विषयबाधाधीनत्वादिति भावः । रिक्ते ख्विति ।
ग्रीष्मवर्णने । तरवो वृक्षाः वारिणा जलस्य कथया वार्तयापि रिक्तेषु शून्येषु विपिनस्यारण्यस्योदरेषु मध्यप्र
देशे जलेनार्थ्यंते प्रार्थ्यंते । कीदृशाः मध्याह्ने जृंभितः प्रवृद्धो यो महानातप उष्मा तस्य तापस्तपनं तेन तप्ताः संतप्ताः
किं कृत्वा स्कंधांतरात् तत्प्रकांडमध्यंतरादुत्थितो यो दावाग्निर्दावानलस्तस्य शिखा ज्वाला तस्याः छलेन जिह्वां प्रसार्येति । अ
स्त्री प्रकांडः स्कंधः स्यान्मूलाच्छाखावधिस्तरोरित्यमरः । अत्र नेयं दवाग्निशिखा ऽपि तु जिह्वेति छलपदात्प्रतीयते । अ
त्र चानभिहितवाच्यतादोषनिरासाय कथयापि वनोदरेष्विति पठनीयं इत्यपह्नुतिप्रकरणम् ॥ उत्प्रेक्षां लक्षयति ।
संभावनेति । अत्रोत्प्रेक्षेत्यनंतरं साच त्रिधेत्यध्याहार्यं तथा च संभावना उत्प्रेक्षापदवाच्या स्यात् । साच वस्तुहेतुफल
रूपेण त्रिधेत्यर्थः । वस्तुहेतुफलानां च संभावनाधर्मत्वं स्वविधेयकत्वसंबंधेन तेन वस्तुहेतुफलविधेयक

कुव. त्वेनेति पर्यवसितोर्थः। वस्तुत्वं च हेतुत्वेन फलत्वेन वा विवक्षितं तयन्नद्भिन्नत्वं नातो वस्तुत्वस्य केवलान्वयित
टी याविभागासंगतिः। उक्तेत्यादि। अत्र आसामुत्प्रेक्षाणां मध्ये आद्या वस्तूत्प्रेक्षा। उक्तं चानुक्तं चोक्तानुक्ते आस्पदे य
१२ स्या इति विग्रहः। आस्पदं चोक्ताया धर्मिरूपो विषयः। सिद्धासिद्धे त्वत्र विग्रहः पूर्ववत्। धूमेति। तमः कोकीविर
हसुघुक्षणं धूमस्तोमं शंके इत्यन्वयः। कोकस्य चक्रवाकस्य स्त्री कोकी तस्या विरहरूपाणां सुसुक्षणं अग्निनीनां सं
१२ बंधिनं धूमसमूहमित्यर्थः। लिंपतीवेति। अत्र तम इति नभ इति च कर्तृपदं। रक्तावित्यादि दयितां प्रति नाय
कस्योक्तिः। तव मृदुलौ कुसुमाशावपि चरणौ ध्रुवं भुविक्षेपणाद्धेतोः रक्तवर्णाविति। त्वन्मुखेति। पद्मगताया
स्त्वन्मुखकांते रिच्छया हेतुनेत्यर्थः। वैरायत इति वैरं करोतीत्यर्थे शब्दवैरकलहेति काङ्। मध्य इति। मध्य
नागः। कुचयो धृत्यै धरणार्थं कनकस्य दामभिः रज्जुभिरिति निगीर्याध्यवसानरूपा तिसृभिः त्रिवली
भिर्बद्धः किमित्यर्थः। प्राय इति। अनुकर्तुं प्रायः बहुधा त्वन्मुखेन सह ऐक्यं प्राप्तुं तोये जले तपस्यति। तपश्चरती
त्यर्थः। कर्मणो रोमन्थतपोभ्यां वर्तिचरोरिति काङ्। तपसः परस्मैपदं चेति परस्मैपदं। तल्लक्षणं परिष्कुरुते। अ
न्यधर्मेति। अन्यस्य विषयिणो यो धर्मस्तत्संबंधरूपेण निमित्तेनान्यस्यान्यविषयकं अन्यस्य विषयिणस्तादात्म्ये
न संभावनमित्यर्थः। अन्यस्येति षष्ठ्यर्थो विषयता धर्मितारूपविषयिण इति षष्ठ्यर्थस्तु विशेषणतारूपविषयता अन्य
त्वेनोत्कीर्तनं च संभावनो या आहार्यतासूचनाय तथा च विषयिनिष्ठधर्मसंबंधप्रयुक्तं [illegible] विषयधर्मिकं तादात्म्यसंस
र्गेण विषयिविधेयकमाहार्यसंभावनमुत्प्रेक्षेति पर्यवसितं। तन्निष्ठधर्मसंबंधप्रयुक्तमाहार्यतत्संभावनमिति तु
पर निष्कर्षः। इतरेषामस्याभावर्तकतया स्वरूपकथनमात्रत्वात्। मुखं चंद्रं मन्ये इत्युत्प्रेक्षायां चंद्रनिष्ठाह्लादकत्वादिधर्मसं
बंधप्रयुक्तं मुखे चंद्रसंभावनया आहार्यपरस्तीति लक्षणसमन्वयः। बाधाद्यभावदशायां तु जायमाना मुखादौ चंद्रादिसं
भावनानोत्प्रेक्षेति तद्वारणाय आहार्येति एतेन विरक्तसंख्यापरुषपुरस्तात् यथा रजः पार्थिवमाजिहीते। शंके हनूम
त्कथितप्रवृत्तिः प्रत्युद्गतो मां भरतः ससैन्यः। इत्यत्र रजो भरो हनुमदुपससैन्यप्रत्युद्गततद्धर्मसंबंधप्रयुक्ता या भर
ते संभावनाया मपि नातिव्याप्तिः। तस्या अनाहार्यत्वात्। संभावनं यदीयं स्यादित्यूहोन्यस्य सिद्धये इति वक्ष्यमाण संभा
वनालंकारविषये यदि शोभो भवेदक्ता कथिता स्पृग्गुणस्तवेत्यादावतिव्याप्तिवारणाय प्रयुक्तानीते। सवीति ष्णापि

सौंदर्यप्रांके सत्यवतो मुखं येन स्मरगर्भा वाह्यासावितरत्नीकृतेत्यादावतिप्रसंगवारणाय तन्निष्टेति सं
भाव्यमानरत्नित्वधर्मविशेषणं तत्र सावित्री तरत्नीकारकत्वरूपो धर्मो मुखवृत्तिर्न तु संभाव्यमानवृत्तिरि
तिनातिप्रसंग इति दिक्। वस्तुहेतुफलात्मभा· वस्तुहेतुफलतादात्म्येन। ननु संदेहान्तरेणोत्प्रेक्षाया असंग्रह इति
चेन्न। सर्वत्राभेदेनैवोत्प्रेक्षणमिति प्राचीनमतानुसारिणेत्यभिधानात्। एतेनोत्प्रेक्षणं चनायैव लक्षणेऽत्र च तादात्म्योपा
दानमिति। नन्वलंकारसर्वस्वकारादिभिः स्वरूपोत्प्रेक्षेति व्यवहृताया स्तु राधाया अपि सत्त्वात् त्रिविधेत्युक्तमित्याशं
क्याह। अत्रेति। अत्रासौ मध्ये याप्रथमा वस्तूत्प्रेक्षा सैव स्वरूपोत्प्रेक्षेत्युच्यत इत्यर्थः। विसत्वरस्येति। प्रसरणशीलेत्य
र्थः। तमस इति। संभानेत्यनेनान्वेति। षष्ठ्यर्थो विषयता· तमो विषय इत्यर्थः। प्रतिरोधकत्वादीत्यादिपदात्प्रसरण
शीलत्वस्य संग्रहः। प्रियैः पतिभिर्विघटिता वियुक्ता· व्यापनस्येति षष्ठ्यन्तस्य पूर्ववदुत्प्रेक्षापदेनान्वयः। एवमग्रेतनस्य तमसश्च वि
स्याप्युत्प्रेक्ष्यनुपादानादिति। विषयवाचकाभ्यां लिंपतिवर्षतिभ्यामसत्येनानुपादानादित्यर्थः। यथाश्रुतेताभ्यामेव साध्यवसान
लक्षणयोपादानादसंगतेः। उक्तविषयमेवेति। सकृदुच्चरिताभ्यां लिंपतिवर्षतिभ्यां शक्यालेपनवर्षणयोः साध्यव
सानलक्षणया च साधारणधर्मपुरस्कारेण व्यापनस्य चोपस्थानस्य युगपद्वृत्तिद्वयविरोधेनासंभवादित्याश
यः। स्यते। निरूक्तस्येतेः उत्प्रेक्षणीयतया उत्प्रेक्षाविषयतया अन्यत्र उत्प्रेक्षायां अन्वयासंभवादिति। निराकांक्षत्वादि
तिभावः। अत एवाख्यातार्थस्य कर्तुः क्रियोपसर्जनत्वेनान्यत्रान्वयासंभवाद् क्वचिदत एवेत्युत्तरमग्रमेव व्याख्यानं ग्रंथः प्रमा
दाल्लिखितो दृश्यते। न्यग्भूत इति। गुणभूत इत्यर्थः। स्वक्रियेति। क्रियाप्रतिसाधनत्वेनान्वित इत्यर्थः। व्यापेक्षितत्वं आकां
क्षितं नालेन समर्थ्यः। तथा च निराकांक्षत्वादुपमानत्वेनान्वयो न संभव इति भावः। एतेन तमसि लेपनकर्तृत्वमुत्प्रे
क्ष्यमित्यलंकारसर्वस्वकारमतमपास्तं तस्याकर्तृविशेषणत्वात्। विवक्षितविवेकेन लेपनस्यैवोत्प्रेक्ष्यत्वाच्च। एवं प्र
धानभूतलेपनक्रियागोचरसंभावनैव निगीर्णव्यापनविषयेति सिद्धं। न च युगपल्लिंपयमविरोधः शंक्यः। तदन
भ्युपगमात्। केचिदिति। मतइतिचास्वरसोद्भावनम्। तद्बीजं तु नभसः कर्तृत्वेन विषयत्वेन च वारद्वयमन्वये दोषः।
तथा धर्मोत्प्रेक्षा साधर्म्यप्रयुक्ता धर्मोत्प्रेक्षात्तु तत्सहचरितधर्मसंबंधप्रयुक्तेति लक्षणाननुगमः। न च तन्निष्ठेत
नि२ त्त्वसमानाधिकरणान्यतरत्वेवदन धर्मविशिष्टान्वानुगम इति वाच्यम्। सर्वत्र साहचर्यनिमित्ताया एवोत्प्रेक्षायाः संभवेना
नान्यतरत्वनिवेशप्रयुक्तगौरवस्यानुपादेयत्वादिति हेतुत्वेनेति हेतुरूपतयेत्यर्थः। हेतुत्वसंभावना हेतुरूपतासंभा
वना फलत्वेन फलरूपतया एवमग्रेऽपि। अथोदाहृतास्वुत्प्रेक्षास्ववोधप्रकारः प्रदर्श्यते। तत्र धूमस्तोममसित्यादौ

कोकोगनाविरहानलसंबंधिधूम्रस्तोमाभिन्नतमोविषयासंभावनेतिबोधः। नामार्थयोरभेदान्वयात्। एवं मुखं
चंद्रं मन्य इत्यादावपि। नूनं मुखं चंद्रं चंद्रप्रकारकसंभावनाविषयो मुखमिति बोधः। मुखविषया चंद्रप्रकारिका च सं-
भावना तादात्म्यसंसर्गिकैव तथानुभवात्। चमत्कारप्रयोजकस्य संसर्गांतरस्याभावाच्च। न चैवं चंद्रत्वप्रकारिका
तस्य चंद्रोपसर्जनत्वात्। एवं ध्रुवमेवादिशब्दसमभिव्याहारेऽपि बोध्यम्। लिंपतीवेत्यनुक्तविषयोत्प्रेक्षोदाहरणे लिं-
पतिना साध्यवसानलक्षणया लेपनव्यापनोभयसाधारणेन सांद्रमलिनीकरकत्वादिना रूपेणोपस्थापिते तमोव्यापि-
ने लेपनसंभावनान्वयात्। सांद्रमलिनीकारकसंभावनाविषय इति बोधः। व्यंजनायोपस्थापितव्यापने तादृशसंभा-
वनान्वय इति प्रदीपकृतः। एवं वर्षतीत्यादावपि बोध्यम्। विक्षेपणाद्ध्रुवमित्यादिहेतूत्प्रेक्षोदाहरणे हेतुः पंचम्यर्थः।
तत्र चाभेदेन प्रकृत्यर्थान्वयः। हेतोश्च स्वप्रयोज्याश्रयत्वसंबंधेन रक्तत्वविशिष्टे। तस्य प्रकारितासंबंधेन संभावनायां
तस्याश्च विषयतया चरणयोरन्वयः। तथा च मत्स्याधिकरणकविक्षेपणाभिन्नहेतुकरक्तप्रकारकसंभावनाविषयावंघ्री
इति बोधः। न च तादात्म्यसंबंधेन हेतुविधेयकत्वाभावान्नेयं हेतूत्प्रेक्षा स्यात्। किंतु तादात्म्येन तथाविधरक्तसरूपोत्प्रे-
क्षैवेति वाच्यम्। विवक्षितविक्षेपणे हेत्वभेदस्योत्प्रेक्षणीयतया विक्षेपणं प्रति विशेष्यभूतस्यापि हेतोर्विधेयोपगमा-
त्। मुखं चंद्र इत्यादिरूपक इवानुयोगि रूपक इवानुयोगित्वमुखस्याभेदस्य विक्षेपणसंसर्गत्वाभ्युपगमेन वा विक्षे-
पणे हेत्वभेदभानसंभवात्। हेतुविशिष्टस्वरूपोत्प्रेक्षायामुखतः प्रतीतावपि विवक्षावशेन हेतूत्प्रेक्षात्वेनैव व्यपदेशः।
यथा दध्ना जुहोतीत्यत्र मुखतो दधिविशिष्टहोमविधिप्रतीतावपि विवक्षितविवेकेन होमे दधित्वव्यपदेश इति बोध्यम्।
न च स्वप्रयोजत्वसंबंधेन स्वप्रयोज्याश्रयत्वसंबंधेन वा हेतुरूपधर्मोत्प्रेक्षैव रक्तादौ स्वी क्रियतां कृतमीदृशकल्पना-
क्लेशेनेति वाच्यम्। धर्मोत्प्रेक्षांगीकारे दूषणस्य प्रागेव विदितत्वात्। अत एव॰ हर्षाल्लग्नामन्यैर्लक्षितं तनुते पादयोः
पद्मलक्ष्मीरिति हेतूत्प्रेक्षामुदाहृतवतः प्रकाशकृतोऽपि तत्र हर्षहेतुकलगनतादात्म्यसंभवान्नमेव स्वाभाविकोल-
गनेऽभिमतम्। अस्मद्गुरुरीत्या तु लक्ष्मीरूपे विषये यथोक्तहर्षहेतुकलगनतादात्म्यसंभावनमुचितम्। लगनस्य
धर्म्युपसर्जनत्वेन संभावनान्वयायोग्यादिति ध्येयम्। एवं त्वन्मुखाभेच्छयेत्यसिद्धविषयहेतूत्प्रेक्षायामपि बोध्यम्।
विषयसिद्धत्वासिद्धत्वाभ्यां बोधे विशेषाभावात्। मध्यः किमित्यादिफलोत्प्रेक्षायां फलं चतुर्थ्यर्थः। तत्र चाभेदेन प्रकृत्यर्थान्व-
यः पूर्ववत्। फलस्य च प्रयोजकत्वसंसर्गेण वह्नत्वेन हारके एतेनैव कुचान्वयस्तत्र तादात्म्यसंसर्गसंभवनायां मध्ये विष-
यतया। एवं च कुचधारणभिन्नफलककनकदामकरणकावह्नत्वाश्रयसंभावनाविषयो मध्य इति बोधः। एवं प्रायो

भूमित्यादावपि। फलं तु मनो[illegible]र्थ इति पूर्ववदेव बोधः। फलोत्प्रेक्षात्वं चोपदर्शितरीत्योपपादनीयमिति व[illegible]वक्राण्यपि
विस्तरभयादुपरम्यते। वालेंदुवक्राणीति। न विद्यते विकासो येषां तान्यविकासानि तेषां भावात् विकासरहितत्वा
द्धेतोः वालेंदुवत् द्वितीयाचंद्रवत्। वक्राणि तथातिप्रायेण लोहितानि अत्यारक्तानि पलाशानि पलाशकुसुमानि वसं
तेन नायकेन समागमं प्राप्तानां वनस्थलीनामंगनानां सद्यस्तात्कालसंभूतानि नखक्षतानीव बभुः शुशुभुरित्यन्वयः। पूर्वं
ति धूमस्तोममित्यत्रेत्यर्थः। ननु लोके संभावनायामिव प्राद्दीन दृष्ट इत्यत आह। अस्तिचेति। पिनष्टीवेति॥ समुद्रसारंगा
णामग्रभागेः केनरूपं चंदनं पिनष्टीवाइंदुस्तत्केन चंदनमादाय करैः किरणैर्दिगंगनालिंपतीवानुलिंपतीवेत्यर्थः
समुद्रेपांतेति। समुद्रसोपांतेतटे यस्तेन चंदनेन तत्कृतेयत्र्यासोदिशांलेपनं तत्वेनेत्यर्थः। उभयत्र उभयोरुत्प्रेक्षयोः
येषामलंकारसर्वस्वकारादीनाम्। राज्ञाविति। स प्रक्रांतो भूपतिः। भूमौ रात्रौ रवेरभावाद्धेतोरिव दिवा चंद्रोदरभावाद्धे
तोरिव सततं निरंतरमुदिते प्रतापयशसी स एव वान् निर्मितवान् इत्यर्थः। रक्षाविति। उदाहरणे भावरूपो हेतुरिहत्व
भाव इति भेदः। विवस्वतेति। विवस्वता सूर्येण स्वस्य गोसहस्रेण किरणसहस्रेण समं मिश्राः मिश्रिताः जना नाने
त्रापरनाम च ये या गावो पि अनायिषत वनीता इव। यथा गोपालेन परकीयाभिर्गोभिर्मिश्राः स्वीया गावो नीयंते
तथा गोपरवाचत्वसाजात्येन मिश्रता विवस्वता अपिनीता इवेत्यर्थः। खलु संभावनायां तेन नयनो न हेतु
ना इदं मोघेन लब्धकोरेरित्यन्वयः। गोः स्वर्गे चावनौ वेदरश्मौ च कुलिशे पुमान्। स्त्री सौरभेयी दिग्बाणे दिग्वा
ग्भूषु पशु भूम्नि चेति मेदिनी। अनायिषतेवेति विषयोत्प्रेक्षणपूर्वकं तस्य हेतुत्वोत्प्रेक्षणमिति पूर्वस्माद्भेदः। ए
वं च पूर्वत्रेव [illegible]ति गुणरूपो हेतुः क्रियारूप इत्यपि द्रष्टव्यम्। अत्र चोत्प्रेक्षाद्वयसत्वेपि हेतूत्प्रेक्षायाः प्राधान्या
त्वेनैव व्यपदेशो न तु स्वरूपोत्प्रेक्षात्वेन तस्यांगत्वात्। एवमन्यत्रापि बोध्यम्। पूरमिति॥ अयं विधः अंब्रदुः पयो
धेः पूरवर्द्धयत्नु एणकमणिं चंद्रकांते कियंति लोकाकाशान्यपरिमितानि पयांसि दोग्धीति शंके तथा प्रियैः पतिभिर्वि
प्रयोगे वियोजसति सशोकानां कोकांगनानां नयने कर्मभूते कियंति पयांसि दोग्धीति शंके इत्यन्वयः। दुहेर्द्विकर्म
कत्वादेणकमणिमिति द्वितीया एवं नयने इत्यत्रापि। मध्यः। किमित्यत्रैकस्य बहुत्वस्य फलत्वेन कुचध्यते रुत्प्रेक्षण
मिह तु द्रावणस्य बहुलदोग्धृत्वयोः फलत्वेन पूरवर्द्धनस्य तदिति भेदः। रोहणं वर्द्धनं तदा वर्द्धनकाले तेन चंद्रेण रथ्यस्थि
तानामिति। रवि रथ्योस्थितानां निमितुकानां पुरातनानां वाहनानां अश्वानां परिवर्त्तमायेव तुरगोत्तमानामुत्पत्तिर्भूमा
वुत्तरसांदि[illegible]। ध्रौव्यो बुमित्यत्रैकस्य पुण्यस्य फलत्वेनोत्प्रेक्षणमिह तु परिवर्त्तनक्रियाया इति भे

यः। नन्वलंकारसर्वस्वकारादिभिरभेदानामपि जात्यादिभेदानामुक्तत्वात्कुतस्तेन प्रदर्शिता इत्याशंक्याह। एता एवेति। उ
क्तभेदा एवेत्यर्थः। उत्प्रेक्षा इत्यनंतरं चमत्कारविशेषप्रयोजका इति शेषः। तथा च जात्यादिभेदानां चमत्कारविशेषा
नाधायकत्वादप्रदर्शनमिति भावः। इत्युत्प्रेक्षेति। इत्यनेनोत्प्रेक्षाबोधकत्वेनेत्यर्थः॥ लक्ष्मीरिति। अत्रानुपात्तस्व
र्गमनविषयाः स्वर्गगाप्रवेशतादात्म्योत्प्रेक्षाविशेषणीभूतभ्रमणेऽत्र तत्त्वरूपहेतूत्प्रेक्षा वा प्रतीयत इति बोध्यम्।
इति श्रीअलंकारचंद्रिकायामुत्प्रेक्षाप्रकरणम्। अतिशयोक्तिं लक्षयति। रूपकातिशयोक्तिरिति। ग्रहणं उपस्थानं।
विषयरूपतयेति। विषयिणो रूपमस्य तस्य भावस्तत्ता तयेत्यर्थः। रूपं चाभेदतादूप्यान्यतरत्वं तस्मिन्सतीति स
प्तमीसमर्थोऽसिरित्यभिप्रायेणैवं चानुपात्तविषयधर्मिकाहार्यनिश्चयविषयीभूते विषय्यभेदतादूप्यान्य
तरत्वम्। तत्र रूपकातिशयोक्तिरिति लक्षणं बोध्यम्। अत्र रूपकवारणायानुपात्तेति। अयमेव च रूपकादस्या
विशेषोऽतिशय इत्युच्यते। भ्रांतिवारणायाहार्येति। उत्प्रेक्षावारणाय निश्चयेति॥ नीलोत्पलेति। नीलोत्पलपदात्साध्य
वसानलक्षणया शक्तलक्षणोभयानुगतकांतिविशेषपुरस्कारेणोपस्थिते तेकामिनीनयने शक्त्युपस्थितस्य नीलोत्प
लत्वविशिष्टस्याभेदसंसर्गेणान्वयः। शक्त्युपस्थितयोः कृतीष्टसाधनयोरिव शक्तिलक्षणाभ्यामुपस्थितयोरप्येक
पदार्थयोस्तात्पर्यवशेनान्वयांगीकारे बाधकाभावात्। एवं च नीलोत्पलाभिन्नकांतिविशेषवद्दूहादिति बोधादिय
मभेदातिशयोक्तिरित्युच्यते। न चैवं सति रूपकादवैलक्षण्यमिति वाच्यम्। रूपके विषयिभेदमात्रस्य विषयताव
च्छेदकस्याभानेन वैलक्षण्यस्य स्फुटत्वात्। यदा त्वभेदज्ञानेन तात्पर्यं किंतु भेदभाने तदा कांतिविशेषादिरूपता
द्रूपस्यैव बोधात्तादूप्यातिशयोक्तिर्वक्ष्यत इति बोध्यम्। वापीति। मध्यभागमारभ्य मुखपर्यंतं नायिकांगवर्णन
मिदम्। गगने गगनमध्ये कापि अनिर्वाच्यशोभा वापी तद्दूंभीराः नाभिः स्फुरति शोभते तत्परं तदूर्ध्वभागे ऐंद्र
नीलघटिता सूक्ष्मपद्या सरणिस्तद्वत्श्यामा रोमावली स्फुरति इत्यनुषज्यते। किंभूता कांचननिर्मिता सोपान
पंक्तिं तत्सदृशीं त्रिवलीमधिगतवती प्राप्नुवती तस्याग्रे तदूर्ध्वदेशे प्रोल्लोलौ तद्वदुत्तुंगविशालौ कुचौ स्फुरत इति विभ
क्तिव्यत्ययेन संबंधः कीदृशौ सुकृतिनां पुण्यवतां सुगमौ सुलभगमनौ सुलभौ च पुनः कीदृशौ चंदनतरु[illegible]भ्रंद
नेन च छन्नौ व्याप्तौ देशौ ययोस्तौ तत्रत्यानां तदाश्रितानां सुधांशुस्तद्वदाह्लादकस्य सन्निधानादमृतं तद्वदास्वाद्यमधु
रमाधुर्यं सुलभमित्यन्वयः। अस्तीत्यस्य प्रदर्शनार्थमित्यनेनान्वयः। अतिदेशेनेति सादृश्येनेत्यर्थः। मुख्यरूपको
भेदस्यातिशयोक्ताव भानात् द्रूपकपदं रूपकसादृश्यपरं सम्यगासमग्निहोत्रं जुह्वतीत्यत्राग्निहोत्रपदवद्गौणीति देश
कमित्याशयः। आधिक्यान्न्यूनत्वेऽस्यत्रानुभयोक्तेः रुकौदाहरणेषु प्रसिद्धतरत्वादनुपदानं बोध्यम्। यत्त्वत्र केचिद् १५

के विषयवाचकपदस्य विषये साध्यवसानलक्षणया: शक्यतावच्छेदकमात्रप्रकारकत्वविशेष्यकबोधत्वं का
कार्यतावच्छेदकं। एवं च निगरणेन सर्वत्र विषयितावच्छेदकधर्मरूपेणैव विषयस्य भानं न विषयाभिन्नत्वेनेति स्थि
ते भेदातिशयोक्तिस्ताद्रूप्यातिशयोक्तिरिति द्वैविध्यमयुक्तमिति तत्स्वोष्ठविलसितम्। शक्यतावच्छेदकस्य लक्ष्ये पूर्वम
तीतत्वेन तद्विशिष्टतया लक्षणाया असंभवात्। यद्धर्मविशिष्टे प्राक् संबंधग्रहस्तद्धर्मप्रकारकलक्षणोपस्थितेः सोपानप्र
कारकशाब्दबोधहेतुत्वात् लक्षणापरिहार्यायामनुपपत्तेस्तदवस्थत्वाच्च एवमपि तात्पर्यवशात् दृष्टबोधाङ्गीकारे त
द्दशादेव शक्यभेदप्रकारकबोधेपि बाधकाभावात् मात्रपदेन विषयतावच्छेदकस्यैव व्यावर्त्तनादिति दिक्। सुधाव
द्धेति। शालभंजिकाख्यायां नाटिकायां स्फटिकप्रकारशिखिरगतो मृगांकावलीमालोकयतो राज्ञो विदूषकं प्रत्युक्तिः।
प्राकारगे। प्राकारसमीपे नयनेपुद्दिरण्णविरय। मनाक् ईषत्तर्कय। अनाकाशे नेतरिन्ने कोयं शीतकिरणः अद्य इति
मुखे चेद्गताह्लादकाशित्वरूपताद्रूप्याध्यवसानम्। कीदृशः। गलितम् अन्ततो हरिणो यस्मात् तथाभूतः। तेन नि:
कलंकतयोत्कर्षाभिव्यक्तिः। पुनः कीदृक्। सुधाया बद्धः ग्रासस्तदभिलाषो येस्ते रुपवनसंबंधिभिरस्तु कोरै:
रनुसृतः। लवल्याः फलपाकस्पृहणयिनी सदृशी अङ्गच्छवि येषां तत्वेनाध्यवसितो कोपि पुमांकिरन्प्रसा
रयन्नित्यर्थः। लवलीलता विशेषो हरफारेवडीति भाषाप्रसिद्धा। प्राकारो वरणः शाल इत्यमरः। समवद्धग्रा
सैरिति क्वचित्। तत्राप्युक्त एवार्थः। नवलवलीति पाठे नवश्चासौ लवलिपाकश्चेत्यर्थः। नन्विह भेदविवक्षैव किं
न स्यादत आह। अत्रेति। तः। कोयमित्यनेन नानिर्ज्ञातकालपुरुषशास्त्रसिद्धस्य च निर्ज्ञातत्वात् हेतुलक्षणावगतिरिति
ते भावः। गर्भीकृतः। गलितेत्यादि विशेषणकंपलेनाभिव्रतः। अन्यत्रापीति। अनुच्छिष्टो देवैरपरिदलितो राहुदशनैः
कलंकेनास्पृष्टो न खलु परिभूतो दिनकृता। कुहूभिर्नो लुप्तो न च युवतिवक्त्रेण विजितः कलानाथः कोयं कनक
लतिकायामुदयते इत्यादावित्यर्थः। अन्यथा न्यत्रापि अनन्ततायामपीत्यर्थः। कोयंभूमिगतश्चन्द्र इत्यादावदिमत्वरू
पत्रूनत्वाप्रकाशनमहनीयमिति भावः। ननु नो दाहरणे स्यमिति विषयस्योपादानात्कथमतिशयोक्तिरिति चे
तत्राह। इदंत्वस्यापि विशेषणत्वेन विवक्षामतिशयोक्तिरेव। यदा तु विषयविशेषणत्वविवक्षा तदा रूपकमिति व्य
वस्थात एव प्रकाशकृता दशमे रूपकातिशयोक्त्यादिसंदेहसंकरे नयनानंददायीन्दोर्बिंबमेतत्प्रसीदतीत्युक्तं।
एनो विभजते। यद्यपह्नुतीति। अपह्नुतिगर्भत्वपर्यस्तापह्नुतिगर्भत्वं। सैव गर्भेति प्रायोक्तिरेव। तथा च सापह्नव

कु॰व॰ त्वनिरुपद्रवमेदेन द्विधातिशयोक्तिरिति भावः ॥ मुक्तामिति । तानि अनुभवैकवेद्यानीमानि वस्तूनि वस्तूनीति इमे
टी जनाः विकल्पयंति सद्सद्वेति विकल्पविषयाणि कुर्वंति येषां जनानां सा प्रकृष्टा सुंदरी दृक्पथे लोचनमार्गे नास्तीत्य
१५ न्वयः । तादृशसुंदरीदर्शनशालिनस्तान्विकल्पयंतीति भावः ॥ तानि कानि वस्तूनि मुक्तामौक्तिकम् । विद्रुमं प्रवालं चो
15 तराऽनयोर्मध्ये मधुरसः । अंतरांतरेण युक्ते इति द्वितीया । पुष्पपरं केवलं धूर्वहं भारवाहकं न तु मधुरसयुक्तं तयो
र्मुक्ताविद्रुमयोः खलु निश्चितं प्रालेयद्युतिमंडले चंद्रमंडले एकासिका एकस्मिन्नासिकावस्थितिः । तेकाधिकरणमि
तियावत् । न त्वर्णवे समुद्रे । तच्च इंदुमंडलं शंखस्य मूर्द्धि मस्तके उदंचति उदयति प्राप्नोति । न पुनः पूर्वाचलस्योदयगि
रेरभ्यंतरे इति अत्रामुक्ताविद्रुममधुरसप्रालेयद्युतिमंडलशंखप्रत्येकैः क्रमेण दंताधरतन्माधुर्यमुखकंठा निगीर्णाः
पूर्वार्द्धाहरणे भ्रांतत्वेन तस्याः स्पष्टापह्नवः । इह तु परं धूर्वहमित्युक्त्या गूढ इति भेदः । प्रालेयमिति हिकाचेत्यमरः ॥ गतास्वि
ति । पुरेभवाः पौर्यस्तासु विलासिनीषु तिमीनां मत्स्यानां घट्टनेन ससंभ्रमं समयंतीरं गतासु सतीषु यत्र नगर्यां सिप्रा
नदी उल्लसंतीनां फेनततीनां छलेन मुक्तः कृतो अट्टहासः उद्धतहासो यया सा भूतेव विभातीत्यन्वयः । इतीति इत्यन्यत्रेत्यर्थः ॥
इंदुमंडलादावित्यादिपदात् पुष्परसादिपरिग्रहः । सूक्त्यादिष्विति । सूक्तिमाधुर्यादिष्वित्यर्थः । आदिनाधरमाधुर्या
दिपरिग्रहः ॥ निवेशनात् । अभेदाध्यवसानात् । जानेइति । दमयंती वर्ण्यते नलस्योक्तिः ॥ अतिशयितात्प्रागा
ल्लौहित्यादिमधुरस्वरूपमेव बिंबमिति जाने न तु बिंबफलमित्येवकारार्थः ॥ बिंबस्य फलस्याः तोः स्मादोष्ठाधर
त्वेनिकृष्टत्वं व्यक्तं स्फुटम् । कथं तर्हि विपरीतालोकप्रसिद्धिस्तत्राह । द्वयोरनयोर्विशेषस्य तारतम्यस्यावबोधेन माण
मसमर्थो जनोनानाप्रिभ्रमो विपर्यासः अभूदिति । अन्यत्रेति । सूर्यकर्तृके नेत्रापरपर्यायगो नयनेत्यर्थः ॥ नि
वेशितम् । उल्लेखितम् । रवीति । रविणा संतप्तेगजस्तस्य रवेर्गृहान्प्रहान्वंधूनिति यावत् । ध्रुवं प्रायो वाधि
लुसरः प्रविशति न तु स्नातं हृयतगजस्नानं निष्फलप्रयोजनमित्यन्वयः ॥ प्रसक्तानुप्रसक्तादीति । अतिशयोक्तेः
सापह्नवत्वकथनप्रसंगादलंकारसर्वस्वकृदुक्तस्वरूपापह्नुत्यास्तुद्धापह्नुतिगर्भत्वं दर्शितं तदनुप्रसक्तत्वाच्चत्रिवि
धास्वपह्नुतिषु तास्वपर्यस्तापह्नुतिगर्भत्वमित्यर्थः ॥ भेदकेति । तस्यैव । तज्जातीयस्यैव । अन्यत्ववर्णनं तज्जातीयभि
न्नत्वेनवर्णनं । तच्चाहार्यबोधरूपम् । एवमग्रेपि । तेन भ्रांतौ नातिव्याप्तिः ॥ इदं च लोकोत्तरत्वप्रतिपत्त्यर्थं । अन्यदे
वेति । अत्र सम्भूतदीर्घेः संभार्या अन्यदेव प्रसिद्धगांभीर्यभिन्नमेवेत्यर्थः ॥ अन्येयमिति । रूपेसौंदर्ये वैदग्ध्ये

चातुर्यधोरणी परिपाटी। एषा नलिनपत्राक्षी विधेः साधारणी सृष्टिर्नेत्यन्वयः। अत्रोत्तरार्द्धे नञ्भंग्या मत्त्वव
र्णनं विशेषः। संबंधेति। अयोगे। असंबंधे योगकल्पनं संबंधवर्णनं। संबंधस्याभेदभिन्नत्वे सत्यप्यत्वाद्यनि
रूपितो ग्राह्यः तेन रूपकातिशयोक्त्यादि प्रभेदेषु नातिव्याप्तिः। सौधेति। सौधो स्त्री राजसदनमित्यमरः। ननु
त्रैवस्यपाती वेंदुमंडलमिति इवशब्दप्रयोगे उत्प्रेक्षाप्रतीतेस्तत्प्रयोगे गम्योत्प्रेक्षात्वमुचितम्। इवादिसत्त्वे
यावाच्योत्प्रेक्षा सैव वाद्यभावे गम्योत्प्रेक्षेति नियमात्। अन्यथा त्वत्कीर्तिर्भ्रमणश्रान्ता इत्यादिपूर्वोदाहृते प
द्येपि गम्योत्प्रेक्षा नास्यात् द्विशेषाभावादिति चेत्। मैवम्। उपदर्शितनियमस्यालंकारांतरविषय एवाभ्युपगमा
त्। अन्यथा नूनं मुखं चंद्र इत्यादौ नूनमिति प्रयोगे गम्योत्प्रेक्षापत्तेः। एवं च प्रकृते संबंधे संबंधवर्णनरूपातिश
योऽलंकारविषयेन गम्योत्प्रेक्षाया अवसरः। त्वत्कीर्तिरित्युदाहरणे तु भ्रमणश्रान्ततत्त्वरूपहेत्वंशे गम्योत्प्रेक्षाभि
प्रेतान्तु स्वर्गंगाप्रवेशांश इति सर्वमवदातं। असंदिग्धमुदाहरणांतरमाह। यस्यावेति। कतिपयेति। वीररुद्र
देवारभे नृपे वितरणशालिनि दानशालिनि सति चक्रवाकी इति मुदं संतोषमुपयाति प्राप्नोति इति किं। कृतेवा
सरस्यावसानेनाशयेन सः कनकगिरिः मेरुः कतिपयैरल्पैर्दिवसैः क्षयं प्रयायादिति संभावनायां लिङ्।
योगेपीति। योगे सत्यप्ययोगवर्णनमित्यर्थः। स्वर्गस्याद्रुमाः। कल्पवृक्षादयः। स्वर्द्रुमेष्विति विषयसप्तमी। स्वर्द्रु
मविषये य आदरस्तस्य संबंधेपि। अर्थादर्थिषु यहा अर्थिषु स्वर्द्रुमविषयादरसंबंधाभावप्रतीतेः तत्समानवि
ष त्रवेयतया स्वर्द्रुमेष्वादरविषयत्वाभावावगमात् यथाश्रुतमेव साधुः। अनयोरिति। अनवद्यानि निर्दुष्टानि अं
गानि यस्मात्तथाभूते इति संबुद्धिः। जंभमणमानयोर्वर्द्धमानयोरनयो[illegible]नयोस्तव बाहुलतयोरंतरं मध्ये पर्या
प्तोऽवकाशो नास्तीत्यन्वयः। अत्र बाहुलतयोरंतरे स्तनपर्याप्तावकाशसंबंधेपि तदसंबंध उक्तः। अक्रमेति। क्र
मः पौर्वापर्यं तदभावोऽक्रमस्तद्रूपस्यातिशयस्योक्तिरित्यर्थः। सहत्वे समकालत्वे आलिंगेति इति। समं युग
पत्। ज्यामौर्वी पृष्ठीच-पराः प्रात्रवः। मुंचतीति। हे वीर संज्ञकस्य वीरस्य खड्गे कोशं पिधानं मुंचति सति। अरी
णां वर्गः समूहोपि कोषं भांडारं मुंचति। तथा खड्गे प्रकंपमुल्लसनं भजति सति। सः प्रकंपं कंपं भजति। एवं ख
ड्गे क्षमां शांतिं त्यजति सति सोपि क्षमां पृथ्वीं त्यजतीत्यर्थः। कोशो स्त्री कुड्मले खड्गपिधानेऽर्थौघदिव्ययोरित्यमरः। अत्र
शात्प्रत्ययोत भंग्या योगपक्षे वर्णनं विशेषः। धनग्रहेति। धनसंबंधिग्रहेत्यर्थः। चपलेति। हेतोः प्रसक्तिमात्रेण तज्जन्य
कार्यं सतीत्यर्थः। यासामीति। उदिते उक्ते प्रियेणेति शेषः। तन्व्या ऊर्मिका अंगुलीयकं वलयं कंकणमभवदित्यर्थः।

कुव. टी. २६ 16

हर्षकालमंगुलीयस्य हस्तमंगतयोरिति विग्रहः। कार्यमुखेनेति। अंगुलीयकस्य कंकणपदप्राप्तिरूपकार्यव
र्णनमुखेन वर्णिः। आदावित्तमिति। सहजसौकुमार्यवत्या विरहदशायां तदतिशयवर्णनमिदम्। हस्तेति खेदम्। आदावेग
हीतं सकृदेकवारं स्थितिविकुसुमेन्दुहिते सति अधीरदशा हस्ताग्रमालम्बितं भवतीति शेषः। अविनाकिमु गृहीत इति
गम्यते [illegible] यद्रंजनं तद्वार्तयापि सहसा कस्मात्तादयोस्तलेरक्तं भवति किमु रंजनेनेति पूर्ववत्। एवमंगनानां चंद
नादिना यदनुलेपनं तत्स्मरणमपि अत्यंतखेदकं किमुतानुलेपनं किमन्यद्वाच्यमिति शेषः। अलकानामगुरुधूपा
द्यामोदोपि भारायते भार इवाचरतीत्यर्थः। कर्तरि क्यङ्। अत्र दानादिरूपहेतुप्रसक्तिमात्रेण हस्ताग्रलोहित्यरूपका
र्योत्पत्तेः। साक्षादेव वर्णनेन तु कार्यमुखेनेति। पूर्वस्माद्भेदः। हेतुकार्ययोरिव हेतुप्रसक्तिकार्ययोरपि समकाल
त्वे संभवतीति सूचयितुमुदाहरणांतरमाह। यामीति। धवे दयिते यामि न यामीति वदति सति तत्क्षणे तत्कालमे
व तन्वंग्याः पुरो वलयानि अग्रिमकंकणानि पुरः प्रथमं गलितानि अपराण्यपि तथैव तत्कालमेव दलितानि भग्ना
नीत्यन्वयः। पुरो अग्रप्रथमे स्यादिति विश्वः। अत्र वदति गलितानीति शतृप्रत्ययेन समकालतावगतिः। अत्यंतेति। अ
त्र हेतुकार्ययोरित्यनुवर्तते। तत्पौर्वापर्येति पाठः साधुरेव व्यतिक्रमो त्रवैपरीत्यम्। अग्रे प्रथमे अनुनीता समाहिता॥
कवीन्द्राणामिति। कविश्रेष्ठानामंगणे सर्वं धिन्योभूमयः प्रथमतरं प्रथममेव। चलतो चपलानां भंगानां व्यासं
गेनाकुलानां करिणां मदजलस्यामोदेन परिमलेन मधुरा रमणीया आसन्। पश्चादनंतरं तेषां कवीन्द्राणामुपरि रु
ष्टस्य नृपतेः। अमीदृष्यमानाः कटाक्षाः पतिताः। कीदृशाः क्षीरमुदकमुदकं यस्य तथाभूतस्य क्षीरार्णवस्य प्र
सरंतीनां पुरुवीचीनां तरंगाणां सहचरास्तादृशा इत्यर्थः। उदकस्योदः संज्ञायामित्युदादेशः। अत्र यथाक्रमं काटाक्षरू
पकार्यमुखेन नृपतिप्रसादरूपहेतुकथनं पूर्वस्माद्विशेषः। एताः अव्यवहितोक्ताः। अथैतेषु भेदेष्वनुगतप्रवृ
त्तिनिमित्ताभावात्। कथमतिशयोक्तिपदप्रयोग इति चेदत्राहुः। ता वस्तुभेदान्यतमत्वमेव सर्वानुगतमतिशयो
क्तिपदप्रवृत्तिनिमित्तं तदेव च सामान्यलक्षणमिति। न व्यास्तु। निगीर्याध्यवसानमेवातिशयोक्तिः प्रभेदानं
तरं त्वनुगतरूपभावादलंकारांतरमेव न चान्यत्वादिप्रभेदेषु अन्यत्वादिति। न अन्यत्वादिभिरभेदादीनां निग
रणं संभवतीति वाच्यम्। अन्यत्वादिभिरभिन्नवस्तुप्रतीतेरेव चमत्कारित्वेनानुभवसिद्धतया अन्यत्वादिभिरभे
दप्रतीत्यंगीकारेनुभवासंगतेः। अन्यतमत्वे तु नालंकारविभाजकोपाधिः। तां विभजते च चमत्कारा प्रयोजकत्वा
दिति वदंति। वस्तुतस्तु अनुपात्तविषयकचमत्कृतिजनकाहार्यारोपनिश्चयविषयत्वमेवातिशयोक्तिसामान्यलक्ष

एम्। रूपकवारणाय समंतं। भ्रांतिवारणाय हार्येति। उल्लेखेति निरासाय निश्चयेति। रूपकातिशयोक्त्यादिभेदस्य द्विती
यप्रभेदेनात्वस्य तृतीयसंबंधस्य चतुर्थसंबंधस्य पंचमे सहत्वस्य षष्ठे हेतुप्रसक्तिजन्यत्वस्य सप्तमे पूर्वापरत्वयोश्च त
थात्वविधारोपविषयत्वस्य सत्वात्सर्वत्र लक्षणसमन्वयः। नचैवं विधारोपस्य रूपकस्वभावोक्तिभिन्नेषु प्रायशः स
र्वालंकारेषु सत्वादतिप्रसंग इति वाच्यम्। इष्टापत्तेः। अलंकारांतराणां चमत्कारे प्रधानतया तदंगत्वेनावस्थिता
या अतिशयोक्तेरप्राधान्येन व्यपदेशानर्हत्वात्। प्राधान्येन व्यपदेशा भवंतीति न्यायात्। अलंकारांतराणामे
व प्रधानत्वेन व्यपदेशार्हत्वात्। अत एव प्रकाशकृता विशेषालंकारप्रसंगेऽभिहितं सर्वत्रैवंविधे विषयेऽतिशयोक्ति
रेव प्रमाणत्वेनावतिष्ठते। तां विना प्रायेणालंकारत्वाभावात्। अत एवोक्तं सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते। य
त्नोऽस्यां कविभिः कार्यः कोऽलंकारोऽनया विनेति दंडिनाप्युक्तं। अलंकारांतराणामप्येकमाहुः परायणं। वागीशमहि
तामुक्तिमामतिशयाह्वयामिति। इति श्रीअलंकारचंद्रिकायामतिशयोक्तिप्रकरणम्। तुल्ययोगितां लक्षयति। व
र्ण्यानामिति। वर्ण्यत्वेन प्रस्तुतानामित्यर्थः। इतरेषां अप्रस्तुतानां एतच्चोभयमपि सावधारणं वर्ण्यानामेव इत
रेषामेवेत्यर्थः। बहुवचनमनेकार्थकं द्विकयोर्धर्मिकाणामपि संग्राह्यत्वात्। धर्मैक्यं धर्मस्यैकत्वं एको धर्म इति
यावत्। स च मत्कारी बोध्यः। एवं चानेकप्रस्तुतमात्रसंबद्धैकचमत्कारिधर्मानेकाप्रस्तुतमात्रसंबद्धैकचमत्का
रिधर्मान्यतरलक्षणं बोध्यम्। मुखं विकसितस्मितमित्याद्यावतिप्रसंगवारणायानेकेति। अत्र चाप्रस्तुतादिरूपा
नेकवर्ण्यसंबद्धोनेको धर्म इति तन्निरासः। दीपकवारणाय मात्रेति। प्रस्तुताप्रस्तुतप्रभेदसाधारण्याद्यन्तरत्व
निवेशः। त्वदंगेति। प्रियां प्रति दयितोक्तिः। त्वदंगस्य मार्दवे दृष्टे सति कस्य चित्ते मालत्यादीनां कठोरता
न भासते अपितु सर्वस्येत्यर्थः। शशी दिवसधूसर इति शशश्चंद्रस्तस्य लेखा कला गुणक्रियारूपेति एतच्च तथावि
धधर्मस्य प्रायशो गुणक्रियारूपत्वमित्यभिप्रेत्योक्तं न तु लक्षणे तेन रूपेण धर्मस्य निवेशः। गौरवात्। प्रयोज
नाभावाच्च। यत्तु केचिद्देतद्दूषयन्तं लालसे धर्मस्य गुणक्रियारूपत्वेन लक्षणे निवेश इत्याशयमारोप्याभिहि
तं तदेतदापाततः। आसति त्वयि हे राजन्नखंडावनिमंडलेन मनागपि निश्चितेमं डुलेशात्रुमित्रयोरित्यत्राभावरूपध
र्मस्यैवान्वयादिति तदिदमापाततोऽपि न मनोरमं तथा ह्यासतीति त्वदुदाहृतपद्ये निश्चितेनेति। निश्चितमेदशात्रुमित्रधर्म
तयोपात्तं स च गुण एव एवं चिंताभाववद्भेदस्य चिंतानतिरिक्तत्वात्। अन्यथा चिंताभावाभवस्यापि अतिरिक्तताप्पत्तेः। अपत
त्रापि वैजात्यादिना धर्मान्तरत्वस्य भवत्त्वेवं तु अप्रतु भवान्। एवमन्यभावस्य कथं गुण एव हि भावः। जातिक्रियाद्रव्यातिरिक्त

कु.व. स्यैव चतुष्टयी शब्दानां प्रवृत्तिरिति वदद्भिर्वैयाकरणैस्तदनुसारिभिरालंकारिकैर्गुणत्वेनांगीकारात्। अत एव जाति
टी. गुणयोर्विरोधे प्रकाशकृद्भिरुदाहृतं गिरयोप्यनुन्नतियुजइति तथा विद्यानाथेनापि अमदसार्वभौमो पीति। वस्तुलक्ष
१७ णेन तेन रूपेण धर्मस्यानिवेशोऽभिप्रेत इत्यावेदितमतो न काप्यनुपपत्तिरिति। सैरिली। सैनेरितु श्रीलमस्या स्ताद्दृशी
व्यभिचारिणीति यावत्। स्वादीरेरिणोरिति वृद्धिः सैरिलीयाम्स्तुलाच स्यादित्यमरः। संजाता इति। दिनानि पद्मानि च वृक्ष
17 मीयुः कीदृशानि संजातैः पत्राणां प्रकरैर्न्यवितानि। पूर्वपत्राणां वसंतेन विगलितत्वात्। तथा स्फुटा विकसिताः पाटला वृक्ष
विशेषा येषु तेषां भावस्तत्वे समुद्धृतानीति पात्रं तेदधानानीत्यर्थः। पद्मपक्षे तु स्फुटानि विकसितानि च तानि पाटल
वर्णानि तेषां भावस्तत्वमित्यादि पूर्ववत्। एवमर्कस्य करैः किरणैरभिमर्शिनानि कस्वरांति भास्वराणि दिनानि पद्मा
नि तु विकासशालीनि। नागेंद्रेति। नागेंद्राणां हस्ताः शुंडाः कदली विशेषाश्च पदिणां हेवि शालतास्त्वा लिरूपं स्वरू
पं लब्ध्वापि यथाक्रमं त्वचि कर्कशत्वात् कठोरत्वात्। एकांतेन नियमेन शैत्याद्धेतोर्लोके तस्याः पार्वत्या ऊर्वोरूपमानात्। बाह्या
उपमानत्वरहिता जाता इत्यन्वयः। तदीयत्वेनेति। तत्कालिकत्वेनेत्यर्थः। ग्रीष्मकालिकवस्तुवर्णनस्यैव ग्रीष्मवर्णनरूपत्वा
दिति भावः। एकक्रियेति। वृद्धिप्राप्तिरूपैकक्रियान्वय इत्यर्थः। एकगुणेति। उपमानवाह्यत्वरूपैकगुणेत्यर्थः। हिताहितेइति।
हिताहितविषयेत्यर्थः। वृत्तितौल्यमिति। वृत्तिर्वर्तनं व्यवहरणमिति यावत्। तस्यां तौल्यं साम्यम्। अपरा। पूर्वोक्तविलक्षणा। प्र
दीयत इति। परा उत्कृष्टा भूतिः संपत्तिरिव पराभूतिः पराभवः। शत्रूणां समूहः शात्रवं तस्य समूह इत्यण्। पराभवदा
नस्येति। एतत्संबंधि पराभवसंपादनस्येत्यर्थः। पराभवस्य मुख्यदानासंभवात्। अत एव संप्रदानत्वासंभवाच्छित्रशा
त्रवयोरिति संबंधसामान्ये षष्ठी श्लेषेण पराभूतिपदश्लेषेण। यथावेति। अत्र च शात्रवाप्यर्थविरोधद्योतकाः। अत्र
२ योपि तिलं यं पशुना छिनत्ति यो व्येनं मधुयुक्तेन सर्पिषाभिषिंचति यो व्येनं गंधमाल्याद्यैरर्चतीति क्रमेणेत्यर्थः। उक्तप्रकार
स्य तुल्ययोगिता पददवाच्यत्वे वृद्धिसंमितं दर्शयति। इयमिति। तथा च वृद्धव्यवहारानानार्थस्तुल्ययोगिताशब्दस्य
र्थः। अत्र केचित्। नेयं तुल्ययोगिता पूर्वोक्ततुल्ययोगिताता भेदमर्हति वर्ण्यानामितरेषां वेत्यादि पूर्वोक्तलक्षणलक्ष
३ णाक्रांतत्वात्। एकां पूर्वोबोधितवस्तु कर्मदानस्यान्वयस्य परंपरया तादृशछेदस्य वा धर्मत्वयात्। यश्चानिंब मित्यत्रापि कटुत्वविशिष्टनि
वस्यैव परंपरया छेदकसेचकपूजक धर्मत्व संभवादित्याहुः। तदेतदपेशलम्। तथाहि यत्रानेकान्वयित्वेन ताते धर्मस्तेषामभो
पम्यगामकत्वेन चमत्कृतिजनकस्तत्र पूर्वोक्तप्रकारः। यत्रं तु हिताहितो भयविषयकं समरूपैकव्यवहारस्यैव वहृत्तैगस्तुतिनिं
दान्यतरद्योतकतया चमत्कृतिजनकत्वं तत्रापर इति भेदात्। न सत्र पराभूतिशब्दस्य तदर्थकर्मदानस्य वा परंपरया शत्रुमित्र
गतत्वेन भानमपि तु श्लेषबलादेकत्वेनाध्यवसितस्य तादृशदानस्य राजगतत्वेनैवेति। कथं पूर्वोक्तलक्षणाक्रांतत्वम्। एते

नयस्त्रनिंबमित्यत्रकटुत्वविशिष्टनिंबस्यैवपरंपरयाछेदकसेचकप्रयोजकधर्मत्वमितिनिरस्तम्।वस्तुगत्यातद्धर्मस्यालं
कारतासंपादकत्वाभावात्।अन्यथासंकुचंतिसरोजानिइत्येतावतैवतुल्ययोगितालंकारापत्तेः।किंत्वनेकगतत्वेनज्ञा
यमानधर्मत्वस्यैवतुल्ययोगिताप्रयोजकमितितदभावेतदंतर्गतिकथनमसमंजसमेव।अथप्रागुक्तोदाहरणयोस्त
मानमस्तीत्याग्रहस्तथापिनपूर्वोक्तलक्षणस्यात्रसंभवः।धर्मार्थइवपूर्णश्रीस्त्वयिराजन्विराजतइतिप्रकृतयोरुपमाया
मतिव्याप्तिवारणार्थमनेकानुगतधर्मत्वपर्याप्तविषयतासंबंधावच्छिन्नावच्छेदकताकचमत्कृतिजनकताश्रयज्ञानवि
षयधर्मत्वमितिविवक्षायास्तत्राव्यापकत्वात्।प्रकृतेचहितत्वाहितत्वादिविषयस्याधिकस्यानुप्रवेशादितिविभावनी
यम्।गुणोत्कृष्टैरिति।गुणैरुत्कृष्टाःश्रेष्ठास्तैरित्यर्थः।समीकृत्य·साम्यंविवक्ष्य·वचइति।वचनंवचःप्रतिपादनमि
तियावत्।अर्थाःसाधारणधर्मस्य।अन्यस्येति।धर्मस्यावर्ण्यावर्ण्यगतत्वादुक्तविलक्षणत्वमित्यर्थः।पाशोस्यास्तीतिपाशीवरु
णः।प्रचेतावरुणःपाशीत्यमरः।श्रीदःकुबेरः।शक्रइंद्रः।लोकपालपदंचेंद्रादिरूढं।रात्रिंतुयोगमात्रप्रयुक्तम्।संगता
नीति।संगतानिसंगमः।तडितोविद्युतोविलसितानि।उल्लसितानिघनेनिबिडेयथाभवतितथा।आरब्धानीतिसंगमप
द्वे।घनेमेघेआरब्धानीतिचतडिद्विलसितपदेर्थः।काव्यदर्शे।एतन्नामकदंडिकृतग्रंथेदर्शिता।तुल्ययोगितापदवा
च्यत्वेननिर्दिष्टा।किंचित्आलंकारिकाःव्यवजह्रुःव्यवहृतवंतः।ख्यातेषु।गुणवत्त्वेनप्रसिद्धेषु।युवामेवेति।इहमूलो
केवलैःसैन्यैः।अत्रचसैन्यजलयोःप्रसरणशीलत्वादिसादृश्याद्बिंबप्रतिबिंबभावेदमाश्रित्यधर्मैक्यंबोध्यम्।मतांतरे
क्षिति।बहुवचनेनबहुसंमततयाद्युक्ततुल्ययोगितायामस्वरसोध्वन्यते।सचदीपकतुल्ययोगितयोर्भेदकथना
वसरेव्यक्तीभविष्यतीतिसंक्षेपः।इतिश्रीमत्तत्सत्अलंकारचंद्रिकायांतुल्ययोगिताप्रकरणम्।दीपकंलक्षयति।वदं
तीति।वर्ण्यावर्ण्यान्वितैकचमत्कारिधर्मोदीपकमित्यर्थः।कलभःकरिशावकः।मानक्रियेति।क्रियारूपैकधर्मान्वयउ
र्थः।अत्रापिक्रियाविशेषणीभूतयोर्भेदप्रतापयोर्बिंबप्रतिबिंबभावोबोध्यः।यथावेति।शाणेननिकषपाषाणेनोल्लीढ
उल्लिखितोमणिः।तथाहेतिभिरायुधैर्निहितःक्षतःस्थितःसमरेसंग्रामेविजयशीलोयोद्धा।मदेनक्षीणोनागोहस्ती।शरला
लक्ष्याना।निष्पंकानिपुलिनानिजलनिर्मुक्ततटानियासांताःसरितोनद्यःकलामात्रावशिष्टश्चंद्रःरतेमर्दिताचुंबनालिंगनायु
पमर्दग्लपितांगीबालानववयोवनावनितास्त्री।एवमर्थिषुयाचकेषुगलितःसंक्रांतोविभवोयेषांतेनृपाःश्रतक्षिमातनोःकशस्य
भावेनशोभंतेइत्यन्वयः।शाणस्तुनिकषःकषइत्यमरः।शोभैकेति।शोभारूपैकधर्मेत्यर्थः।पूर्वोदाहरणआदिदीपकमि
हत्वंतदीपकमितिभेदः।प्रस्तुताप्रस्तुतसाधारणधर्मस्यदीपकपदंवाच्यतायांबीजमाह।प्रस्तुतेकत्यादि।प्रस्तुतेकमि
ष्टःप्रस्तुतैकपरःप्रस्तुतान्वयविवक्षायामिहितयावत्।रथ्यायामिवेत्यनेनतरमुपकरोतीत्यनुव्यज्यते।इतीतिचाध्या

कुव. सूर्य इति दीपस्यादृश्यात्समानो धर्मो दीपकमुच्यते इति शेषः। यत्र धर्मस्य पूर्वं प्रस्तुतेन्वयः। पश्चादन्यत्र यथोक्तोदाहरणयोस्त
टी. त्रैवेतरत्र प्रसंगोपकारित्वमित्याशयेन नञ् कृते। यद्यपीति। सुवर्णेति। सुवर्णमेव पुष्पं यस्या इति विग्रहः। त्रयः। गुणत्रया
१८ न्वितमयुक्तः। स्मरश्चेत्यादि प्रत्येकं चकारो नैरपेक्ष्यद्योतकः। कृतविद्यः। प्रख्यातविद्यः। एतच्च प्रासंगिकं पद्यम्। यदा यत्प्रसं
18 गोपद्यते तदा तस्य प्रस्तुतत्वमितरयोस्त्वप्रस्तुतत्वमिति बोध्यम्। युगपदिति। त्रयस्त्रिन्वेति इति त्रिष्वपि युगपदन्वय इत्यर्थः। चि
न्वेतीति बहुवचनात्तस्य प्रस्तुतमात्रेणैकवचनान्तेन पूर्वमन्वयायोगादिति भावः। समाधन्नेतत्यापीति। प्रासंगिकत्वे प्रसंगोप
कारित्वं नेहीयत इति। तथा च धर्मस्य पश्चादन्वयो न तत्र प्रयोजक इति भावः। किं तर्हि प्रयोजकं तत्राह। वस्तुगत्येति। प्रस्तुतो
द्देशेन प्रस्तुतोद्देशकान्वयेच्छया प्रवृत्तस्यैव धर्मस्यान्वयाभिहितस्यैव। वर्णनस्य कर्मव्युत्पत्त्यात तद्विषय धर्मस्य तथा च चमत्कारा
य प्रस्तुताप्रस्तुतान्वितस्वार्थं बोधयत्विति इच्छयोच्चारितपदाभिहितधर्मस्योभयत्रान्वयेप्युद्देश्यतास्येच्छाविषयता प्रस्तुत
एव न त्वप्रस्तुते। किंतु विशेषणतास्यविषयैवेति। तथा विधोद्देश्यता विरह एव प्रासंगिकत्वे बीजमित्याशयः। एतदेवो
पपादयति। नहीति प्रासंगिकत्वमिति। दीपसूर्ययोरुभ्यातिथ्य विषये प्रसंगोपकारित्वमित्यर्थः। तथा च त्वन्मते तत्र प्रासंगिक
त्वेन स्यादिति भावः। इदमुपलक्षणं जामातृ विषये प्रासंगिकत्वापत्तिरपि बोध्या। एतदेव तुल्ययोगितातो भेदकमित्याह। तुल्य
योगितायां त्विति। ननु द्देश्यत्वानुद्देश्यत्वयोश्चमत्काराप्रयोजकत्वान्नालंकारभेदप्रयोजकत्वमपि कमित्यस्वरसादाह। अ
यं चेति। मृग्यं वक्ष्यमाणः। अनयोः दीपकतुल्ययोगितयोः। अत्र दीपके उपमानोपमेयभाव इत्यनेनतरं गम्य इति शेषः। तत्र
तुल्ययोगितायां विशेषाग्रहणेन। प्रस्तुताप्रस्तुतत्वरूपव्यवस्थापकाभावात्। ऐच्छिकः। अव्यवस्थितः। सः उपमानोपमेय
भावः। न त्वास्तु। नैतावतापि तुल्ययोगितातो दीपकस्य पृथग्भाव उचितः। धर्मस्य सकृद्वृत्तित्वरूपमूलाया विच्छित्तेरविशे
षात्। अन्यथा तुल्ययोगितायामपि धर्मिणां केवलप्रकृतत्वस्य केवलाप्रकृतत्वस्य च विशेषस्य सत्वात्। अलंकारोद्भेताय
ते। तस्मात्तुल्ययोगिताया एवैते विध्यमुचितमित्याहुः॥ इत्यलंकारचंद्रिकायां दीपकप्रकरणम्। त्रिविधमिति। दीपकस्यावृ
त्तौ आवृत्तिदीपकं भवेत्तच्च त्रिविधमित्यर्थः। वर्षतीति। शर्वरी रात्रिः वर्षति वर्षणमिवाचरतीत्यर्थः। कदंबानि कदंबकुसुमा
नि। उन्मीलंति विकसंति। कुटजाद्रुमाः कुटजकलिकाः स्फुरंति विकसंति। नृपाश्चातका माद्यंति। शिखावला मयूराश्च माद्यंतीत्यन्व
यः। त्रैविध्यमुपपादयन्नेव व्याचष्टे। दीपकस्येति। आद्ये त्विति। अलंकारसंपादकत्वान्न। नकथितपदत्वदोषः। द्वितीये विकाश
रूपार्थस्यावृत्तिः। उन्मीलंति। स्फुरंति इति शब्दभेदेन तस्यैव बोधनात्। तृतीये तु द्वयोरावृत्तिः स्फुरेवेति। उत्कंठयति। मेघानामा
लापंक्तिः कलापिनां मयूराणां वर्गं समूहं उत्कंठयति ऊर्ध्वकंठोयस्य तादृशं करोति। तथा मकरध्वजः कामः यूनां मानसमुत्कंठत्यु
त्कंठं करोतीत्यर्थं भेदेपि शब्दावृत्तिः। भ्रामयतीति। जलधरस्य मेघस्य धारापंक्तिश्चातकतरुणानां चिरकालमुपनतां प्रा

मांतरं च पिपासां शमयति वध्वा लोचनयोर्जलधरा अश्रुपंक्तिः प्रकामिनां प्रवासे छादयतीत्येक एव नाशरूपोऽर्थः श
ब्दभेदेऽपि क्रमादित्यर्थावृत्तिः। वदनेनेति। पाथसां जलानां। अत्र निलीयंते पाण्डुस्य तदर्थस्य तिरोधानस्य चावृत्तिः। ननु प्रस्तु
तार्थस्य सकृदुपादानस्य प्रसंगादप्रस्तुतोपकारित्वे दीपकमित्युक्तं न चावृत्तौ तत्संभवतीति कथमावृत्तिदीपकमुक्तमित्याशंक्या
ह। एवं चेति। रूपस्थानीयशब्दार्थयोरावृत्तौ चेत्यर्थः। प्रस्तुताप्रस्तुतेति। अंबुदमालादीनां विरहोपकतया केवलप्रस्तुतत्वात्॥
चेद्रविंवारविंदयोः अकेवलाप्रस्तुतत्वादिति भावः। दीपकच्छायेति। दीपकसादृश्यमित्यर्थः। तच्च प्रस्तुताप्रस्तुतोपकारयोज्ज्वलत्वव शि
त्वादौ कवेरेव वशेनास्तीति भावः। मात्रपदेन दीपकात्पृथगेवायमलंकारो न तत्प्रभेद इति सूचितम्। अत एव दंडिनाऽर्थावृत्ति
पदावृत्तिरुभयावृत्तिरित्यपि दीपकस्थानमेवेदमलंकारत्रयं यथेत्युक्त्वा विकसंतीत्याद्युदाहृतम्। दीपकस्थाने स्थानापु
न्नमिदमिति यावत्। इत्यलंकारचंद्रिकायामावृत्तिदीपकप्रकरणम्। सकृद्धर्मोक्तिप्रसंगादसकृद्धर्मोक्तिगम्यवाक्यार्थ
सादृश्यकं प्रतिवस्तूपमालंकारं लक्षयति। वाक्ययोरिति। द्विवचनमनेकाभिप्रायम्। मालानुरोधादिति वा ध्येयम्। एक
सामान्ये एकस्मिन्समानधर्मे सति। सूरः। सूर्यः। लक्षणं व्याचष्टे। यत्रेति। उपमानोपमेयेति। भावप्रधानं उपमानो
पमेयभावपरयोरित्यर्थः। पृथगिति। भिन्नशब्देनेत्यर्थः। अयमेव च वस्तुप्रतिवस्तुभाव उच्यते। स्मेरेति। प्रोल्लीस
हत्वा। रत्नमेव दीपो रत्नदीपः। अत्र पूर्वार्द्धमुपमेयवाक्यम्। उत्तरार्द्धमुपमानवाक्यम्। उभयत्र च नाशाभावरूपः
समानधर्मः शब्दभेदेनोपात्तः। सामान्याभावमात्रबोधकस्यापि बाधते रत्ननाशरूपविशेषपरत्वात्। अयमेव च पू
र्वोदाहरणाद्भेदः। तवेति। ईश्वरं प्रति भक्तस्योक्तिः। अमृतप्रस्रवशीलेन तव पादपंकजेन निवेशितमात्मांतःकरणं येन
तादृशो भक्तः। अस्मदमृतातिरिक्तफलं कथमिच्छति न कथमपीत्यर्थः। अमृतं च ब्रह्मानंदरूपं हि निश्चितं मधुव्र
तो भ्रमरः मकरंदेन रसेन निर्भरे व्याप्तेऽरविंदे स्थिते सति इक्षुरकं न वीक्षते इत्युपमानवाक्यम्। इक्षुरके तालमखा
ण इति प्रसिद्धौषधीपुष्पम्। अवर्जनीयस्येति। अनिच्छयापि स्वसामग्रीवशाज्जायमानस्येत्यर्थः। इच्छापूर्विकेति। तथा च
वीक्षतेरिच्छापूर्वकेवीक्षणे लक्षणेति भावः। इच्छापर्यवसित इति। सविशेषणे हीति न्यायादिति भावः। उन्मील
न्तिकदंबानीति पूर्वोदाहृतायामर्थावृत्तावतिव्याप्तिमाशंक्याह। अर्थावृत्तिरित्यादि प्राच्यावृत्तौ तु धर्मस्यैकेनैव श
ब्देनावृत्त्याबोधनान्नहि भिन्नशब्दबोध्यत्वमिति नातिव्याप्तिरतोऽर्थावृत्तिपर्यंतानुधावनम्। एवं च भिन्नशब्दबोध्यैकधर्म
गम्यं प्रस्तुताप्रस्तुतवाक्यार्थसादृश्यं प्रतिवस्तूपमेति लक्षणं बोध्यम्। दृष्टांतालंकारेऽतिव्याप्तिवारणाय भिन्नशब्दबो

धोरिति। तत्र तु द्विव प्रतिबिंबभावापन्नधर्मगम्यसादृश्यमिति व्याप्तिः। दिवि भाति यथा भानुस्तथा त्वं भ्राजसे भुवीत्यादि
वाक्यार्थोपमायामतिव्याप्तिवारणाय गम्यमिति। अर्थावृत्तिवारणाय प्रस्तुताप्रस्तुतेति। आननं मृगशावाक्ष्या वीक्ष्य लोला
लकावृतं भ्रमद्भ्रमरसंकीर्णं स्मरामि सरसीरुहमिति स्मरणालंकारेतिव्याप्तिवारणाय वाक्यार्थेति। अत्र हि दिवि भातीति वा
क्यार्थोपमायां गगनाधिकरणकशोभाश्रयभानुसदृशो भूम्यधिकरणकशोभाश्रयस्त्वमिति प्रतीतिवन्न स्मर्यमाणे तादृशस
रोरुहसदृशं तथाविधमाननमिति प्रतीतिर्येन वाक्यार्थगतोपमा गम्या स्यात्। किंतु स्मरणसंपन्ना तादृशसरोरुहसदृशं ता
दृशमाननमिति पदार्थगतोपमैवेति तद्वारणमिति दिक्। प्रस्तुताप्रस्तुतयोः प्रमत्कृतिविशेषाप्रयोजकतया नालंकारत्वे
दप्रयोजकत्वमित्यस्वरसादाह। अयं चेति। वक्ष्यमाण इत्यर्थः। विद्वानेवेति। यद्यन्ययोगव्यवच्छेदार्थेनैवकारेण विद्वान्जा
नातीति पूर्ववाक्यार्थस्य च न हि वेधोत्युत्तरवाक्यार्थः। स धर्मश्च। तथापि रूपवत्त्ववाकाश इत्यादिप्रयोगवारणाय भावान्वय
स्याप्यावश्यकतया विद्वान्जानातीति वाक्यार्थस्यापि प्रतीतेस्तदभिप्रायेणैव वैधर्म्योदाहरणं बोध्यम्। ननु वैधर्म्येणोपमेति
व्याहतं तस्याः साधर्म्यरूपत्वादिति चेत् वैधर्म्येणोपन्यस्ते न हि वेधेति वाक्यार्थेनाक्षिप्तस्यापि तु प्रसविमेव जानातीति वाक्या
र्थस्योपमानत्वेन विवक्षणात्। मुखतो वैधर्म्यप्रतीतावपि साधर्म्य एव पर्यवसानान्न दोषः। वैधर्म्येणेत्यस्य च वैधर्म्यद्वारेत्य
र्थः। यदि संतीति। एवकारो भिन्नक्रमः। स्वयमेव विकसंति प्रकाशंत इत्यर्थः। अत्रापि गुणाः स्वयं प्रकाशंत इति भावान्वयविधर्मः।
कस्तूरिकामोदः शपथेन न ज्ञायत इति वाक्यार्थस्तदाक्षिप्तेन किंतु स्वयमेव प्रकाशत इति वाक्यार्थः। न चोपम्यं गम्यमिति पूर्ववद्
वैधर्म्योदाहरणत्वसंगतिः। यत्तु केचिदुक्तम्। विद्वानेवेतिपद्यं भवतु नाम कथंचिद्वैधर्म्योदाहरणं यदि संतीति तु न युक्तं। वै
धर्म्योदाहरणं हि प्रस्तुतधर्मिविशेषोपारूढार्थदार्ढ्याय स्वाक्षिप्तस्वव्यतिरेकसमानजातीयस्य धर्मीतया रूढस्याप्रकृतार्थ
स्य कथनं। यथा वंशभवो गुणवानपि संगविशेषेण पूज्यते पुरुषः। न हि तुंबीफलविकलो वीणादंडः प्रयाति महिमानमित्यादौ
अत्र हि संगविशेषेण पूज्यत इति प्रकृतार्थाक्षिप्तस्य संगविशेषेण विना न पूज्यत इति स्वव्यतिरेकस्य सजातीयो न हि तुंबीफल
विकल इति अप्रकृतार्थो निबद्ध इति वैधर्म्योदाहरणत्वम्। यदि संतीत्यत्र तु स्वयं प्रकाशंते न परेणेत्यस्य प्रस्तुतस्यैव सजातीयो
प्रकृतार्थः। शपथेन विभाव्यते किंतु स्वयमेवेति प्रकृतार्थानुरूपतयैव पर्यवसानादिति तत्रेदं वक्तव्यं। वंशभव इत्यादिमेव
दुदाहृतपद्येपि कथं वैधर्म्योदाहरणत्वं नहीत्यादेस्तुंबीफलविकलो महिमानं न प्रयात्यपि तु पूर्वोक्त इति प्रकृतार्थानुरूपत
येव पर्यवसानादिति किं बहुना सर्वत्रैव वैधर्म्योदाहरणे साधर्म्यपर्यवसानं विनानोपमानिर्वाह इति तदुच्छेदप्रसंगः। अथा
पातप्रतिपन्नेनाप्रकृतवाक्यार्थेन वैधर्म्यं तदुदाहरणत्वे तर्हि प्रकृतेपि तदस्तीति तुल्यं। यदपि प्रस्तुतेत्यादि वैधर्म्योदाहर

एतन्निर्वचनं तदयुक्तम्। नरा: परेषां विशङ्कारूतामगुदं धात्यवाते स्थिरतो हि पांसव इति वैधर्म्यदृष्टान्ताव्यापनात्।
न ह्यत्र प्रस्तुतवाक्यार्थ:। स व्यतिरेकमाक्षिपति किं त्वप्रकृतवाक्यार्थ एवेति दिक्। इत्यलङ्कारचन्द्रिकायां प्रतिवस्तूपमा
प्रकरणम्। दृष्टान्तालङ्कारं लक्षयति। चेदिति। वाक्ययोरित्यनुवर्तते। धर्मयोरित्यध्याहार्यम्। तदिति। तद्दर्शकम्।
मर्पितो वा चेद्यत्रेति यत्र काव्ये। तथा चोपमानोपमेयवाक्यार्थघटकधर्मयोर्विंबप्रतिविंबभावो दृष्टान्तलक्षणका
र्यमिति। अनेन प्रकृतराजविशेषेण राजन्वती भूम न राजवती। राजन्वान्सौराज्ये इति निपातानहज्ञा एषस्विन्यादीनिस
प्रविंशतिस्तारास्तदितरा: गोवलीवर्दन्यायात्। ग्रहभौमादय: संकुला व्याप्ता ज्योतिष्मती प्राशस्त्ये मतुप्। अत्र राजन्वती
ज्योतिष्मती त्वनयोर्विंबप्रतिविंबभाव:। पूर्वोदाहरणे कीर्तिकोत्तो विंबप्रतिविंबभावप्रयोजकमनोहारित्वरूपसाधर्म्यमर्थ:।
इह तु राजज्योतिषो: प्राशस्त्यरूपं तच्छाब्दमिति भेद:। देवीमिति। देवी वाचं सरस्वती वह्वव उपासते हि सेवन्त एव हि शब्दस्यैवका
रार्थत्वात्। तत्परं सरस्वतीसेवधिसारं स्रोतोऽसौ गुरुकुलक्लिष्ट: अध्ययनश्रमवान्मुरारिनामा कविर्नितरामतिशयेन
जानीते। अत्र दृष्टान्तमाह। वानरभटैः शीघ्रमिरब्धिर्लंघित एव। किं तस्याब्धेर्गंभीरतापातालपर्यंतनिमग्नापीवरास्थू
लातनुर्य एवं भूतो मन्थाचलो मंदराद्रिरेव जानातीति दृष्टान्तोदाहरणत्वसंगतिमाशंकते। नन्विति वाक्ययोरिति। सप्त
मी एकधर्म इत्यनेनतरं प्राक् भेदेन निर्दिष्ट इति शेष:। सागरे स्यादि सागरस्याधस्तनो योऽवधिरिति गंभीरतापदार्थकथने
संस्पर्शस्तु लक्षणया ज्ञानात्स्वार्थ इति बोध्यम्। तथा च धर्मभेदान्न प्रतिवस्तूपमा किं तु सारस्वतसारज्ञानसागराधस्तनावधि
संस्पर्शयोर्विंबप्रतिविंबभावाद् दृष्टान्तालंकार एवेत्याशय:। वर्षत्यंबुदमालेयं वर्षत्येषा च शर्वरीति वस्तूपमयोर्हि वप्रस्तु
ताप्रस्तुतेति दृष्टान्त: प्रस्तुताप्रस्तुतविषय: पदावृत्तिस्तु तदन्यतरमात्रविषयेत्यपार्थ:। यद्यप्यजात्मनैव परस्मैपदभेदेन पद पद
भेदान्न पदवृत्तिशंकोचिता तथापि पाठपरिवर्तनेन पदाभेदेन पदार्थैरयं विषय इति बोधयितुमेतदुक्तमयं दृष्टान्त:। कृत
चेति। नृपं प्रति मन्त्रिण उक्ति:। हे राजन् त्वया मनोगर्विस्याभिमुखं न तु गर्वितं कृतं च किमन्यदपेक्षितमिति शेष:। एवं शस्त्रप्रयो
गादिकं विनानोऽस्माकं द्विष: शत्रवो निहता न तु हन्यन्ते। अंशुमान्सूर्यो यावदुदयाद्रिमौलितां शिरोऽलंकारित्वं नायाति तावदे
व तमांसि तिष्ठन्ति तस्मिंस्तु तथाभूते न तिष्ठन्तीति दृष्टान्त:। अत्र मनोगर्वाभिमुखीकरणवैरिहननयोरंशुमदुदयाचलमस्तका
नागमनतम:स्थित्योश्च यथाक्रमं वैधर्म्येण विंबप्रतिविंबभाव:। इत्यलंकारचन्द्रिकायां दृष्टान्तालंकारप्रकरणम्। निदर्शनां ल
क्षयति। वाक्यार्थयोरिति। सदृशवाक्यार्थसंबंधी य ऐक्यारोप:। उपमेयवाक्यार्थे उपमानवाक्यार्थाभेदारोप इति यावत्। यद्दातुरि
ति। दातु: सौम्यतेति यदिति सामान्ये नपुंसकम्। सेयमिति। विधेयाभिप्रायं स्त्रीलिंगं। यत्तद्भ्यामिति। यद्यपि मुखचन्द्र इति वहन्तु:
सौम्यतादौ पूर्णेन्दोरकलंकतेत्यत्रतावताप्यैक्यारोप: संभवति तथापि यत्तद्भ्यां शीघ्रं स्फुटतया तदवगमात्तदुपन्यास:। अरण्येति।

ख

कु॰ व॰ अबुधो मूर्खजनः सेवते यदिति गुणीम्नतं सेवनक्रियापरामर्शः। उत्तरार्धे वाक्यगतेन यच्छब्देन तच्छब्दाक्षेपात् तत् अरण्य
टी॰ रुदितं कृतमित्याद्यन्वयः। उद्धर्तनेयं यवगोधूमादिचूर्णेन मलापकर्षणम्। स्थले निर्जले देशे अम्बुजं जलजं ऊषरे अंकुरा
२० रोपणमारम्भ भाजे• श्वनः पुच्छं श्वपुच्छं अवनामितं ऋजुतासंपादनाय नम्रीकृतम्। बधिरस्य कर्णजप एव जापः प्रला
पइत्यर्थः। अन्धस्य मुखे तत्संमुखं दर्पणं धृतं इति एवं निरर्थकत्वेन सदृशानामनेकेषां वाक्यार्थानामबुधजनसेवनरू क्याः
20 पवाक्यार्थे ऐक्यारोपः। पूर्वत्र त्वेकस्यैवैक्यारोप इति शेषः। निदर्शनोत्तरमाह। पदार्थेति। पदार्थवृत्तिं पदार्थसंब
धिनीम्। एके आलंकारिका अन्यां पूर्वोक्तविलक्षणां। त्वन्नेत्रेति। नीलाम्भोजं नीलाम्बुजन्मनोः नीलोत्पलयोः। वियोग इ
ति। गौडदेशागतानां नारीणां वियोगे स्वकान्तवियोगकाले यो गंडतलं कपोलौ दाडिमापाण्डुवर्णो भवति सः खर्जूरीमंज
रीगर्भस्य पुरेणु अदृश्यत इत्यन्वयः। उपमाने यथोक्तरेणुरूपे उपमेये उपमानधर्मारोप एवं पदार्थनिदर्श
नायाः प्राचीनैरुदाहरणात्कथमियं पदार्थनिदर्शनं च यत इति शंकायामाह। उभयत्रेति। उपमेयोपमानधर्मारो
पे उपमाने उपमेयधर्मारोपे चेत्यर्थः। तथा चौपम्यपर्यवसायित्वस्यैव पदार्थनिदर्शनात्वेनारोपविषयस्याप
त्वयत्वे निवेशप्रयोजनाभावदितापि सा युक्तैवेति भावः। नन्वेवं सति वाक्यार्थनिदर्शनालक्षणस्यात्रातिव्याप्तिरित्याशंकाश
यवानाह।। यद्यपीति। वियोगकालीनगौडनारीगंडतलपांडिम्नः खर्जूरीमंजरीगर्भरेणुदृष्टपांडिम्नश्च यत्र द्वयोरैक्यारोप
सत्त्वादिति भावः। अर्थविशेषविवक्षायातिव्याप्तिं परिहरन्नेव स्वाभिमतं निदर्शनाद्वयविभागं दर्शयति। तथापीति। विशिष्ट
८- योर्बिंबप्रतिबिंबभावापन्नधर्मविशिष्टयोः। एवं च वाक्यार्थद्वारेणैव तादृशार्थविवक्षा द्वियोग इत्युदाहरणे नातिव्या णा:
प्तिरिति भावः। उपमानेत्यादि। एतच्च स्वरूपकथनत्वेन रूपेण लक्षणे निवेशः। ताद्रूप्यरूपकातिव्याप्तिवारणायोपमाकल्पक
त्वस्यारोपविशेषणस्यावश्यकत्वेनोपमाकल्पकस्तत्र तदन्यधर्मारोपस्येतावत एव लक्षणस्य निर्दुष्टत्वात्। तदुक्तम्। अभव
न्वस्तुसंबंध उपमादिकल्पक इति। ताद्रूप्यरूपके तु ताद्रूप्यावच्छिन्नाभेद एव विवक्षितो न पुनरुपमेति तद्वारणे निर्दुष्टत्वा
त्। त्वयि सतीत्युदाहरणे कापि निदर्शना न स्यात्। अन्यधर्मस्यान्यत्रारोपात्। एकवाक्यत्वेन वाक्यार्थभेदाभावाच्च पदार्थवाक्या
६ ४ निदर्शनयोरसंभवादित्याशंकामाह एवं चेति। उक्तव्यवस्थाश्रयणे चेत्यर्थः। विशिष्टयोरिति बिंबप्रतिबिंबभावापन्नवस्तुविशि
ष्टयोरित्यर्थः। तत्र तावत्पूर्वपद्ये भोः शिव अस्मदभ्यर्थितानां दातरि त्वयि सति इतरं क्षुद्रं प्रभुमनुसरतोऽर्थितानो मुद्रां विडं
दर्शयंतो वयं कामधेनोः स्थितायां दोग्धुकामाश्चरमयोः पाश्वासयोश्चरयोः पीते दुग्धे हं दुःखेन ग्रासं करभमनुष्ठ्विस्म समनु
सरामः इत्यर्थके सकलकामदमहेश्वरकालीनक्षुद्रधनिकानुसरणकर्तुः कामधेनुस्थितिकालीनतथाविधकरभानु
सरणकर्तुश्चैक्यारोपः। तत्रोपमानकोटिविशेषणयोः कामधेनुकरभयोरुपमेयकोटिविशेषणयोश्च महेश्वरक्षुद्र

धनिकयोर्यथाक्रमं बिंबप्रतिबिंबभावो बोध्यः। एवमनुसरणयोरपि। एवं दोर्भ्यामित्यत्रापि। अधिगुणस
म्बन्धयोर्बिंबप्रतिबिंबभावो बोध्यः। नन्वियमवस्था मूलविरुद्धेत्याशंक्याह। अर्थयोरिति। ननु वाक्यार्थयोः साम्यात
द्वाक्यार्थे साधारणानेकपदार्थपरत्वेनैवोक्तोदाहरणसंग्रहसंभवादेवं विधगुरुतरार्थपरत्वेनयुक्तमित्यत
आह। एवं चेति। एवं विधार्थविवक्षणे चेत्यर्थः। अवलेहनं जिह्वयास्वादनम्। पंचाननः सिंहः तस्य परिष्वंगः आ
लिंगनम्। व्याली भुजंगी। आशाक्यत्वे बलवदनिष्टजनकत्वं च साधारणो धर्मः। प्रस्तुतवृत्तांतो राजसेवा।
निदर्शनायाः तल्लक्षणस्य न क्षतिरिति व्याप्तिस्तयोः प्रस्तुताप्रस्तुतवृत्तांतयोः असिधारादिभिः समं राज्ञो बिंब
प्रतिबिंबभावान्नहि शिष्टयोरैक्यारोपादिति भावः। एवं तर्हि सदृशयोरैक्यारोपकत्वेव लक्षणमस्त्वित्याशंक्याह।
अत एवेति। एतादृशा विशेषणेन वलक्षणादेवेत्यर्थः। भेदो व्यावृत्तिः। तथा च तदभावे रूपकेति प्रसंगः स्यादिति भा
वः। कथमनेन तद्वारणं तत्राह। रूपकेति। अविशिष्टयोर्बिंबप्रतिबिंबभावापन्नवस्त्वविशिष्टयोः बिंबप्रतिबिं
बभावापन्नेत्यस्य व्यावृत्तिं दर्शयति। अंघ्रिदंड इत्यादि। बलिदैत्यस्य निग्रहे बंधने कर्त्तव्ये ऊर्द्ध्वमुत्क्षिप्तो हरेरंघ्रिदंडो
वो युष्माकं मुदेस्त्विति संबंधः। कीदृशो विधेर्ब्रह्मणो विष्टरस्यासनं तद्रूपस्य पद्मस्य नालदंड इत्यर्थः। विशिष्टरूपकेति।
ऊर्द्ध्वोत्क्षिप्तत्वविशिष्टांघ्रिदंडविधिविष्टरपद्मसंबंधित्वविशिष्टनालदंडसंबंधि रूपकेत्यर्थः। विशेषणेति। ऊर्द्ध्वोत्क्षिप्तत्वरूपोपमेय
विशेषणविधिविष्टरपद्मसंबंधित्वरूपोपमानविशेषणयोरित्यर्थः। एवकारस्तत्रापि बिंबप्रतिबिंबभावव्यतिरेकं स्फुरयति। यद्वा
तुरिति। अभावादिति। सादृश्याभावादिति भावः। रूपविशेषेति व्याप्तिमाशंक्य परिहरति। यत्रत्वित्यस्य इति। सावयवरूपकोदाहरण
इत्यग्रे तेनेनान्वयः। विषयविषयिविशेषणानां आरोपविषयारोप्यमाणसंबंधिनां विशेषणानां। ज्योत्स्नेति। इयं रात्रिरेव का
पालिकी द्वीपात् द्वीपं भ्रमतीत्यन्वयः। एतत्प्रधानरूपकं। एतदंगभूतान्यपराणि विशेषणैः प्रतिपाद्यंते। यथा ज्योत्स्नारूपेण
भस्मनाय च्छुरणं मंगलेपस्तेन धवला। तारकारूपान्यस्थीनि बिभ्रती। अंतर्धानस्य व्यसने कौतुके रसिका। चंद्ररूपे मु
द्राकपाले न्यस्तं लांछनस्य छलेन सिद्धाञ्जनपरिमलचूर्णं दधती धारयंती दीक्षाकालगृहीतोपकरणेषु मुद्रोपपदना
म्ना पाखंडानां व्यवहार इति चंडीदासः। मुद्रापरिमलश्चूर्णं प्रशंसार्थी विस्पष्टज्योमुद्राचिह्नं तद्रूपे कपाल इति वार्थः। विषय
विषयिणः रात्रिकापालिकौ। तद्विशेषणानां तत्संबंधिनां ज्योत्स्नाभस्मादीनां यथाश्रुते रात्रिकापालिकीति समासस्योत्त
रपदार्थप्रधानतया ज्योत्स्नादीनां रात्रिविशेषणत्वाभावादसंगतेः। प्रत्येकमेवेति। शुद्धस्वरूपेणैवेत्यर्थः। नत्विति।
उक्तसुधा...विशेषणत्वाभावादिति भावः। वस्तुतो भस्मादेः कापालिकीप्रत्यपि न विशेषणत्वमपितु तत्कोटिनिविष्टत्व

कुव. टी. २१ ग

मेवेत्यत्रविषयेबोध्यम्। वाक्यार्थशब्दस्यबिंबप्रतिबिंबभावापन्नवस्तुविशिष्टार्थपरत्वमंगीकृत्यराजसेवेत्युदाहरणेवा
क्यार्थइतिनिविष्टत्वमेवेत्यर्थेनिदर्शनात्वमुक्तमुपसंहरति। तस्मादिति। उक्तलक्षणस्यव्यवस्थितत्वादित्यर्थः। मतांतरेति।
सदृशयोर्वाक्यार्थयोरैक्यारोपइतियथाश्रुतलक्षणांगीकर्तृमतइत्यर्थः। इह। राजसेवेत्युदाहरणे। पदार्थइत्येवेति। उपमा
कल्पकएकपदार्थेपरपदार्थतद्धर्मान्यतरारोपइतितल्लक्षणस्यतद्भिन्नमतत्वादितिभावः। निदर्शनांतरमाह। अपरामिति।
पूर्वविलक्षणामित्यर्थः। निदर्शनामित्यनुषज्यते। क्रिययासत्तत्सदर्थयोर्बोधनमपरांनिदर्शनांप्राहुरितिसंबंधः। सदसदर्थयो
रितिवक्तव्येपि छंदोनुरोधादित्थमभिधानं। समुद्राभ्राद्घइत्यादिसौत्रनिर्देशेनपूर्वनिपातानित्यत्वज्ञापनाच्चलक्षणंव्याचष्टे।
कस्यचिदिति। अत्रासतःसतोवेतिविभागकथनंनतुलक्षणांतर्गतं। उदासीनार्थबोधनेचमत्कारित्वाभावेनैवानतिप्रसं
गात्। स्वक्रिययासहकारिभूतयाक्रियाविशिष्टस्यवस्तुनःसंबंधिस्वार्थस्यबोधनंबोधानुकूलोव्यापारोयत्रनिबध्यते
वर्ण्यतेसानिदर्शनेतिलक्षणम्। अपनिवातपद्मोदरसोदराभ्यांविलोचनाभ्यामवलोकयंती। नकेवलंयूनिमनोभवेपिय
नक्किंचित्तपसःप्रभावमित्यादावतिव्याप्तिः। अवलोकनक्रियाविशिष्टयाकामिन्यातपःप्रभावबोधनस्यवर्णनादि
तिचेन्न। क्रिययेत्यनेनदृष्टांतविधयाबोधनस्यविवक्षितत्वात्। उक्तोदाहरणेचलिंगविधयाबोधकत्वेनतदभावात्। इत्थं
चदृष्टांततयाक्रियाविशिष्टस्यार्थबोधकत्ववर्णनमानंनिदर्शनेतिपर्यवसितम्। नश्येदित्यत्रबोधनस्यवर्णनात्कथमुदाह
रणत्वमतआह। तत्रेतिउदाहरणेइत्यर्थः। लक्ष्येलक्षणंसंगमयति। ततस्त्विति। बोधनस्यगम्यमानत्वाच्चेत्यर्थः। दृष्टांततमु
तयेति। दृष्टांतेस्वस्मिन्भूतयाविद्यमानयेत्यर्थः। दृष्टांतीभूतःसंजातोययेतिवा। एवंतमोवतःचंद्रस्यापिराजत्वंसोमो
वैब्राह्मणानांराजेत्यादिश्रुतिप्रसिद्धम्। अनिष्टपर्यवसायिनमर्थनाशरूपानिष्टसाधनंराजविरुद्धत्वरूपमर्थम्। उन्न
तमिति। योलघुरल्पबुद्धिरल्पपरिमाणश्चसःउन्नतंपदंउत्कर्षंउच्चस्थानंचावाप्यहेलयेवपतेदितिब्रुवन्कथय
न्शैलशृंगाग्रगतोगिरिमस्तकगतःपृषत्कणोजलबिंदुसमूहश्चारुणामंदेनापिमारुतेनधुतःकंपितोधःपततिउत्क
र्षाद्धीयते। अधोदेशेपततीत्यर्थः। धवमितिपाठेबोधनस्यपूर्ववद्गम्यमानत्वादप्रयोगः। पृषत्कणइतिपाठेपाषाण
कणइत्यर्थः। चूडेति। यउदयाचलमागतंदेवंरविंचूडामणेःपदेस्थानेमस्तकेधत्तेधारयति। किंकुर्वन्गृहमेधिनो
गृहस्थान्। हतश्रीमातिथेयीकार्येतिबोधयन्। आतिथेयीम्आतिथ्यम्। अत्रउक्तनिदर्शनात्रयविषयेकेचित्। यस्येति
व्यवहरंतिइत्यनेनान्वयः। धर्मिणोरिति। धर्मयोःसाम्यमात्रेणचमत्कारानिष्पत्तेस्तत्रतबिंबप्रतिबिंबभावेनध
र्मिणोःसाम्यावगतिरितिभावः। गम्भीकरोतीति। स्वविशेषणत्वेनस्वीकरोतीत्यर्थः। दृष्टांततयाबोधनस्यैवतत्र

विवक्षितत्वात्। एतदेवोपपादयति। बाधयन्नित्यादिना। करीषं शुष्कगोमयं तस्यायं करीषः। समर्थाचरणे समर्थक
रणे। सामर्थ्योपादनयावत्। भावप्राधान्यात्। उपमानभावेन दृष्टान्तत्वेन एवं प्रदर्शिते निदर्शनात्रये निदर्शनापद
प्रवृत्तिरिति निमित्तस्यैकस्याभावान्नानार्थ एव निदर्शनाभाव इति बोध्यम्। इत्यलंकारचंद्रिकायां निदर्शनाप्रकरणे।
व्यतिरेकं लक्षयति। व्यतिरेक इति। विशेषो वैलक्षण्यम्। उपमेयस्याधिकम्। उत्कर्षः। पल्लवत इति। पंचम्यर्थे तसिल्। क
ल्पतरोः पल्लवादेषं वक्ष्यमाणस्तेकरस्य विशेष इति संबंधः। एकपल्लवः परो हस्तः कर्णशोभेयं ति रसकृतेदानातिशये
नेति भावः। अत्रोपमेयस्य करस्योत्कर्षः। पूर्वोदाहरणे उन्नतत्वेनोपम्यशेषे इह तु रक्तत्वकोमलत्वादिप्रयुक्तं तद्रूप्य
मिति भेदः। तन्न्यूनत्वेति। उपमेयस्य न्यूनत्वे सर्थः। रक्तस्त्वमिति। अशोकं प्रतिविरहिणः कस्यचिदुक्तिः। हे अशोक त्वं वयोः
सर्वतुल्यं समानेऽप्यहं केवलं धात्रा सशोकः शोकसहितः कृतः। त्वं तु शोकरहितः कृत इति अशोकपदश्लेषादवगम्य
ते। तत्किं सर्वसमानं तत्राह रक्त इत्यादि। त्वं नूतनैः पल्लवैरक्तः रक्तवर्णः। अहमपि प्रियायाः श्लाघनीयैः सौंदर्यादि
भिरनुरक्तः। अथ स्त्रियां यां हे सखे त्वां प्रति शिलीमुखाः भ्रमरा आयान्ति मां प्रत्यपि स्मरेण धनुषा मुक्ताः प्रेरिताः
शिलीमुखा बाणा आयान्ति एवं कांताया पादतलस्याघातो यथा तव मुदे संतोषाय तद्वत्त्वया ममापि संतोषाय त्वर्थः।
कामिनीपादाघातेनाशोकस्य पुष्पोद्गम इति प्रसिद्धिः। अत्रोपमेयस्य सशोकत्वेनापकर्षः। अनुभयपर्यवसायी। उपमे
योत्कर्षापकर्षान्यतरपर्यवसानरहितः। दृढतरेति। कृपणस्य कृपाणस्य खड्गस्य च केवलमाकारतो दीर्घवर्णत आक
तेश्च भेदो वैलक्षण्यं प्रकारांतरेण तु साम्यमेवेत्यर्थः। कथं तत्राह। दृढतरेत्यादि। दृढतरं निबद्धो मुष्टिर्येनेति। कृपणपक्षे
धनव्ययभयेन मुष्टिमोचनाभावात्। खड्गपक्षे तु दृढतरं निबद्धः संबद्धो मुष्टिर्मुष्टिग्राह्यभागो यस्येत्यर्थः। कोशो भा
ण्डागारगृहं तत्र निषण्ण उपविष्टः। कृपणः कोशः विधानके निषण्णः स्थित इति खड्गपक्षे। सहजमलिनः स्वभावमलिनः। म
लिनवेषत्वात् कृपणः खड्गस्तु कृष्णवर्णत्वादिति। एवं किंचिद्धर्मप्रयुक्तसाम्यवत्तया प्रतीयमानयोः किंचिद्धर्मप्रयुक्तवैलक्षण्य
व्यतिरेकशरीरं वैलक्षण्यं तत्र क्वचिदुपमेयस्योत्कर्षे क्वचित्तदपकर्षे पर्यवसन्नं क्वचित्तु तदन्यतरपर्यवसन्नम्। विरहेऽपि
वैचित्र्यमात्रविश्रांतमिति बोध्यम्। एतेन चरमभेदद्वयतदुदाहरणद्वयं कस्यचिद्दोषापातरमणीयमिति विभासमानं प्रत्युक्तं
वेदितव्यम्। अस्तं तात्सारतया तु नानुवादार्हमित्युपरम्यते। इत्यलंकारचंद्रिकायां व्यतिरेकप्रकरणम्। सहोक्तिरिति। लक्ष
निर्देशः सहभाव इत्यादिलक्षणे। सहभावः साहित्यम्। जनरंजनः सहृदयजनाह्लादकः। एवं च चमत्कृतिजनक

साहित्यं सहोक्तिरिति लक्षणम्। दिगंतमिति। तस्य राज्ञः कीर्त्तिः प्रत्यर्थिभिः शत्रुभिः सह दिगंतमगमदित्यन्वयः। अत्र च तत्ती
यायां निरूपितत्वार्थकतया प्रत्यर्थिनिरूपितसाहित्यवती कीर्त्तिर्गमनाश्रय इति बोधे एकधर्मान्वयित्वरूपसाहित्यवत्ता
त्प्रत्यर्थिनामपि गमनान्वयप्रतीतिः। तदुक्तं। सा सहोक्तिः सहार्थस्य बलादेकं द्विवाचकमिति। छायेति। ग्रीष्मसंध्यावर्
णनमिदम्। छाया पांथैः स्वर्गैः समं सार्द्धं विटपिनां तरूणां तलं मूलदेशं संश्रयते। कुत इत्याकांक्षायामुत्प्रेक्षते आतिव
तिश्रमः आतपातिशयकृतो बाधाः। एवमग्रेपि। जडतेति। शीतलता ग्लान्येव सरोजलस्य मूलं मध्यदेशं मीनैर्मत्स्यैः सह याति
गच्छति। ग्लानिर्बलापचयः। तथाऽहिमाउषामंशवः करायसेवं भूतस्य खेदीधितिस्तत्पूर्ववसतीलोकैः समं अपोज
ल्लानिम्राचामंति। दीधितिः स्त्रियामित्यमरः। निष्क्रांते वसतीकांता जनैः सह गर्भगृहमभ्यंतरगृहं प्रविशतीति तत्रैव
तदुद्भवात्। क्रांतिस्तेजोहानिः सौकुमार्यातिशयेन तत्सौलभ्यात्। कांतापादानम्। इत्यादाविति। इंदुमतीस्वयंवरे रघु
वंशे। अनेन सार्द्धं विहराम्बुराशेस्तीरेषु तालीवनमर्मरेषु द्वीपांतरानीतलवंगपुष्पैरपाकृतस्वेदलवा मरुद्भिरि
ति पद्यं। अत्र सहोक्तिरचमत्कारित्वान्नालंकाररूपेत्यर्थः। इत्यलंकारचंद्रिकायां सहोक्तिप्रकरणं। विनोक्तिरिति। किंचि
द्विना प्रस्तुतं वर्ण्यं हीनमुच्यते चेत्तदा विनोक्तिर्नामालंकार इत्यर्थः। विद्येति। विनयसंपत्तिं विना या विद्या सा हृद्या मनोह
रापि दुष्टेत्यन्वयः। अत्र प्रस्तुता या विद्या या विनयं विना दुष्टत्वमुक्तम्। यश्चेति। यः पुरुषः स्वात्मा नैस्वांतःकरणं वि पं॰ पुरुष
गर्हितैर्निंदितैरामदर्शनैर्विनेति। रामकर्मकं रामकर्तृकं दर्शनं विनेत्यर्थः। अंतरेणापीति। तथा च विनोक्तिरित्यर्थग्र
हणं शब्दग्रहणमित्यर्थः। प्रकारांतरमाह। तच्चेदिति। तत्प्रस्तुतं किंचित् विना रम्यं चेत्सापि विनोक्तिः कथ्यत इत्यन्वयः॥
इत्थं च किंचिद्व्यतिरेकेण प्रस्तुतस्य रम्यत्वारम्यत्वान्यतरवर्णनं विनोक्तिरिति प्रकारद्वयसाधारणं सामान्यलक्षणं बोध्य
म्। यत्तु हृद्यो विनोर्थसंबंध एव विनोक्तिः हृद्यत्वं च विनाकृतस्य वस्तुनो रमणीयत्वारमणीयत्वाभ्यां भवतीत्यर्वाचीनैरुक्तं।
तदयुक्तं। कारणं विना कार्योत्पत्तिकथनरूपे विभावनालंकारे तिव्याप्तेर्वारणाय विनार्थसंबंधप्रयुक्तप्रस्तुतगतरमणी
यत्वादेरपि लक्षणे निवेशस्यावश्यकत्वादिति। आविर्भूत इति। विक्रमोर्वशीयनाम्न उर्वशीया मूर्च्छावर्णनमिदम्। इयं वरतनु
रेतः अतः करणे मोहेन मुक्तकल्पाऽपीषन्न्यूनमुक्तालसत्ते। केव। पूर्वरोधस्तत्तटस्य पतनेन तकलुषा। अनंतरं कालक्षा
पगमात्प्रसादेन नैर्मल्यं गृह्णाति आश्रयंती गंगेव। तथा प्राशीनि चंद्रे आविर्भूते उदिते सति तिमिरान्मुच्यमाना रात्रिरिवा। एवं
छिन्नोन्नतः मयि सेवधर्मो यस्या एवंभूतानि शिभवद्भुतभुजो वह्नेः रर्चिः शिखेवेति। दर्शितमिति। अर्थतो बोधितमित्य

ख

र्थः। इत्यलंकारचंद्रिकायां विनोक्तिप्रकरणं। समासोक्तिं लक्षयति। समासोक्तिरिति। प्रस्तुते वर्ण्यमाने अप्रस्तुतस्य अप्रस्तुत
वृत्तांतस्य परिस्फूर्त्तिश्चेत्तदा समासोक्तिरिति। अयमिति। इंद्रस्येयमैंद्री प्राचीमुखमादिभागः। वदनं च। रक्तो रक्तवर्णः अ
मि:= नुरक्तश्च चुंवनं संवंधः वक्त्रसंयोगविशेषश्च। यथा अस्तुतलक्षणस्य वस्तुसमाले अस्तावुदयमारूढः कांतिमान् रक्तमंडलः
राजा हरति सर्वस्य हृदयं मृदुलैः करैरित्यादि प्रकृताप्रकृतश्लेषेति व्याप्तेराह। विशेषणसाम्यवलादिति। विशेषणमात्र
साम्यवलादित्यर्थः। एवं च विशेषणमात्रसाम्यगम्याप्रस्तुतवृत्तांतत्वं लक्षणं वोध्यम्। उदाहृतश्लेषेचाप्रकृतनृपवृत्तांत
स्य विशेष्यवाचिनाश्लिष्टेन राजपदेनाप्यवगमान्नातिव्याप्तिः। संज्ञाप्रवृत्तिनिमित्तमवयवार्थं दर्शयति। समासेनेति। व
चनात् प्रतिपादनात्। लक्ष्ये लक्षणं संगमयति। अत्रेति प्रारंभः आदिभागः साधारण्यात् श्लिष्टत्वात्। यद्यपि चुंवतीत्यत्र न
श्लेषस्तथाप्यर्थद्वयवोधकत्वमात्रेण तस्य साधारण्योक्तिः। उपस्कृतादिति साधारण्यादित्यस्य विशेषणं तत्र चंद्रमः शब्दग
तेन पुलिंगेन नायकत्वाभिव्यक्तेरिति वोध्यम्। वृत्तांतः व्यवहारो मुख्यः। ऐंद्रीति स्वरूपपरं तद्गतेन स्त्रीलिंगेन तदर्थस्य नायि
कात्वाभिव्यक्त्या ऐंद्रीशब्दप्रतिपाद्ये इंद्रसंवंधित्वेन च परकीयत्वाभिव्यक्तेरिति वोध्यम्। वृत्तांतः व्यवहारो मुख्यः चुंवनरूपः
व्यावल्लादिति। नायिकानुरक्तस्य कस्यचित्तत्क्रीडालेवनं कंदुकं प्रत्युक्तिः। हे कंदुक रुमगया संदर्शीय तया नायिकया रस
स्पृत्ति विशेषात्। सादरमादरसहितं यथा स्यात्तथा यद्यस्मात्त्वं सेव्यसे तत्तस्मात्त्वं तीधन्योसीत्यन्वयः। कथमित्याकांक्षा
यां संसेवनक्रियां विशिनष्टि व्यावल्लादित्यादिना। व्यावल्लात्विशेषतः आसमंतात् च लत्कुचभारो यत्र तथा आकुलाः आ
उवेशेनेतस्ततः पर्यस्ताः कचाः केशा यत्र एवं व्यालोलाः दोलायिता हारावलिर्यत्र तथा प्रेंखच्च चलत्कुंडलाभ्यां शो
भायुक्तं गंडयुगलं यत्र। एवं प्रस्वेदयुक्तं वक्त्रांवुजं यत्र शश्वत् निरंतरं दत्तः करेण प्रहारो यत्र। तथाधिकश्वासो यत्र तथे
ति वृत्तांतैर्विपरीतरतरूपः। अत्रापि कंदुकशब्दगतपुल्लिंगेन नायकत्वाभिव्यक्तिर्वोध्या। श्लिष्टानीति। श्लेषमूलकाभेदा
ध्यवसायविषयाणीत्यर्थः। साधारणानीति। श्लेषं विनैव प्रकृताप्रकृतवृत्तांतयोरनुगतानीत्यर्थः। तथा च लक्षणे साम्य
कृतं= शब्देन श्लेषवर्त्मसारसिकं च साम्यं विवक्षितमितिभावः। सारूप्यात् सादृश्यात्। पुरा इति। उत्तरचरिते सीतात्यागानंतरं कदाचि
द्वनं प्रतिगतस्य भगवतो रामचंद्रस्येयमुक्तिः। पुरा वनवासिकाले सरित्तां नदीनां स्रोतः प्रवाहो यत्र प्रदेशे आसीत्तत्राधुना
पुलिनमस्तीति शेषः। तथा क्षितिरुहां तरूणां घनविरलभावो विपर्यासं वैपरीत्यं प्राप्तः। सांद्राणां विरलता। विरलानां शा
खापल्लवादिवृद्ध्या सांद्रता जातेत्यर्थः। तथा च वहोर्भूयसः कालात् अनंतरं दृष्टं इदं वनमपरमन्यदिव मन्ये परं तु
शैलानां पर्वतानां निवेशो विन्यासविशेषः। तदेवेदं वनमिति वुद्धिं प्रत्यभिज्ञारूपां द्रढयति दृढीकरोतीत्यर्थः। त

कु॰ व॰ टी॰ २३ 23

त्सारूप्यादिति। वनसारूप्यादित्यर्थः। ग्रामादौ किं वनसारूप्यमित्याकाङ्क्षायां तद्गर्भविशेषणमाह। कुटुंबिष्विति। कुटुंबिग
तो यो धनसमग्रासमग्रयोर्विपर्यासस्तेषां प्राप्तस्येत्यर्थः। तत्समाश्रयस्य तादृशकुटुंबिसमाश्रयस्य तथा च समग्रासमृद्धि
विपर्यासवदाश्रयत्वं सादृश्यमिति भावः। किमस्य तादृशस्योपस्थापकमिति चेत्। घनविरलेति। विपर्यासमिति च
ताभ्यामुक्तसादृश्यगर्भीकरणात्। एतेनैवासादृश्यगर्भविशेषणेनोत्थापितसादृश्यमूला समासोक्तिरिति मूलग्रं
थोनवबोधस्तद्विरोधश्चेति। दूषणमलग्नकं वेदितव्यम्। अथात्राप्रस्तुतवृत्तान्तस्य विशेषणसाम्यं तदभावादुक्तल
क्षणस्याव्याप्तिरिति चेन्न। विशेषणसाम्यगम्यसादृश्यगम्यत्वेपि विशेषणसाम्यगम्यत्वानपायात् प्राधान्यात्तु परं सा नस्य ४
रूप्यस्य गमकत्वोपदर्शनं सारूप्यादिति ग्रंथेन। एवमग्रेपि विशेषणसाम्यात्सादृश्याद्वेति विकल्पोप्येतदपि प्राधान्याभि
प्रायेणेति निरवद्यं। एवमलंकारं निरूप्य तद्भेदप्रकारमुपदर्शयितुं भूमिकामारचयति। अत्र चेति। अत्रैषूदाहर
णेषु। अप्रस्तुतवृत्तान्तस्येति। अप्रकृतजारादिसंबंधिनश्चुंबनादिव्यवहारस्येत्यर्थः। विशेष्ये चंद्रादौ सर्वथारोपेनारोपा
न्यतरविधया प्रस्तुतानन्वयिनः प्रकृतान्वयिस्वरूपस्य। यद्वा सर्वथैवेत्यस्य कवीत्यादिनान्वयः। कविसंरंभेति। संप्रतीत्युद्दे
श्यपरूपकशब्दसंदर्भरूपकविव्यापारेत्यर्थः। अप्रस्तुतस्वरूपेत्यर्थः। कुतस्तत्राह। मुखमित्यादिना तादात्म्येन चंद्रारोपे तादात्म्य
स्यापि संसर्गविधयारोपविषयत्वात्तस्य चंद्रत्वानतिरेकाच्चंद्रत्वारोपेत्युक्तिः। ननु प्रकारतया चंद्रत्वारोपउक्त इति भ्रमितत्वं
चंद्रविशेषणत्वेनोपस्थितस्य चंद्रत्वस्य मुखविशेषणतयारोपासंभवात्। एवं जारत्वेत्यत्रापि बोध्यम्। तद्वाचकेति। जारवाचके पि॰
त्यर्थः। ननु जारादिपदसमभिव्याहाराभावात्। आतारोपासंभवेप्यर्थाज्जाराद्यारोपोस्तु। नहि तत्रापि तादृशसमभिव्याहारो हेतुः।
रूपकध्वनेरुच्छेदापत्तेरित्याशंक्याह। निरीक्ष्येति। पयोदो मेघो विद्युद्रूपैर्नयनैर्निशायामभिसारिकायामुखवीक्षणधारानिपातैः स
हर्षांतः किमयं चंद्र इति मत्वात्मांतरं यथा भवति न पारसरासख्याक्रंदं कृतवानित्यर्थः। उदाहरण इति। व्यतिरेकदृ वे
ष्टांतः। अन्वयथा गमकमस्ति तादृशस्य समासोक्त्युदाहरणे भावादित्यर्थः। तथा चार्थारोपोप्यनाशंक्य इति भावः। ननु
विद्युन्नयनैरित्यत्र किमप्रस्तुतारोपगमकं यदभावात्समासोक्तौ तदभाव इत्यतो गमकं दर्शयितुमाह। तत्रेति। आनु
गुण्यात्। आनुकूल्यात्। उपमितिसमासस्य पूर्वपदार्थप्रधानतया नयनसदृशविद्युत्करणकत्वस्य निरीक्षणे संभ
वात्प्रतिकूलत्वमिति भावः। अनुक्तमपि अश्रौतमपि रोपणमारोपः। नचेहेति इह समासोक्त्युदाहरणे। तथा। निरी
क्षणवत्। नयनकरणकनिरीक्षणवत्। सतुकरत्वादि इत्यादिना मयनकारित्वपरिग्रहः। नन्विहापि परनायिका
मुखचुंबनरूपस्याप्रस्तुतवृत्तान्तस्य प्रस्तुताप्रस्तुतसाधारणधर्मत्वात्प्रस्तुतारोपगमकत्वस्यादित्याशंक्य परिहरति।

नापीति। साधारणेत्यादिना सादृश्यगर्भविशेषणसंग्रहः। वृत्तान्तयोरिति। निर्धारणे षष्ठी वृत्तान्तयोर्मध्ये इत्य
र्थः। विद्युन्नयनवदिति। प्रस्तुताप्रस्तुतयोर्विद्युन्नयनयोर्मध्ये मुख्यानयनस्योत्तरपदार्थप्रधानसमासात्प्राधान्येन त
थानास्तीत्यर्थः। सेतुमन्थनकृदिति पाठः सेतुबन्धनकृदिति स्वपपाठः। कथंचिदर्पितानुवादत्वव्याख्येयः। उ
पसंहरतीति तस्मादिति मात्रपदेनाप्रस्तुतारोपव्यवच्छेदः। विद्युन्नयनवत्समासकृतप्रतिप्राधान्याभावेपिवि
शेषणसामर्थ्यावगतस्याप्रस्तुतवृत्तान्तस्यार्थतः प्राधान्यमस्तीति शंकते। यद्यपीति। न प्रस्तुतवृत्तान्ताभिन्नत्वे
नावगतस्याप्रस्तुतवृत्तान्तस्याप्रस्तुतविशेष्येणान्वयात्कथमप्रस्तुतवृत्तान्तस्य प्राधान्यमिति शंकानिरासायाह।
विशेष्येणैवेति। न तु तद्विशेषणीभूतप्रस्तुतवृत्तान्तेनेत्येवकारार्थः समाधत्ते। तथापीति। अयमाशयः नात्र श्लिष्टादि
विशेषणैः समर्पितः परनायिकामुखचुम्बनादिरूपो प्रस्तुतवृत्तान्तः प्रागेव कयाचिद्युक्त्या प्रस्तुतगतत्वेन भासते य
द्वलाद्प्रस्तुतजामातृव्यवहारोपावगतिः स्यात्। अपि तु तादृश्येनावगते तस्मिन् प्रस्तुतसंबद्धस्य कविसंरंभगोचरत्वायोगा
त्वस्तुसमारोपितत्वेन पर्यवसानमिति। नन्वेवं तर्हि प्रस्तुतप्रवृत्तान्तस्याप्रस्तुतवृत्तान्ताश्रये धर्मिण्यन्वयोस्तु असंबद्धा
भिधानप्रसंगपरिहारस्य तुल्यत्वादित्याशंक्याह। तथा हीत्यादि। एवं च योग्यतारूपविनिगमकविरहे चेन्मास्तु तर्हि क
स्याप्यन्वयस्तत्राह। अवश्यमिति। अन्यथा संबद्धाभिधानप्रसंगापत्तेरिति भावः। किं तर्हि विनिगमकं तत्राह। अत एवेति।
तथा च भूतप्रस्तुतार्थोपस्कारकतया चमत्कारहेतुत्वमेव विनिगमकमिति भावः। अप्रस्तुतस्य अप्रस्तुतवृत्तान्तस्य। नन्वेव
अ मिति। एवं प्रस्तुतसमारोपानंगीकारे विशेषणानामि त्यादि। विद्यानाथोक्तलक्षणं प्रस्तुतवर्तिनां विशेषणानां साम्येनेत्य
न्वयः। प्रस्तुतसमारोपार्थमप्रस्तुतधर्मिव्यंजनानपेक्षायामपि समारोप्यमाणवृत्तान्तविशेषत्वार्थं तदपेक्षणान्न लक्ष
णसंगतिरित्याह। स्वरूपत इत्यादि। स्वरूपतः अप्रस्तुतसंबंधित्वेनाज्ञायमानस्य। नन्वपेक्षास्त्वपि विशेषणसाम्यल
तद्व्यंजनासामर्थ्यलक्षणसंगतिस्तादवस्थ्यमित्याशंक्याह। सामर्थ्येपि वृत्तान्ताभिव्यक्तिद्वारा तत्संभावान्न दोष इ
त्याह। नवेत्यादि। तदीयत्वानुसंधानेकामुकसंबंधित्वानुसंधाने तन्मुखचुंबनादेरनुसंधानेतद्वदिति पाठः। अनु
संधानवदिति पाठे यथैतस्यासंगतिः। अत एवमप्रस्तुतव्यंजनस्यापेक्षणादेवानन्वप्रस्तुतधर्मिव्यंजनानपेक्षणे इह
ह्यपवादः कुतो नियुक्तस्तत्राह। कंदुकेति। विशिष्टस्य संबंधित्वेनान्वयः। संबंधित्वेनैवेत्येवकारो क्रमेवार्थे सोपपत्तिक
माह। स्वरूपतो इति। अप्रस्तुतकामुकसंबंधित्वानालिंगितरूपिणेत्यर्थः। तथा चारोपासंभवान्नारोपप्रवादानुपप
त्तिरिति भावः। श्लिष्टविशेषणस्यामंदीमुखचुंबनादिः स्वरूपतोप्यारोपस्यैवसत्वात्साधारणविशेषणयामुप

एंभकत्वेप्रवादोपन्यासः॥ ननु तत्रापि तादृशवनिता। अतोऽग्रमेण पत्रेण संबंधः स्वरूपतो व्यारोपस्यैव सत्त्वात्ताधा
रणविशेषणयामुपष्टंभकत्वेप्रवादोपन्यासेऽप्रस्तुतस्य तादृशवनिताकृते विपरीतरतपात्रत्वरूपस्याप्रस्तुतवृत्तांतस्य
स्वरूपतोव्यारोपस्यैव संभवान्नतादृशप्रवादानुपपत्तिरित्याह। किं चेति। युक्तमिति। तत्तामान्यदितरेषु तव्यात्वमिति ना
यादिति भावः। लक्षणमिति तिताविकावचनं। तदेवमुक्तरीत्या अयमेंद्रीमुखमित्यत्र शक्तिकोजनाभ्यां प्राचीप्रारंभसंबंधा
श्रयश्चंद्रो जारसंबंधिसानुरागपरनायिकामुखचुंबनाश्रय इति बोधः॥ अप्रस्तुतवृत्तांतभिन्नत्वेनाध्यवसितस्य प्रस्तुतवृ
त्तांतस्य तादात्म्येनाप्रस्तुतारोपविषये प्रस्तुतधर्मिण्यन्वय इति पक्षे तु सानुरागपरनायिकामुखचुंबनाभिन्नप्राचीप्रारंभ
संयोगाश्रयो जाराभिन्नश्चंद्र इति बोधः। एवमुदाहरणांतरेष्वनेनैव प्रकारेण बोधप्रकारा ऊहनीयाः॥ इत्यलंकार
चंद्रिकायां समासोक्तिप्रकरणं। अतत्र गपप्रभेदमतसमासोक्त्यलंकारप्रसंगात्तत्प्रभेदं परिकरालंकारं लक्षयति।
अलंकार इति। अलंकारत्वोक्तिर्निंचदोषाभावेनैव गतार्थत्वमिति शंकानिरासार्थं तत्प्रपंचनं चाग्रे करिष्यते। साभिप्रा
ये प्रकृतार्थोपपादकार्थविषयकाभिप्रायपूर्वके· तथा च प्रकृतार्थव्यंजक इति यावत्। इत्थं च प्रकृतार्थोपपादकार्थव्यंजक
विशेषणत्वं लक्षणं बोध्यम्। ध्वनावतिव्याप्तिवारणाय प्रकृतार्थोपपादकेति। हेत्वलंकारवारणाय बोधकत्वं विहाय व्यं
जक इति निवेशः। वक्ष्यमाणपरिकरांकुरवारणाय विशेषणेति। तत्र तु विशेष्यत्वं तथेति। नातिप्रसंगः। सुधांशिवति। सुधां
शुना कलितः कृत उत्तंसः शेखरो येन स इति हरविशेषणम्। उत्तंसः कर्णपूरे स्याच्छेखरे चावतंसवदिति विश्वः। साभि
प्रायम्। सामर्थ्यव्यंजकम्। तवेति। इदं प्रतिकामस्योक्तिः। तव प्रसादात्कुसुमायुधोऽप्यहं मधुवसंतमेवैकं सहा
यं लब्ध्वापि नाकोधनुर्विशिखः पाणौ यस्य तादृशस्यापि हरस्य धैर्यच्युतिं धैर्यस्खलनं कुर्याम्। अन्ये धन्विनो धनुर्धरा म
मपुरः के गणनीया इत्यर्थः। कुसुमायुध इति विशेषणं चेत्यन्वयः। अपीत्यस्येति। कुर्यामित्युत्तमपुरुषाक्षिप्तेत्यर्थः
अभिप्रायगर्भम्। अभिप्रायपूर्वकम्। अत एवावयवार्थमात्रविश्रांतत्वादूरपदेन न योगरूढमपि। सर्वेति। सर्वेषामसुची
नां रक्षपूयरेतोविण्मूत्रादीनां निधानस्य स्थानभूतस्य। कृतघ्नस्य· उत्तमान्नपानादिकृतोपकारनाशकस्य· शरीरकस्येति कुत्सा
यां कन्· कृते· तदर्थं संरक्षणार्थमिति यावत्। विशेषणानि पूर्वीर्धोक्तानि। तस्य शरीरस्य। व्यासमिति। राजानं प्रति कविरुक्तिः।
हे देवराजन् त्वद्गुणानां वेदस्य सम्यक् हस्य वर्णने कर्तुं महे कथं शक्नुयां प्रज्ञो भवेयमित्यन्वयः। कुतस्तत्राह· यतो हे एकरूपतया
स्थितं वेदसमूहं न व्यासं अनेकशाखारूपेण न विस्तारितवान्। तथा च तत्कर्ता व्यासो न भवामीति व्यज्यते। एवमग्रेपि· वाल्मी

प्रकारतयापर्भि एतत्रयः

ता॰

कृतो वाल्मीकात्। जन्मास्तीति जन्मी न भवामीति शेषः। तथा च नाहं वाल्मीकिरिति। अच्युतस्य नाभौ नाभवं नोत्पन्नः इत्य
नेन नाहं चतुर्मुख इति। रमहतं मा बभं महाभाष्यं च नाभाषि न भाषितवानित्यनेन नाहं सहस्रजिह्वः शेष इति। चित्रा विचित्रा
र्थ्या यस्याः सा तां बृहत्कथां च नाचकथं कथितवानिति नाहं तद्वक्ता शिवो गुणाढ्यो वेति। सूत्राणि इंद्रेगुरुरूपदेशको नास मिति
नाहं वाक्पतिरिति च व्यज्यते। उक्तेषूदाहरणेषु वैलक्षण्यं दर्शयति। तत्रेत्यादिना। एकैकं। एकस्य विशेषस्य एकमेवास
मनंतरयोः। अनंतरोक्तयोः। प्रत्येकं। एकैकं विशेष्यं प्रति। तत्रापि तयोर्मध्ये पि। एकाभिप्रायगर्भाणि। एकाभिप्रायपूर्व
काणि वाक्यार्थ इति। नव्या स्यामिति इत्यादि निषेधवाक्यार्थ वद्भस्योक्तरीत्या हेतुत्वेनातिभवाक्यार्थ विशेषणत्वादिति भावः।
तेषूक्तोदाहरणेषु। ध्वनिव्यपदेशः ध्वनिव्यवहारः। तत्र हेतुमाह। तापहरणइत्यादिना। तापहरणइत्यादिसप्तम्यंत चतुष्ट
यस्य वा चइत्यनेन समानाधिकरण्येनान्वयः। उपस्कारकत्वादिति। तथा च परांगरूपगुणीभूतव्यंगभेदत्वान्न ध्वनि
व्यवहार इति भावः। नन्वेवम्। पि यथाश्रुतलक्षणस्यनि। शेषचुतेत्यादि ध्वनावतिव्याप्तिरित्यत आह। अत एवेति। वाच्यो
भाव॥ पकारकत्वादेवेत्यर्थः। परिकरत्वात्। अंगत्वात्। तथा च परिकरपदमत्रि न्नापूरुतत्वापपादकत्वस्य वंगपविशेषण
स्यत्वाभावान्नातिव्याप्तिरिति भावः। अपुष्टार्थेतिप्रधानम्। उक्तत्वादिति। अर्थापुष्टः कष्टो व्याहत युतपुनरुक्तदुः सहङ्ग्राम्य
इत्यादिनालंकारकैरुक्तत्वादित्यर्थः। कथं तर्हि तेरेवास्यालंकारत्वेन कथनमत आह। एकनिष्ठेति। तादृशेत्साभिप्रायेदो
षाभावेनेति। अपुष्टार्थत्वदोषाभावेनेत्यर्थः॥ उद्भटालंकारस्येव च्छासहृदयवैमुख्यरूपदूषकतावीजाभावादि
तिभाव॥ विच्छित्तिविशेषश्चमत्कृतिः। परिकरत्वोपपत्तेः परिकरस्यालंकारत्वोपपत्तेः। तत्र दोषस्याप्रसक्त्या
विच्छित्तिविशेषस्य तदभावप्रयुक्तत्वासंभवात्तत्प्रयोजकमलंकारत्वमावश्यकमिति भावः। यमके उदाहरति। य
थेति। निजां देवतायतिक्रम्य यदि यजेत तत्र यथाहि वतातरं पूजयेत्। तदा उभयतः। लोकद्वयाच्युवते भ्रश्यति। अयं पापम
पि जुषते सेवते प्राप्नोतीति यावत्। का निजा वदेवता तत्राह। वयं वनवता प्रस्तवणायुक्तेन क्षितिभृता गोवर्द्धनगिरिणैव सदे
वतकाः देवतसहिताः स एवास्माकं देवतमित्यर्थः। अनवता भूरक्षकेन अहिद्रुहा इंद्रेण किं प्रयोजनमिति शेषः। अद्रिरत्रा
स्त्रे सर्प इति विश्वः। नन्वेवं सति तत्रैवालंकारतास्यान्नतु स्तु घ्रास्तु कृत्लितान्नं स इत्यादावत आह। एवमिति। विच्छित्तिविशेषे
ति दोषाभावप्रयुक्तविच्छित्तिव्यावर्तनेत्यर्थः। ननु यमकादावपि तादृशविच्छित्तिविशेषमानाभावः। विच्छित्तिसामान्यं तु पर्यु
दस्तदोषाभावेनाप्युपपन्नं। आपत्कालपर्युदस्तस्य मद्यशौच हीनतादोषस्याभावेनैव तदानीमपि मृछौचकर्तुरतिप्राया
धात्यमितिनालंकारत्वसिद्धिरित्यत आह। अपि चेति। भस्मोद्धूलनभद्रमस्तु भवते रुद्राक्षमाले अमंहासोपानपरंप

रंगेरिरस्तु ताकौतालयालंकृतिं। अपाराधनतोषितो नविभुना युष्मत्स्वपर्यास्वालोकोच्छेदि निमेः स नास्ति महामोहे निधी
महस्त्वादेमोहस्य महामोहत्वेस्य खालोकोच्छेदित्वेस्य खालोकोच्छेदिनीत्येकपदार्थो हेतुरिति काव्यलिंगमलंकारस्त्वेनयथास्वी
कृतंननु निर्हेतुत्वदोषाभावमात्रतया · विच्छित्तिविशेषस्यानुभवसिद्धत्वात तथैवप्रतीतिभावः॥ इममलंकारं चंद्रिकायांप
रिकरालंकारप्रकरणे। अभिप्रायइति। अत्र विशेषणपदस्थाने विशेष्येति। पूर्वस्यपूर्ववल्लक्षणंबोध्यम्। तत्रपरिकरे
इतिव्याप्तिवारणार्थं। लक्षितलक्षणं संगमयति॥ अत्रैवेति। यद्यपिदेवतारवावतंकया चतुर्भुजइतिविशेषणंतथापिनपा
दिसाधारणदेवपदेशंकाविशेषोनियमेनविशेष्यप्रतीतौपयिकतया विशेष्यपदमभिमतंबोध्यम्। अस्येदिष्यमुदाहर
ति॥ फलीद्रुइति। एराजानप्रतिकवेरुक्तिः। तवगुणान्वक्तुं फलीद्रः शेषः। समर्थइतिसुधाहार्यं। एवमग्रेपि · हे हयाधि
पः कार्तवीर्यः। अस्यैवेडलीड्दुः उभयत्रगुणानित्सलेवजंते। एवमनेधामीः हंकः। तेगुणाकेतिकेशवे मह दंतरस्य
चयतः। सहस्रमरवत्वादीत्यादि। नामस हस्त्रवाहुत्वसहस्त्रनयनत्वयोः संग्रहः। अत्रानेकेषांविशेष्यपदानांतत
दभिप्रायगर्भत्वंविशेषः। इति परिकरांकुरप्रकरणम्॥ श्लेषंलक्षयति। नानार्थेति। नानार्थस्यशब्दस्यसंश्रयोजनं यो॥
श्लेषइतिलक्षणं। वर्ण्येत्यादिर्विभागः॥ वर्ण्यस्यावर्ण्यंच वर्ण्यावर्ण्यभयंच एतदाश्रितस्तद्विषयइत्यर्थः। सर्वेति। स
दाः समाधवः पायात्॥ यः अंगंगोवर्द्धनंपर्वतंगां पृथ्वीं चवराहावतारेण धृतवानिति विष्णुपक्षे। हरपक्षेतुसउमाधवः
सर्वदापायात्। यः गंगांधृतवानित्यर्थः। हरिणेनमृगेणैकरूपतया। आह्लिष्टासक्तिः संगोयस्येति चंद्रपक्षे।
हरिणासूर्येणेति कमलपक्षे। उच्चस्यच्छस्यपातेरुद्रुष्टकीलालं रुधिरं यस्यसवाहिनीपतिः तथावाहिनीनां नदीनां
पतिः समुद्रइतिपक्षे कीलालेजले। समितौसंग्रामे। त्रातइति। येनकरुणायुक्तोतः करुणेन हेतुयुक्तोपिअदरोभयभ्र
मः काकस्रातो रहितः सपवित्रनामारणरव्यातः। विस्तरसोमेघारणमस्त्वित्यर्थः। कृष्णपक्षेतुकाकोदरः कालीयः पूत
नाराक्षस्यामारणेनरव्यातस्तुतिविशेषः। नीतानामिति। दयितांप्रतिनायकोक्तिः। तवईक्षणनेत्रकमलानांपद्मानांहरिण
नांचसरहशोस्तइत्यन्वयः। कीदृशानांमनेजलेअरण्येवारुधिंप्राप्तानां · तथालुब्धैर्लोभशीलैर्भूरिभिःशालीमुखेवस्रम
रैराकुलीभावंप्राप्तानांनीतानांइतिपद्मपक्षे। हरिणपक्षेतुलुब्धैर्व्याधैः कृत्रिमभूरिशिलीमुखैर्बाणैः करणभूतैराकु
लीभावंचपलतांनीतानामित्यर्थः। मृगप्रभेदेकमलइतिविश्वः। असाविति। उदयंशैलं · अभिरुधिंचरक्तंरक्तवर्णम
नुरक्तंमंडलंबिंबंदेशश्चराजाचंद्रोनृपश्चमृदुलैरभिनवैरल्पैश्च। करैः किरणैर्ग्राह्यधनैश्चप्रत्यग्रोदितेति अभिनवोदिते

तार्थः। ननु प्रकारेण नाभिधायानियमनाद् अप्रकृतार्थस्य कथं गम्यत्वमेवेति कथं श्लेष इत्याशंक्याह। यदिति। अलंकारस्ये
ति। न चैवं शब्दशक्तिमूलवस्तुध्वनेरुच्छेदो वाच्यम्। शनिरशनिश्च तमुच्चैर्निहंति कुप्यसि नरेंद्र यस्मै त्वं। यत्र प्रसीदसि
पुनः स भात्युदारोनुदारश्चेत्यत्र शनिविरुद्धरूपेऽप्रस्तुतेऽर्थे प्रकरणेनाभिधया प्रतीयमानेपि तन्मूलकस्य विरुद्धावपि
त्वदनुवर्तिमानार्थमेककार्यं कुरुत इति वस्तुध्वनेरप्रतिप्राप्ते शक्तिमूलस्य संभवात्। अलंकारस्य तस्योपलक्षणत्वा
त्। अन्योन्यसंनिधानबलात्॰ परस्परार्थसंबंधपर्यवाचकशब्दसमभिव्याहारश्चाव्यतरसंनिधिबलात्। तथा च प्रकृ
तेप्यभिधानियामकमस्तीति भावः। एतावता पूर्वापरभावमात्रेण तस्य। अप्रकृतार्थस्य। गूढश्लेष इति। गूढत्वं चाप्र
कृतत्वेनाद्धितीयार्थस्य धीघुमप्रत्ययात्। अयमिति। माघे रैवतकवर्णनं। अयं गिरस्तटीर्विभर्ति॰ किं भूताभ्युस्तेतकठि
नाः प्रकामगुर्वीरतिमहत्तीः॰ अलघुभिर्विलंबमानैर्मेघैर्व्याप्ताः। नितंतसंपूर्णानामगम्यरूपाः परिणताः। तिर्यग्दंत
प्रहारिणः दिग्गजा यास्तु॰ तिर्यग्दंतप्रहारी यो गजः परिणतः स तु स इति हलायुधः। वृद्धवेश्यापक्षे तु॰ जरठा जीर्णाः प
योधराः कुचाः अगम्याः संगमायोग्याः परिणतप्रकटेदिक्करिकेयासां ताः इत्यर्थः॥ दिग्दंतवल्लीलाकारं करिकानखरे खिकृति
वादवः। मदमिति। अहो बधीनोपत्युश्चाद्रस्यासंनिधौ सति मयी मोपलाः सूर्यकांतामदीभूतमणिं द्युतवंतः। तम अदर्शितः
सपत्नुः पुष्णत्वं येन तथा भवत्। दृश्य तिमिरजं दोषं अश्रांधं सिवेविरे॥ पक्षांतरे अवधिपतिर्वैद्यः। एवं मदाग्नित्वशो
यतिमिरादिरोगविशेषाः। दृष्टांतादिरित्यादि यद्धोगिवैद्यरत्नाः तैपरिगृह्यते। अपंगास्त्वेष इति। तथा च श्लेषस्थले व्यंज
नाविरहादप्रकृते तत्स्वीकारे श्लेषव्यवहारः सर्वथामनुपपन्नः स्यादिति भावः। रम्या इति। माघ एव हारकवर्णने। यस्यां द्वा
रकायां युवानो बध्नन्ति समं वलभीः प्रसादोपरितनगृहाणि असेवत॥ किंभूताः रम्या इति हेतोः पताकावैजयंतीः प्राप्तव
तीः विविक्ता निर्जना इति हेतोः रागं रतिं वर्द्धयंतीः॰ नमंति वलीकानिच्छादनपटलप्रांताया सांताः॰ वधूपक्षे॰ पताकासौभा
ग्यानि॰ पताका वैजयंत्यां स्यात् सौभाग्ये नाटकांकयोरिति मेदिनी। रागमनुरागं विविक्ता सतीत्वेन पवित्राः। नम्रवलीका
अति। न चेति। यत इत्यस्य इत्यत्रेवाद्विधिः। श्लेषो भवेदित्यग्रे नन्नेनान्वयः॥ एतस्मिन्निति। एतत्रोवरैवतकगिरिवर्णनम्।
एतस्मिन् गिरौ महत्यः सरस्यः वाल्मीकेर्मुनेर्गिरः साधर्म्यं सादृश्यं दधति धारयंति। कथंभूता नो गिरः अरहितो सवद्धो रामलक्ष्म
णौ यासु तथाभूता नो। सरसीपक्षे अरहिताः संयुक्ताः रामाः पतयो यासां तथाभूताः लक्ष्मणः सारसवत्तितायास्ताः इति। किं
भूताः सरस्यः अधिकां जलशोभां वहंत्यः। पवनसंभृतेन वेगेन संक्षोभं तरंगाकुलत्वं नीताः प्रापिताः; वाल्मीकिगिरस्तु अ
धिकाः कपयो यासु ताः पवनभुवा हनूमता वेगेन निजेन संक्षोभमुद्भूयत्वं प्रापिता इति। ननु अत्रापि सपमितस्य तुल्या

कुव॰
टी॰
२६
26

र्थत्वात्साधर्म्यनिबंधोऽस्तीति कुतो न श्लेषादिपरस्तत्राह। समनिति। प्राकः शीघ्रं साम्यार्थी। साम्यार्थीकत्वे। तथा वानुपपत्त्यभा
वात्तन्मूलकत्वाद्दोषो न संभवतीति भावः। कथं तर्हि दवगमस्तत्राह। अर्थेति। विशेषणेनावधूभिरन्वये चमत्कृतेतर
नुसंधानात्तदन्वयतात्पर्यग्रह इति भावः। दृतु॰ श्लेषानुसंधानानेतरं। तद्बलात्। श्लेषबलात्। साधर्म्येति। साधर्म्यरूपसा
र्थत्यर्थः। अर्थसाम्याभावेपि सकलकलं पुरमेतज्जातं संप्रति सुधांशुबिंबमिवेत्यादिवच्छब्दसाम्यस्य संभवादिति भावः। ए
वकारेणैकग्रपत्वव्यवच्छेदः। तत्र तयोर्मध्ये शब्द इति। जातुकाण्डन्यायेन शब्दयोरेव श्लिष्टत्वादिति भावः। अर्थेति। शब्दभेदादेक
वृंतगतफलद्वयन्यायेनार्थयोरेव श्लिष्टत्वादिति भावः। केचित् अलंकारसर्वस्वकारादयः। उभयमपीति। सभंगाभंगश्लेष
द्वयमपीत्यर्थः। शब्दस्य परिवृत्त्यसहत्वेनान्वयव्यतिरेकाभ्यां तद्धेतुत्वावधारणादिति भावः। अन्ये॰ मम्मटभट्टाः। नन्वभिप्रा
यस्यार्थालंकारमध्यकथनायत्तागतस्यापि विशेषतः। कथनमेतरे एक कथमुपपत्तिरित्याशंक्याह। एतदिति। यद्यप्युक्तसा
ग्र्यानेतरं चित्रमीमांसानक्ताविहरूप्यते। तथाप्युपमाशय उन्नीयते चमत्कारेऽर्थमुखप्रेक्षित्वादर्थालंकारत्वमिति अ
नुप्रासयमकादिवत्तु न चमत्कारेऽर्थमुखप्रेक्षित्वमिति न तयोरर्थालंकारत्वमपि तु शब्दालंकारत्वमेव शब्दवैचित्र्यादिति। इत
त्यलंकारचंद्रिकायां श्लेषप्रकरणम्। अप्रस्तुतेति। सा अप्रस्तुतप्र ॰शंसा॰ अप्रस्तुतात्प्रा॰ अप्रस्तुतमाश्रयः प्रोक्तो येन तात्पर्य धा॥
र्यविषयो यस्याः सा तथा मता। अप्रस्तुतपरमप्रस्तुतवर्णनमप्रस्तुतप्रशंसेत्यर्थः। एक इति॰ कृतीकुशलः प्राकृतेषु पंडि
षु मध्ये यस्मात्तकः। प्राकृतादिद्वारा दैन्यनयाचत इत्यर्थः। कार्य इति। कार्ये प्रस्तुते सति तदन्यस्य कारणस्य वचः प्रतिपादनं।
निमित्ते कारणे प्रस्तुते सति तदन्यस्य कार्यस्य॰ सामान्ये प्रस्तुते सति तदन्यस्य विशेषस्य॰ विशेषे प्रस्तुते तदन्यस्य सा
मान्यस्य॰ तुल्ये प्रस्तुते तदन्यस्य तत्सदृशस्येत्यर्थः। अन्यशब्दस्य तत्सादृश्येत्यर्थः। अन्यशब्दस्य प्रतिसंबंधिपरत्वात्। तत्स्वरू
पे तत्सदृशे। आवद्र इति। आवद्धाः याः कृत्रिमाः सटास्कंधलोमालिते जटिला व्याप्ता अंसभित्तिः स्कंधदेशो यस्यैवं भूतः श्वामुन
कामृगपतेः। सिंहस्य पदवी स्थानं यद्यारोपितः तादृशः सदा कुक्कुरत्वेन सिंहसाम्यं प्रापित इत्यर्थः। तथापि मत्तानामिभा
नां गजानां कुंभतटस्य पाटने विदारणे लंपटस्य व्यसनिनो हरिणानामधिपस्य नादं कथं करिष्यतीत्यर्थः। अभिनयति
अनुकरोति। सभ्रमम्यतां वेधेये॰ मूर्खे॰ मूर्खवैधेयवालिशा इत्यमरः। अंतरिति। छिद्राणि दोषस्थानि च॰ कंटकाः क्रूराः खला
श्च। भंगुरा भंगशीलाः गुणाः सोभाग्यादयः। तेतव॰ अत्रस्तुतिनिंदोदासीनस्वरूपाख्यानमात्रमिति क्लिष्टविशेषणत्वमिति चमे
दः। एवं चेति। उक्तोदाहरणेषु प्रस्तुतपरस्याप्रस्तुतवर्णस्य विरूपत्वे सतीत्यर्थः। विधायेति। ये नराः मनुष्याः सक्रोधेऽरेषां श्रो
वैरं विधायोदासीना भवंति ते कदैतत्तण उदर्चिषमग्निं निक्षिप्य अभिमारुतं पवनाभिमुखं शेरते निद्रां कुर्वंतीत्यर्थः। सोऽ

नर

ईति। सौहार्दादिति मैत्र्याएव स्वर्णरेखाइति रूपकं। तासां परीक्षणे निकषोपलः। परोक्षमिति संज्ञितः। कोप्यस्तीत्यन्वयः। मृगेति। ३८
मृगलांछन इत्युच्यत इति शेषः। निष्ठुरं क्षिप्तानि निरस्तानि मृगयूथानि येन तादृशः। केसरी सिंहो मृगाधिपेत्युच्यत इति शे
षः। हृतेति। धृतो गंभीरो यो शब्दो गर्जितैः खस्याकाशस्य नीलमायेनेति मंडल विशेषणं। आश्रित्येति। हे देव प्रतिमासं भिन्ना
अमृतपुतयस्तद्रश्मिविशेषाः पदमाकाशमेव पदं चरणमाश्रित्य देहस्य क्षये उपनतं संपन्नं दिव्यपदस्याभिमुख्यं येषामेवं
भूताः संतः त्वदास्यरूपे स्वहृदि मित्रेन्दू नेत्राय वर्णस्वरूपस्य पुण्यस्य निचयं विन्यस्य मिहिरं स्वर्लोकं प्रति यांतीत्यन्वयः। मंत्रलिंगा
दिति। नवो नवो भवति जायमान इत्यादि मंत्रसामर्थ्यादित्यर्थः। मंत्रस्य मानांतरसिद्धार्थानुवादकत्वादाह। श्रुतीति। श्रुती
ति। तत्सुकृतदुःकृते विधूनते तस्य प्रिया ज्ञातयः सुकृतमुपयंति अप्रिया दुष्कृतमिति कौषीतकी श्रुतिः। स यावत्क्षिप्येत
मनस्तावदादित्यं गच्छतीति स वायुमागच्छति स तत्र विजिहीते यथा रथचक्रस्य खं तेन स ऊर्ध्व आक्रियते स आदित्यमागच्छ
तीति च। श्रुतौ। स आदित्यमागच्छतीत्यनंतरं स आगच्छति विरजां नदीं तां मनसैवात्येति तत्सुकृतदुष्कृते विधूनुत इति
श्रुतौ। शारीरकेति। शरीरे भवः शारीरः स एव शारीरकस्तस्मात्प्रतिपादक इत्यर्थः। अर्थवशात्. प्रयोजनवशात्.
पूर्वपापादित्यागाभावेऽर्चिरादिमार्गप्राप्तिपूर्वकब्रह्मप्राप्तेरसंभवेन पाठक्रमस्यार्थक्रमेण वाधादिति भावः। स्यापि
त इति। सांपराये तर्तव्याभावात्तथा ह्यन्य इति तार्तीयाधिकरणे सिद्धांतितमित्यर्थः। नाथेति। हे नाथ विभो त्वच्चरण
नखप्रक्षालनजले गारूपे लग्नाः। तेषां नखानां कांतिः निष्पाकणिकाः समुद्रं प्राप्ताः। [illegible] ए
वचकणिकास्तस्य जलधेर्मथनेन सांद्रतां प्राप्ताः। नूनं समुद्रसंबंधि नवनीतस्य चंद्रस्य पदं प्राप्ताः। चंद्ररूपेण परिणता
इत्यर्थः। नया. तद्द्वारेण. तदित्यनंतरं हेतुरिति शेषः। तद्भर्तुर्नखकांत्युत्कर्ष इत्यर्थः। अस्याचेदिति। अस्याः कामिन्या ग
तिसौकुमार्यं हृतं चेदित्यध्याहारेणान्वयः। एवं संलापो भाषणं यदि अस्ततं तदा परमते। कोकिलैर्वाचंयच्छतीति वाचंय
मस्तस्य भावो मौनव्रतं साध्यतो। अकठोरता मार्दवं यदि रूपते तदा सा प्रसिद्धा मालती ईषत्यायेव पाषाणतुल्ये वल्लत्व
त इति। कांति दृष्ट्वा चेत्तदा कमलालक्ष्मीः का वा यं वस्तु मालेवता मायच्यतां किमत्र बहुनोक्तेनेत्यन्वयः। गत्यादिषु गतिसौ
दर्यादिषु. संभाव्यमानानि उत्प्रेक्ष्यमाणानि। पूर्वोदाहरणे हेतुलक्षणमाह। एतानीति। कार्याणीत्यर्थः। लज्जेति। तिरश्चां प
श्वादीनां चेतसि यदि लज्जा तदा च चमर्यः गोमृगाः पर्वतराजपुत्र्याः तेनात्यारमणीयं केशपाशं प्रसमीक्ष्य वालाः केशाः प्रिया
यासां ताः तया तत्त्वे शिथिलं कुर्युरित्यन्वयः। तथैव. निरीक्षणे कार्यत्वमेव। अपीदेवेति। इच्छायत्वरूपार्थी हि मेनेत्यर्थः। इ
दमपि. अप्रस्तुतवृत्तेः कार्यत्वमपि. अपि नाप्रस्तुतवृत्तेः कारणत्वं प्रागुक्तं समुच्चीयते। इदं गमादेवे दृष्टे कस्य चित्तेन वभा

कुव॰ टी॰ २७ 27

सेते। मालतीशशलेखाकदलीनां कठोरतेति तुल्ययोगितायामुदाहृतम्। ननु कार्यरूपेण प्रस्तुतेनार्थेन यत्र
प्रस्तुते तत्कारणमवगम्यते सा कार्यनिबंधना प्रस्तुतप्रशंसोच्यते। नचोदाहृतेषु तत्संभवः। मालतीकठोरत्वादेरप्र
स्तुतस्यार्थस्य कार्यसाया स्त्वयैव दर्शितत्वात्। एवं प्रस्तुतस्य कामिनीगतत्तिनिष्ठसौंदर्यातिशयादेर्निरीक्षणस्यैव
कारणत्वेन स्वरूपतस्तस्याकारणत्वादित्यत आह। अर्थस्येति। अयमाशयः। अर्थस्याप्रस्तुतत्वे सुतरां तद्धेतुरप्रस्तुत
त्कार्यत्वाच्चनतावदप्रस्तुतकार्यत्वे प्रासंभवः। अर्थत्वस्य प्रयोजनाभावेनलक्षणे निवेशादव्यावर्तकत्वाच्च। नापि
प्रस्तुतस्य कारणत्वांशस्यासंभवः। स्वरूपततस्तस्याहेतुत्वेपि ज्ञातस्य हेतुत्वादिति। ननु गतिसौंदर्यादेर्ज्ञानमेव हेतु
र्नतु ज्ञायमानं गतिसौंदर्यादि तदभावेपि ज्ञानमात्रात्कार्योत्पत्तेरित्यस्वरसादाह। वस्तुतस्त्विति। तदतिरेके। तस्याः
प्राचीनोदाहृतापस्तुतप्रशंसाया अतिरेके प्रकारपंचाधिको। तावेति। हे हरे तव निश्वासरूपमंदमारुतेन विनुषी
कृतस्य नु सरहितीकृतस्य स्मितरूपस्य आध्यात्मिकादिताप त्रयौषधस्य एष्य विप्रकीर्णाः। कइंकरचयात्तु सम
दाइवैतेजेवात्कस्य चंद्रस्य किरण जगति भ्रमंतीत्यन्वयः। तत्सारता रूपः किरणसारता रूपः। एवमिति। हृतसार
मित्युदाहरणे चंद्रवदने उपमानोपमेय पदार्थावाश्रित्य चंद्रसारांशहरणस्याकारणस्य सतः कविप्रौढोक्तिकल्पितं का
रणत्वं। एवमन्येष्वपि द्रष्टव्यं। कालिंदीति। नर्मदासमुद्रयोः संवादोयं। तत्र यमुनामात्मसमुद्रेण। कालिंदीत्युक्ते कोपा
लाकृतेनर्मदयाउत्तरं। हे कुंभोद्भवगस्त्यमुने ब्रूहि इति। ततः पुनस्समुद्रस्य प्रतिवचनं। जलधिरहं भवाम्यिमम पात्री
नीमकस्माद्गतोगच्छासि। सा पुनराह। नर्मदाहमित्यादि। ततः समुद्रः पुनराह। तर्हि कुतो मालिन्यमनुभवसीति। सा
पुनराह। मलिनकज्जलैर्मालवदेशांगनानां नेत्राश्रुभिरिति। ततः किमासांजातमिति समुद्रप्रश्नः। कुतलदेशाधि
पः कुपित इति। नर्मदाया उत्तरमिति। इत्यलंकारचंद्रिकायामप्रस्तुतप्रशंसाप्रकरणम्। प्रस्तुतनेति। प्रधानभूत
प्रस्तुतांतराभिव्यंजकं। प्रस्तुतवर्णनेप्रस्तुतांकुरालंकारः। प्रस्तुतस्याभिव्यंजकत्वादंकुर इवेति व्युत्पत्तेः। किमिति।
कंटकव्यो हे भ्रमर मालत्यां सत्यां विद्यमानायां कंटके द्रव्याप्याकेतक्या किं प्रयोजनमिति प्रस्तुतेन भ्रमरवृत्तांतेन मनोहरायां सत्यां कि
मुद्वेगकारिण्या परवनितये ति नायकवृत्तांतः प्राधान्येन प्रस्तुतोऽभिव्यज्यते। कथमिह नैरगवृत्तांतस्य प्रस्तुतत्वं तत्राह।
इहेति। तथा च भ्रंगसंबोध्यकत्वाद्वृत्तांतोपि प्रस्तुत इति भावः। अनामंत्रणीयामंत्रणेन। संबोध्यत्वायोग्य संबोधनेनवाच्या
संभवात्। भ्रंगस्य संबोध्यक वाच्यार्थासंभवात्। कस्त्वमिति। शाखोटकतरुं प्रति कस्य चित्प्रश्नः। सप्रश्नोक्तिः कथमीत्या

युत्तरं॰ वैराग्यादिव वदसीति पुनः प्रश्नः। साधु विदितमिति शाखोटकस्योत्तरं॰ कस्मादिदं वैराग्यमिति पुनः प्रश्नेक
थ्यत इत्साधूत्तरं॰ प्रतिज्ञाय। शाखोटस्य वामभागे योपलक्षितोत्र वृद्धोस्ति तस्यायो जनः। सर्वोत्तमनाम्नमिस्त्र च्छायादिभिः सेवते
आश्रयति॰ मम पुनर्मार्गस्थितस्यापि छायापि परोपकारसंपादकानेति। अतो धारत्वादिति भावः। वामनेति। मा
र्गेन च स्थितं॰ अश्ववंतं। आरोपेणापि परवनितायामिति। वेश्यायामिति च विषयसप्तमी॰ तद्विषय इत्यर्थः। वित्तानां सर्वस्वस्या
पहरणेन यः स कस्य सेनदुःप्रापेति वेश्याविशेषणम्। अन्येति। हे भृंग अन्यासु पद्मदलसमासु सुमनसां पुष्पाणां लतासु तासु
वत्तव नमालिकायाः। कलिकायां जातरजस्कायां अविलोलेचपलेमनोविनोदय। लोलमिति। क्रियाविशेषणं वा। नवमालि
कायालताविशेषस्य बालामभिनवां अस्पृष्टजातरजस्कां कलिकामकाले व्यर्थंकिमिति कदर्थयसि पीडयसीत्यन्वयः। रजः पराग:
स्त्रीणां रतम्। अश्नुवतीति। एतद्वचनं अश्नुवतीसमीत्यर्थः॥ कोशेति। इयं नलिनी कोशाद्वंद्वं मुकुलयुगलं कादंबस्य हंसस्य
चञ्च्वाहतं। कृतक्षतं धत्ते दधाति॰ तथेयं चूतस्याम्रस्य लता नूतनेपल्लवं पुंरूपैः कोकिलैरास्वादितं चर्वितं धत्ते इति दीर्घकाया
वाण्यास्तटे स्थिते परस्परं सखीजनस्य वचनमाकर्ण्य सा प्रस्तुता नायिका कमलमुकुलाग्रवक्षश्च कराजेनेता मदीयस्तनाधरक्षत
वृत्तांतं कथयतीति ज्ञात्वा चैलस्य वस्त्रस्यांतेन प्रांतेन स्तनतटं तिरोदधे॰ बिंबरूपमधरं च पाणिना तिरोदधे आच्छादितवती
त्यन्वयः। अन्यापदेशेति। अन्यस्यापदेशोमिषं यत्र तादृशामित्यर्थः। तदीयमेव गूढं दर्शयति। अप्रस्तुतेत्यादि। व्यवस्था
पितमिति। प्रस्तुतत्वे पि मुख्यतया तात्पर्याभावाद् व्याव्यभिधापर्यवसानाभावादिति भावः। सान्यैवेति। सालंकृति
ध्वनेः सकाशादन्यैवेत्यर्थः। प्रस्तुतत्वसंभवेनैव॰ प्रस्तुतत्वप्राप्त्या। रात्रिरिति। हे विलोचने शिवा कल्याणरूपा का च अन
निर्वचनीयप्रभावा रात्रिः शिवरात्रिरित्यर्थः। संनिधत्ते संनिहिता भवति। अतः युवां अप्रमत्ते जाग्रतं॰ कुतस्तत्राह॰ यु
वयोः सकाशे समीपे अचिरेण समानधर्मा सदृशः सखा कश्चिद् द्रक्ष्यति॰ त्वत्तीयेलोचने भाल्ले भविष्यतीत्यर्थः। तदेक
शतयेति। शिवरात्रिमाहात्म्यप्रयुक्तत्वे हेतुः तच्चवर्णितत्वे॰ तद्वाच्यं॰ उदाहृतकाव्यवाच्यं। एवं चैकदेश्येकदेशभावसंबं
धिनिबंधनत्वमत्र दर्शितं। वहंतीति। भगवत्याः सीमंतवर्णनमिदम्। अयि शिवे तव सीमंतसरणिः नः हेमंतनोत्वि
त्यन्वयः। कीदृशी सिंदूरं वहंती॰ किमिव॰ प्रबलामां केशपाशरूपांधकारदीर्णोनां समूहैर्वंदीकृतं बालार्ककिरणमिव।
सरणिः केव॰ त्वद्वदनसौंदर्यलहरीणां परीवाहरूपा स्रोतसः सरणिरिवेति। परीवाहो जलनिर्गममार्गः। जलोच्छ्रासा
परीवाहा इत्यमरः। अंगेति। विरहसंतापवर्णनम्। अंगसंवर्द्धमृणालकांडमंगोष्मा विशेषरहिता तत्समाश्रुचिं का
तिमयं ते प्राप्नोति॰ तापातिशयेन म्लानीभावात्। नासामौक्तिकं च श्वासानिलाद् दत्युष्णात् द्रुतारिंद्रनीलमणेः पदवी

कु॰ च॰ टी॰ २८ तत्साम्यं गाहते प्राप्नोति। तथा कुचयोर्दग्धा निर्हिमवालुकाकर्पूरः क्षणं दीपरूपतां धत्ते। एवं करतले धारारूपेण सिक्तो ज
लं तत्प्रायः पिंडपतितजलवत् क्षणं लीयते तापातिशयात्। प्रोक्षेव्यप्रोक्षोतीत्यर्थः। उदाहरणद्वयेपि कार्यनिबंधनत्वेव्युत्क्रमम्। नतत्र
यमिति। द्वयोरपि वाच्यत्वादिति भावः। अयमिति उपलक्षणमयं प्रस्तुतप्रशंसापि नेति बोध्यम्। किंरूतस्तर्हि तत्र चमत्कारोऽत
आह। किंचिति। परीति रत्नावल्यां सविरहातुरायाः सागरिकायाः शयनमुपगतस्य राज्ञ इयमुक्तिः। इदं बिसिनीपत्रं चितश
यनं कृशांग्याः संतापं वदत् मां नु ज्ञापयति। किंभूतं। पीनस्तनजघनसंगात् उभयतः ऊर्ध्वाधोभागयोः परिम्लानं। तनोः कृशस्य
मध्यस्य परिमिलनेन संघर्षमप्राप्त्वमृत मध्यभागे हरितवर्णं। एवं प्रकर्षेण शिथिलयोर्भुजयोराक्षेपे स्खलनेन व्यस्तः विष
मीकृतो न्यासो रचना यस्य तादृशमिति। इत्यलंकारचंद्रिकायां प्रस्तुतांकुरप्रकरणम्। पर्यायोक्तमिति। वचः प्रतिपादनं भं
ग्यंतराश्रयं। भंग्यंतरस्य प्रकारकमेलक्षणं परिष्कुरुते। यदेवेति। तस्या न विवक्षितस्य प्रकारातिरिक्तेन चारुतरेण रूपेण व्यंग्य
स्याभिधानं पर्यायोक्तमिति लक्षणं पर्यायेण भंग्यंतरेणोक्तमभिहितं व्यंग्यमत्रेति व्युत्पत्तेः। लक्षणे स्वपदं व्यंग्यपरं। नच व्यं
ग्यस्यैव वाच्यत्वं निष्कलत्वं विरुद्धं चेति वाच्यम्। प्रकारभेदात्। तदुक्तमस्मदभेदैः यदेवोच्यते तदेव व्यंग्यं यथा तु व्यंग्यं न तथोच्यत
इति। चारुतरेणेति। विशेषणमिदं। नमो राहुशिरश्छेदकारिणे दुःखहारिणे इत्यत्र न पर्यायोक्तप्रसंगः। साधारणरूपेण वासु
देवत्वेन। यत्तु राहुशिरश्छेदकारित्वरूपं व्यंग्यमादायैव पर्यायोक्तं वक्तुमर्हं न तु विशेषणसामर्थ्यलभ्यं वासुदेवत्वमादाये
ति। तदयुक्तं राहुशिरश्छेदकारित्वस्य वाच्यसिद्ध्यंगत्वेन तेनापि व्यंग्यं विवक्षितं प्रधानभूतं वासुदेवत्वमादायैव तत्रत्क
पर्योचित्यात्। राहुस्त्रीकुचनैष्फल्यकारिणे हरये नम इत्यत्र तु राहुशिरश्छेदकारित्वमेव विवक्षितं व्यंग्यमिति पुनरुक्तं त
दादाय पर्यायोक्तमिति विभावनीयम्। लोकमिति। यस्या ह्यधादसांघ्रिः लोकं पश्यति। अयं च सः लोकः यस्य पतं जलैः प्रो
षावतारस्यांघ्रिं न पश्यति उरगत्वात्। ताभ्यां अत्र नपादप तेज लिप्सां अपविष्टेया अनाकलनीया। निवेशितामिति। नत्वप्रति
दमर्यत्वाद्रुक्तिः। तवास्मत्स्पृहदयं मनः अक्रूरशिरीषकलिकाम्रदुत्वाभिमानमपनयतो पादौ कियद्दूरपर्यंप्रयासे निधा तं॰
तुमिच्छति। हंतखेदे। एतल्लिवेघतां कथ्यतामित्यर्थः। देवमिति। देवतासार्वभौमं सकलदेवाधीश्वरं देवं वंदे। कीदृशं।
जलधिरेव शरधिस्तूणं यस्य तथाभूतं त्रिपुरसंहारे शरीकृतस्य विष्णोर्विश्रांतिस्थानत्वात्। तथा भुवनेषु विदिताः ख्याताः
व्यासः पुराणेषु ख्यातो येषां ते व्यासप्रमुखा वसिष्ठाद्याः यस्य वाहानां वाहनानां वेदानामधिवाहाः। वाहनाधिकृता भवेति। पुरो
गामेसरपुरोगाग्रतः सरपुरः सराः इत्यमरः। एवमधरं भुवनं पातालं भूषणपेटिकाः सर्पभूषणत्वात्। पुष्परमाका
शं पुष्पवाटिका पुष्पस्थानीयचंद्रो हृमाधारत्वात्। शतमखवह्नि इंद्रस्तत्प्रमुखाः अग्न्यादयो दिक्पालाः द्वारीपालना २८

धिकृताः दिगंबरत्वेन दिशामेव शाटीरूपत्वात्. मनोभूः चंदनतरुः. चंदनस्थानीयभस्मसंबंधित्वात्। मदनभ
स्मनाशिवेनागनुलेपनस्य पुराणेषु प्रसिद्धेः। अत्र लक्षणं संगमयति। अत्रेति। व्यवस्थित इति। विवक्षायां सत्यां. अवग
म्याः व्यंग्या विनेयत्वेति। हिलिंगीयत्वेत्यर्थः। आदिना पाताललगुप्तत्वादिपरिग्रहः। अभिहिता इति। वाह्यद्यधिकृतत्वा
दिना व्यासादिप्रतिपत्तौ समानवित्तिवेद्यत्वेन व्यासादिविनेयत्वादेरपि तैरुपगमादिति भावः। साक्षादेव व्यासादिविने
यत्वाद्याकारेण किमिति न निर्दिष्टा इत्याशंक्याह। परं त्विति। यद्यप्युक्तविशेष्यविशेषणभावेपि देवता सार्वभौमत्वमवगम्यते। तथा
पि स्फुरत्प्रतिपत्त्यर्थं तद्वैपरीत्यं कृतमित्यर्थः। चक्रेति। यादवः सुदर्शनचक्रस्याभिघाते प्रथमं आज्ञा तयैव राहुवधूजनस्य सुरतो
त्सवे आलिंगनस्य उद्दामो उद्दामो उद्भवो ये विलासास्ते वै धैर्यरहितं चुंबनमात्रावशेषं च चकार [illegible]न्वयः। विशिष्टेन. उक्तविशेषणवि
शिष्टेन सचंच ईदृशोदाहरणयोजने च. अनुपपत्तिमिति। गम्यस्य राहुशिरश्छेदस्य भंग्यंतरेणानभिधानादव्याप्तिमाशंक्यैवोत्य
र्थः। अभिधानायोगादिति। अयमाशयः। अत्र हि राहुशिरश्छेदकारीति वासुदेव इति वा व्यंग्यं राहुवधूजनसंबंधितादृशर
तोत्सवकारित्वेन प्रकारांतरेणाभिधीयत इति न वक्तुं शक्यं. धर्मिणो वासुदेवस्य प्रक्रांतत्वेन यच्छब्दाभिहितत्वेनैव व्यंग्यत्वायो
गात्। व्यंग्यस्य च राहुशिरश्छेदकारित्वस्य वासुदेवत्वस्य वा धर्मस्य प्रकारांतरेणानभिधानात्। तस्मात्पर्यायेण कार्यादिद्वा
रेण क्वचिद्गम्यमानाभिधानं वेति लक्षणार्थ इति। अभिधानं. आक्षेपो व्यंजनं वा. पर्यायोक्तमिति। क्वचित्पर्यायोक्त इति पाठस्त्वयु
क्तः। व्यंग्येनोपलक्षितमुक्तमिति व्याख्यानग्रंथविरोधात्। न विघ्न इति। यच्छब्दाभिहितस्यापि वासुदेवत्वादिना रूपांतरेण
व्यंग्यतया यथाश्रुते बाधकाभावादिति भावः। न चाभिधाविषये कथं व्यंजनेति वाच्यम्। वासुदेवत्वादिना प्रतीयमाने भग
वत्यभिधाविषयत्वासंभवात्। तस्य राहुशिरश्छेदकधर्मेणैव बोधकत्वात्। अत एवोक्तं. शक्यादन्येन रूपेण ज्ञातिर्भवति लक्षणेति। र
हत्सु लक्षणाहेत्वभावाद्व्यंजनोपगम्यत इति। ननु प्रस्तुतेन तादृशरतोत्सवरूपेण कार्येण प्रस्तुतस्यैव राहुशिरश्छेदरूपकारणस्य प्र
तीतौ चमत्कृतिविशेषस्तस्याऽलंकारत्वं गमयति. तच्चालोच्यमानमप्रस्तुतप्रशंसाया असंभवाद्दुर्ज्ञेयत्वात्पर्यायोक्तरूपतयैव स्वीक
र्त्तव्यमित्याशंक्याह। यत्त्विति। अलंकाराणामियत्तानियमाभावेन प्रस्तुतांकुरस्याप्यलंकारांतरत्वादेवंविधं शाणस्वारस्यभंगेन प्रा
चीनलक्षणव्याख्यानमयुक्तमिति भावः। संक्षेपतो दर्शितमपि पर्यायोक्तविषयं विशदयति प्रस्तुतेत्यादि ते सतीत्यर्थः। यत्तु भंग्यंतररूपे
५८ णावगमनं विशेषणमर्यादालभ्यत्वेनास्तु दरं तत्पर्यायोक्तस्य विषय इति। तदविचारितरमणीयं. न हि पर्यायोक्ते व्यंग्यसौंदर्यकृतो
विच्छित्तिविशेषः। किंतु भंग्यंतराभिधानकृत एव व्यंग्यं तु भंग्यंतराभिधानतोः सुंदरमेव प्रायशो दृश्यते. यथा इहागतमिति
विवक्षिते व्यंग्ये यं देशमलंकरणीयः सफलतामुपनेतव्य इत्यादौ वक्तव्ये तद्दसुंदरत्वोद्भावनं किंचित्कारमेव. अलंकारसर्व

भंग्यंतराभिधानं सुंदरं:

स्वकाग्रंथ्यविरोधोऽज्ञावनेन तु तच्छिरसाकारणं प्रति न शोभते· उपजीव्यतोऽज्ञावनमपि ग्रंथस्य किंचित्करमेव· युक्तिविशेष इति प
र्योक्त्वासहिष्णुत्वमात्रमुद्भावयितुं स्ववगमयती त्यलं विस्तरेण· प्रकाशेतरेण पर्यायोक्तं लक्षयति। पर्यायोक्तमिति। रमणीये
न व्याजेन मिषेण स्वस्य परस्य वा इष्टस्य यत्साधनं संपादनं तदपि पर्यायोक्तं। पर्यायेण व्याजरूपेणोक्तं यत्रेति व्युत्पत्तेः। संपादने
ति। संपादरूपं यदिष्टं तत्साधने तत्करणमित्यर्थः। देहीति। परिधानेनाधरवस्त्रेण निगूहितमाच्छादितमित्यर्थः। एवं च प्रकार
द्वयसाधारणं तदन्यतरत्वं सामान्यलक्षणं बोध्यम्। इत्यलंकारचंद्रिकायां पर्यायोक्तप्रकरणं। उक्तमिति। अत्र निंदास्तुतिभ्यामि
ति स्तुतनिंदयोरिति चेतरेतरयोगोऽनविवक्षितः। तथा च निंदास्तुतेः। स्तुत्या च निंदायाः स्तुतेश्चोक्तिरभिव्यक्तिर्व्याजस्तुतिरित्य
र्थः। प्रथमे व्याजेन स्तुतिरिति चरमयोर्व्याजरूपा स्तुतिरिति च व्युत्पत्तेः। अत एव व्याजस्तुतिपदार्थानुगमाभावात् निंदया निंदा
भिव्यक्तिर्व्याजनिंदाख्यमलंकारांतरमित्यग्रे वक्ष्यते। एवमाद्ये प्रकारद्वये स्तुतिनिंदयोः समानविषयत्वभिन्नविषयत्वाभ्यां प्रत्ये
कं द्वैविध्यमिति चत्वारो भेदाः। अंत्यस्तु भिन्नविषयस्तुतिक एक एवेति पंच भेदाः। लक्षणं तु व्याजनिंदाभिन्नत्वे सति स्तुतिनिंदा
न्यतरपर्यवसायि स्तुतिनिंदान्यतरत्वं सर्वानुगतं बोध्यम्। कस्त्वमिति। नृपं प्रति कवेरुक्तिः। त्वयि योद्धुं एकं सपदि समस्तमास्थिते आरू
ढे सति परिपंथिनः शत्रवः सपदि स्वसमारूढा भवंतीत्यन्वयः। सपदि सप्रयोऽस्याऽस्मीति सूर्यः सप्रश्च ते सप्रयोऽस्या ततसमारूढा इति
द्वितीयोऽर्थो निंदाद्योतकः। त्वया संमुखाहताः सूर्यबिंबं भित्वा दिवमुपगता इति स्तुतौ पर्यवसाने। अर्द्धमिति। शिवस्य देहार्धं दा
नवारिर्वैरिणा हरिणाऽऽहृतं। हरिहरात्मकस्यैकस्य विग्रहस्य प्रसिद्धेः। एवं गिरिजाया अवशिष्टार्धमाहृतं· हे देवराजन् इत्य
मुक्तप्रकारेण जगतीतले स्मरहरस्याभावे समुन्मीलति प्रकाशमाने सति गंगा सागरं प्रत्यगमदित्यन्वयः। त्वागाधिपः शेषः
स्मातलं पातालं त्वामिति पूर्वान्वयि। वेदुष्यायीति। विहितादीतार्थः। आदिना तपःशीलादि परिग्रहः। दारियादीत्यादिपदे
न कुटुंबवाहुल्यादि परिग्रहः। न चात्र राजवर्णने प्रस्तावे कपेः स्तुतेर्व्याजरूपत्वमिति वाच्यं। स्तुतिपर्यवसानविवक्षायां स्व
कीयभिक्षाटनोद्भावनस्यासंगतत्वेन स्तुतेरुक्तनिंदारूपोपालंभपर्यवसानस्यानुभवसिद्धत्वात्। कस्त्वमिति। अंगदं प्रति
कस्यचिद्राक्षसस्य प्रश्नः। रामरूपस्य राज्ञो भवनेऽलेखार्थस्य संदेशस्य वाहकोऽस्मीत्युत्तरं· पुरा पूर्वमागतः। निर्दग्धलंकापुरः
स हनूमान्कुत्र यातः। इति पुनः पूर्वस्य प्रश्नः। वद्धु इत्यादि पुनरपि अंगदस्योत्तरं। राक्षसस्यापवयस्य सूनुना वद्धु इति हेतोः कपि
भिर्वानरैः सम्यक्तुतर्जितः। स वनभंगो हनुमान् व्रीडया लज्जया आत्तः प्राप्तः पराभवो येन ताहृशः कुत्र यात इति न ज्ञायत इत्य
न्वयः। यदिति। हे कुरंग यस्य यस्माद्धननं मुखं मधुर्वाचं वारं वारं नेन्नसेमत्वामिप्याचाहमद्यप्रियशासत्रवदसि· यदिति सर्वत्रसंब
ध्यते· एवं धनिनां गर्वं वचनेन शृणोषि· तां धनिकान्प्रति आशया धनाशयानधावसि· परं केवलं कालं दधासमये
युक्तं।

श्री

स्वादसि मत्तयसि। निद्रयागमे च तिष्ठं प्राप्नोषि। तत्तस्मात्कुत्र तीर्थे किं नाम तपस्तप्तं त्वं द्गृहीतमन्वयः। निर्विलस्य। वि
न्नस्य। तेन हीनस्य इति मुत्पादितमिति सम्पन्नतेनेनान्वयः। कल्हारं जलजपुष्पविशेषः। तस्य वेधिनः कल्हारास्तुरभयंती
ति। सुखाप्यते शीतलाश्च इत्यर्थः। अत्रकेऽपि अप्रस्तावेन तथा चाप्रस्तुता चासौ प्रशंसा चेति व्युत्पत्तिरिति भावः। नवरसे विनो
ऽपरसे विन। प्रशस्यते स्तूयते। मतद्वयेऽप्यस्य रसवीजं दर्शयति वस्तुतस्त्विति। अभिव्यक्तेरिति। तयोः प्रस्तुतप्रशंसा
लवे चित्रस्य विषयत्वाल्लवनभूतो विशेष इत्यन्वयः। अन्यथा। ततो वैचित्र्येऽपि तदंतर्भावांगीकारे। एवं चेति। अन्य
गतस्तुतिनिंदाभ्यामन्यगतनिंदास्तुत्योरभिव्यक्तौ व्याजस्तुतित्वसिद्धौ चेत्यर्थः। प्रक्रियया। प्रकारेण शिखरिणीति। नायि
कां प्रति नायकस्योक्तिः। हे तरुणि अरुणोत्सुकशावः नामवितर्के कोऽनुकस्मिन्गिरिशिखरिणि पर्वते कियत्कालं चिरं वि
द्रिकायां व्याजस्तुतिप्रकरणं। व्याजनिंदां लक्षयति। निंदायाइति। यत्रान्यनिंदया ऽन्यस्य निंदायाअभिव्यक्तिः पर्य
वस्यति सा व्याजनिंदा इतरनिंदा व्याजेन निंदेति व्युत्पत्तेः। विधे इति। हे विधे वृक्षन् प्राक्पूर्वं त वैकमेव शिरोऽह
रत्तच्छिन्नत्तस एवापीह्वतो निंदाव्याज इत्यन्वयः। निंदयेत्यभिव्यंग्येत्यनेनान्वितं। निंदयाऽभिव्यंग्या विधेर्निंदा व्याज
निंदेत्यन्वयः। विषमविपाकं। दारुणपरिणामं। विधिरेवेति। विशेषतो गर्हणीयो निंदनीयः। हे करट काकत्वं
तव।१३ रटररटन्नं कुटयो सो विधिः आम्रवृक्षे सरलेन त्सौम्येन कोकिलेन सह वासं च कारेत्यन्वयः। ननु वैनाप्यलंकारिकेणानु
क्तायां व्याजनिंदायाः। कथमलंकारत्वेनांगीकरणमित्याशंक्याह। प्रतिद्वंदीति। तुल्ययुक्त्या प्रतिद्वंदी स्यानीये
त्यर्थः। तथा च स्तुतिवन्निंदायाः कथमलंकारत्वेन शंसा तो वैचित्र्यविशेषात्तदनंतर्भावे व्याजस्तुतौ चार्थानुगमाभावाद
नंतर्भावेऽप्यगलंकारतायाऽउचित्यात्प्राचीनैरनुक्तापि कर्तुमुचितेति भावः। प्राग्युक्तयोरेकः। रुतीराकुतेद्वित्याव द्रूरुति
मेत्तनयोरप्रस्तुतप्रशंसोदाहरणत्वासंगतिमाशंकते। नन्विति। क्रोडीकारः स्वविषयीकरणं। अन्यत्र लब्धात्मकस्या
लंकारद्वयस्य क्वचित्संकरोऽपि न दोष इत्याशयेन समाधत्ते। यत्रेति। एतच्छदन्यादावित्यनेनान्वितं। अस्याः अप्रस्तुतप्र
शंसायाः। सैव अप्रस्तुतप्रशंसैव। लावण्येति। इमौ तन्वी तन्वता स्रजता वेधा चेतसि कोऽर्थः। कामना विषयभूतो निहि
तः। अभिसंहितः किं प्रयोजनमुद्दिश्यायं निर्मितेत्यर्थः। ननु नायासेनातिसुंदरतन्वी निर्मितिरेव प्रयोजनं तदभावेऽपि वा
लीला मात्रेण तन्निर्माणं स्यादतआह। लावण्येत्यादि। यतो लावण्यरूपस्य द्रविणस्य धनस्य व्ययो न गणितः। महाक्लेशोऽ

कुव॰
टी॰
३
30

र्जितः कृतः स्वेच्छाचारिणो जनस्य उदासीनस्यापि हृदये चिंतैव ज्वरो निर्मितः। एषामिव शुकादीनां स्वगुणानुरूपस्या
वरस्याभावाद्धृतेव हृतानष्टप्राया तथा च वक्ष्यमाणसाधर्म्यत्वादनिष्टानुवेधित्वाच्च न तु नव्याः प्रयोजनत्वं॰ नापि
लीलामात्रेण निर्माणे च संभवतीति भावः॥ तन्निंदाव्याजेन॰ तरुणीनिंदाव्याजेन॰ तत्सौंदर्यप्रशंसा प्राधान्ये च
मत्कारातिशयप्रशंसायां पर्यवस्यतीत्यन्वयः॥ तन्निंदाव्याजेन॰ स्वकवितानिंदाव्याजेन। कवितासौंदर्यरूपाप्रस्तु
तार्थस्यानंतमस्फुटत्वात्त्वाच्यमस्य वर्ण्यस्य तत्परत्वमित्याशंकामपनेतुं भूमिकामारचयति। अस्येत्यादि। रसा
ननुगुणत्वादिति। वीतरागे शृंगारस्यासंभवादिति भावः। ननु शृंगारसंभवेपि तन्वीनिर्माणे निंदया शांतरसपरि
पोषादस्त्वेवानुगुणत्वमत आह। वीतरागेति। नाविरागिण इत्यनंतरं इमे विकल्पा इत्यनुषज्यते। विवक्षितेति। सकविता
सौंदर्यरूपेत्यर्थः। अतएव॰ वाच्यार्थासामंजस्यादेव वाच्यासंभवेपि॰ वाचिसामंजस्यासंभवेपि। तथा च वाच्यार्थासामं
जस्यामेव स्फुटेप्यप्रस्तुतार्थे तात्पर्यं गमयतीति भावः॥ इत्यलंकारचंद्रिकायां व्याजनिंदाप्रकरणम्॥ आक्षेप इति। स्व
यमुक्तस्यार्थस्य किंचिन्निमित्तमभिसंधाय प्रतिषेध आक्षेपः। स्वचेतेति। पक्षांतरपरिग्रहस्य पूर्वपक्षप्रतिषेधपनि
यतत्वादिति भावः॥ न चात्र कैमर्थ्यरूपं पंचमप्रतीपभेदेन गतार्थत्वशंका। तस्यात्र प्रतिषेधं प्रति निमित्तत्वेनाप्राधान्या
त्। असंदिग्धमुदाहरति। साहित्येति। हे कविश्रेष्ठाः साहित्यसमुद्ररूपाणां भारतादीनां मंथनादिव परिशीलनादुत्थि
तमुत्पन्नं कर्णयोरमृतमिवाह्लादकं काव्यरत्नं॥ यद्यस्मात्तस्य लुंठनार्थं दैत्या इव काव्यरूपस्यार्थस्य चित्रस्य चोराः प्रगुणी
भवंति बहुलीभवंतीत्यन्वयः। गृह्णन्निति। यदि वेति। अपरार्थ्येवेत्यर्थः केऌप्तेषु अपहृतेषु। स्वोक्तिरिवेतेति स्वयमुद्भावि
तेत्यर्थः। वेदशास्त्राणां ऋषीवेत्रिराणां अर्थांतरपर्यवसितः। अर्थांतरप्रतियोगिकत्वेनावस्थितः॥ विरोधं॰ व्याघातविशेषं॥
संघहनेति। संयोजनकाले उचितयत्कैतववचनं मिथ्यावचनं। तस्य परिहारस्तेनोपलक्षितेति यथार्थवादित्वेत्यर्थः॥ ना
हं दूतीत्यत्र हि दूतीयतेन दूतीगतमिथ्यावादित्वविशिष्टं लक्ष्यते। तद्भावस्तु यद्यपि न यथार्थवादित्वं तथापि तद्रूप
लक्ष्यत्वे तत्पर्यवसानोक्तिः। नरेंद्रेति। संधिकरणार्थमागतानां दूतानां मुक्तिः। नरेंद्राणां राज्ञां मौलिः श्रेष्ठः। संधीति।
संधिकाले उचितं यत्कैतववचनं तत्परिहारेणोपलक्षितेन इति पूर्ववदर्थः। अत्राहुः। संदेशहारित्वनिषे
धस्यावाधात्संदेशहारिपदेन कैतववचनप्रयोक्तृत्वविशिष्टं लक्ष्यते। तन्निषेधेन च सत्यवादित्वरूपो विशेषो व्यज्यत
इत्ययमेव निषेधेन विशेषाक्षेपो न तु सर्वजगतीपालकस्येत्यादिर्विशेषो निषेधेन केवलेनाक्षेप्तुं शक्यते। तस्य ३

जगत्कुटुंबिनस्तन्नराङ्गस्त्वात्। एवं स्थितिकथमुच्यते। तवनकश्चिदपीत्यादीति। तत्रोच्यते न्वयमिति निषेधो भा
वगमः निषेधेन तु तत्परिहारे तु भावे केवलादुत्तराद्धात्सर्वविशेषावगतिः स्यात्। संधिकालोचितत्वे तववचनत्वेन
वसेभाव्यमानत्वात्। अपितु तात्कालीनसंध्यभिप्रायमात्रावगमः। निषेधेन तु तत्परिहारे युक्तः उक्तविशेषावगम इत्य
नुभवसाक्षिकमेतत्। सत्यवादित्वादिकं तु उक्तविशेषे व्यंजनीये द्वारभूतं न तु तदेव विधेयरूपमचमत्कारित्वात्। अत
एव नाहं दूतीत्यत्रव सत्यवादित्वादिर्विशेषो व्यज्यत इत्यलंकारसर्वस्वकारः। वस्तुत्वादित्वमादि द्वारभूतो यस्मात्तदन्यो वि
शेष इति तदर्थः इति। एतेनाहं दूतीति पूर्वोदाहरणमपि व्याख्यातं। अस्यैव प्रभेदांतरमाह। आक्षेपोऽन्यत इति। प्रार्थनया
मरणस्य वचनद्वारेण जनितः व्यंग्यत्वेनांतर्भावितः। एतच्चेतिरोहितस्य स्यार्थकथने। तदेवमपकुतेति भिन्नत्वे सति चम
त्कारिनिषेधत्वे सामान्यलक्षणं। इत्यलंकारचंद्रिकायामाक्षेपप्रकरणं। आभासत्वमिति। विरोधस्याभासत्वे आपाततो
भासमानत्वे सति विरोधाभासो नामालंकारः। आभासत इत्याभासः। विरोधस्याभासो वाभास इति व्युत्पत्तेः। इदं यदर्थकेन चा
ऽभानस्यापाततरूपत्वमर्थांतरपरिहार्यत्वरूपं बोध्यते। तथा चैकाधिकरणेन प्रतीयमानयोः कार्यकारणत्वेनासह
मानयोर्धर्मयोराभासमानाः पर्यवसन्नविरोधत्वं लक्षणं द्रष्टव्यं। शानिरंशानिरुतमचैत्यादावतिव्याप्तिवारणाया
द्यं विशेषणं। अपाला हारसालिकंरकं तच्चरणद्वयमिति विभावनावारणाय द्वितीयम्। पर्यवतस्य विरोधस्य दोषत्वाद
पर्यवसन्नत्वं विरोधविशेषणं दिक्। गलेचेति। हारोः नयोरस्तीत्यर्थो विरोधः। मनोहारिणीत्यर्थेन परिहारः। प्रतीयेति।
तस्मान्नलात् भयेन ऊत्वा प्रतिकूलरूपैरिव विरुद्धधर्मैरपि मेत्तता भेदकारिता त्यक्ता किमित्युत्प्रेक्षा। यस्याः सनलः।
अमित्राणां शत्रूणां जयकृदपि ओजसा मित्रस्य रवेर्जयकृत्। अयममित्रजिदेव न मित्रजिदिति विरोधः। वारहृदस्य वि· विचा
रे दक्षिणस्य तादृशो विगतिचारदृगिति च विरोधः। विरोधेति। विरोधसमाधानरूपोऽलंकारः शिरः प्रधानं। यस्य तादृ
शा इत्यर्थः। यत्तु विरोधसमाधानात्मिकमुखस्थितयोऽलंकृत्या विरोधस्योत्थानमेव भग्नमिति कथमत्र विरोधालंका
र इति केनचित्स्मनस्तापि विमनसेत्वाभिहितं। तदसारं विरोधमानमंतरेण विरुद्धधर्मैरपीसमुत्प्रेक्षाया एवानुत्थाने
नमेयमलमाभासमाने विरोधमुखजीव्येव विरोधत्यागोत्प्रेक्षायाः। अर्थांतरानुगृहीतायास्तत्समाधानत्वेन य
आद्यवस्थितत्वादिति। इत्यलंकारचंद्रिकायां विरोधप्रकरणं। विभावनेति। प्रसिद्धकारणाभावेपि कार्योत्पत्तिर्विभाव
नालंकारः। विभाव्यते कारणांतरं यस्यामिति व्युत्पत्तेः। कारणाभावस्याक्षेप आर्थोवेति सर्वत्र लक्षणसमन्वयः। एतदे

वतंत्रेण सकलविभावनाप्रकारसाधारणं सामान्यलक्षणमाद्यप्रकारविशेषलक्षणमवबोध्यम्। तत्राद्यं दर्शितमेव। द्विती
यं तु कारणान्विताभावकथनपूर्वकं कार्योत्पत्तिकथनमित्युदाहरणविशेषबलादेवगम्यत इति विविच्य तद्दर्शितम्। प्र
तिबंधके सति कार्योत्पत्तिरूपे तृतीयप्रकारे ऽतिव्याप्तिवारणायान्वितेति। तत्र प्रतिबंधकस्य वस्तुतः कारणाभावरूपस्य कथ
नेपि न कारणान्वितत्वेन कथनमिति तन्निरासः। प्रकारपंचकेपि कारणान्विताभावस्यार्थतो गम्यत्वात्कथनेति। अप्यला
ह्नेति। ल्लाहारसेनासमेताखिकेनेति· तस्याः काखिन्नाः। अपीतेति। अपीताः पानशून्याः हीवामत्ताः कादंबाः कलहंसा य
त्र· तथाभूतेनर्णेसेमार्जनसून्यममलमेव रमाकाशो यत्र· एवं अप्रसादितं वसुगालनकतकक्षोदप्रक्षेपादिना यत्प्रसाद
नेतच्चूर्णस्सूक्ष्मलघुस्रुवुयत्रैवंभूतं जगन्मनोहरमासीदित्यन्वयः। परमार्थतस्तु पूर्वोवित्येवकाकपादर्शी दृष्टः पाटः। वि
भाव्यमानेति। वर्ण्यमानेत्यर्थः। वरेति। केशपाशरचनासंपादकेन श्रुतएव सुरभिनखेन राज्ञा हृसोनापचितकुसुमा
लूनपुष्पापि लता वृंतासक्तभ्रमरासजातेत्यर्थः। हेतूनामिति। असमग्रत्वे· हेतुतावच्छेदकस्य धर्मस्य संबंधस्य वा वैक
ल्यसति। असंबैरिति। धर्मवैकल्योदाहरणे संबंधवैकल्य उदाहरति। उद्यानेति। विलोचने कर्मभूते· उदस्यंयेति उक्तामुली
कुर्वतीत्यर्थः। क्रियेति। धात्वर्थाभिप्रायं। स्पर्शनस्य संयोगरूपत्वात्। इमां· द्वितीयप्रकाररूपां विभावनां· व्याजहारेति।
गुणजातिक्रियाहीनां यत्र वैकल्यदर्शने। विशेषदर्शनायेव सा विशेषोक्तिरिष्यत इति ग्रंथेन व्यवहृतवानित्यर्थः। एतेन
प्रथमप्रकाराद्द्वितीयप्रकारस्य वैलक्षण्यं दुरुपपादमिति वदन्नपास्तः। वैलक्षण्याभावे हि प्राचामलंकारांतरत्वेन कथ
नमत्यंतानुपपन्नमेव स्यात्। अस्ति च स्वरूपतः कारणाभावकथनात्कारणगतधर्मवैकल्यद्वारेण तद्विशिष्टकारणाभा
वकथने सहृदयसिद्धो विच्छित्तिविशेषः। प्रकारांतरास्वीकारे लाघवमिति तु वकथनात्कारणगतधर्मवैकल्यद्वारे स्वीय
लाघवोद्भावनमिति कृतमधिकेन। कार्योत्पत्तिरिति। प्रतिबंधके सत्यपि कार्योत्पत्तिकथने तृतीया विभावना। नरेंद्रानिति॥
नरेंद्रो वालके रात्रिविषवेद्योपि कथ्यत इति विग्रहः। असिः खड्ग एव भुजंगमः॥ चित्रमिति। प्रतापएव तपनः सूर्यः आतपत्रंस्य
वंतद्दृहितमनातपत्रे· आतपत्रेण सहितं सातपत्रं· उदित इति। कस्यचिद्राजकुमारस्य प्रतापवर्णने। कुमाररूपे सूर्ये उ
दिते सति कोपि व्यावलयं मंडलमेव कुवलयं। कुमुदमुल्लासं प्राप्नोति। छत्रे सत्रिकुलेन भाति· अथ न तत्र भातीति चित्रं·
अ थापरेषां राजकुमाराणां पाणिकमलानि मुकुलीभवंति संकुचेति। अंजलिबंधानंदाकृतीनि भवंतीत्यर्थः। अविवेकीति।
विवेके विशेषदर्शने विघ्नयस्तत्कृत्यं। परस्परं संश्लिष्टत्वात्। कुचयुगं कर्तृ जगत्त्रये हेतुनाम। श्रुतिर्वेदः कर्णश्च। पूर्णयः
परिचयः। यश इति। कर एव दातृत्वात्कल्पतरुः। अत्र पयोधिजन्यात्कल्पतरोः कारणस्य पयोधेरुत्पत्तिः षष्ठी विभावना

जातेति। जातु कदाचित्. कनकलतेव कामिनी गिरिद्वयमिव स्तनद्वयं। इत्यलंकारचंद्रिकायां विभावनाप्रकरणं। वि
शेषोक्तिं लक्षयति। कार्यजनिरिति। पुष्कलेसकारणे संपत्तेकारणे सति प्रसिद्धकारणे सम्भेहे सतीतियावत्। कार्यस्याजनि
रनुत्पत्तिर्विशेषोक्तिः। विशेषणस्यानुत्पत्तिनिमित्तस्योक्तिरवगतिर्यत्रेति व्युत्पत्तेः। अनुरागेति। अनुरागो रक्तिमा रति
श्चापुरः सरोऽग्रवर्ती आज्ञाकरश्च। पूर्वोदाहरणेऽनुक्तनिमित्ता। इह दैवगतिवैचित्र्यस्य निमित्तस्योपादानादुक्तनिमित्तेति भे
दः। इत्यलंकारचंद्रिकायां विशेषोक्तिप्रकरणं। असंभव इति। कस्यचित्पदार्थस्य निष्पत्तेरसंभावनीयत्ववर्णनमसंभ
वोऽलंकारः। गोपशिशुकः गोपालबालकः। निदाघो स्वार्थे वा कप्रत्ययः। उत्पाटयेत्। उद्धरेत्. अयमिति। वारां जला
नां निलयः स्थानं. तद्घोपिपासाऽभिलाषश्च। तरलितं चंचलीकृतं. भितः आश्रितः मुनिरगस्त्यः एनं समुद्रं हेलया
दासमंतात्याययतति। इदं को जानीते इत्यन्वयः। कीदृशं. निजाकरपुटीकरसंपुटीकरसंपुटमेव कोटरं बिलं तद्गतं. तथा
ताम्यंतौ ग्लायंते तिमयो मत्स्या मकराश्च यस्मै वंभूतमित्यर्थः। इत्यसंभवालंकारप्रकरणं। विरुद्धमिति। अदृष्टमित्य
र्थः। भिन्नदेशत्वं भिन्नाधिकरणत्वं। विषं. जलेहालाहले च. संगतस्य भावः सांगत्यं. तदभावोऽसांगत्यं। अत्यंतमिति। द
मयंतीं प्रति हंसोक्तिः। हे दमयंति त्वं तदीयां नलसंबंधिनीं दूरमत्यर्थं दीर्घां संकल्पो मनोरथस्तद्रूपसोपानपरंपरामा
ज स्वनिरंतरमारोहसि। स पुनर्नलः अधिकं म्लासौ अंचतीति यत्तत्तव ध्यानात्त्वन्मयतां त्वत्स्वरूपतामवाप्येत्यन्वयः
अत्र चतुर्थपादेनासंगतिसाधनं. भूचापेति। भ्रूचापवल्ली भ्रूस्वरूपधनुर्लतौ। यद्वदितिपरिमाणार्थे। वक्रतां न
यति आकर्षयतीतियावत्. तावत्परिमाणं हृदयं भिद्यत इत्यर्थः। अत्र हृदये भेदधनुराकर्षणयोः कार्यकारणयोर्भिन्नदे
शत्वमेव दृष्टमितिनासंगतिरलंकारः। अन्यत्रेति। अन्यत्र कर्तव्यस्य वस्तुनोऽन्यस्मिन्नधिकरणे याकृतिः करणं तदपि असंग
तिरित्यनुषज्यते तथा अन्यत्र कार्यं कर्तुं प्रवृत्तस्य तद्विरुद्धकार्यकारणं तृतीयासंगतिः। अपगतमरिजातं यस्मात्सोऽपारिख
र्गे तथा. पारिजाततरुरहितो अकृथा लूतवानाए वं गोत्राया। पृथिव्या उद्धाराय पुरा वाराहावतारे प्रवृत्तोपि त्वं गोत्राणां
पर्वतानामुद्भेदं दलनमकरोः कृतवानित्यर्थः। अनेयोत्पिता अनेषमूलकामेध्यवसायो त्यापिता। यथा वेति। हे भव मे कवी
रचोल्लदेशाधिपसिंहसदृशः तव खड्गेन खंडितायेसपत्नाः शात्रवस्तद्विलासिनीनाम भिनवा अदृष्टपूर्वी भूषाभूषणं निभ
वेति. यथा नेत्रे सुकंकणं जलकणमेव कंकणं वलयं भवतीत्यनुषंगः। अचेति समुच्चये। करुणचपत्रवल्ली. पत्रयुक्तावल्ली
सैव पत्रिकारचना. करपल्लवे युतिलयुक्तं जलमेव ललाटभूषणमिति। मोहमिति। हे अखिलसुरजगत्रयवर्तिनां
देहधारिणां मोहमयमेवलुंप्त इति। रूपेणकामशरीरमादायमर्यादातिक्रांतकांतिरूपरससमुद्रेण मुनेव रूपेण सुंदर
मोहमाहे प्रवर्धयसीत्यन्वयः। अत्रेति। अनयोर्मेध्यइत्यर्थः। आद्योदाहरण इति। लक्षणानुगतिरित्यन्वयः। भवति नामव

श्री
[illegible] ४९

त्पर्यं न मम चूतेनेति यावत्। भावनारूपाया भुवनप्रयोजकव्यापारूपा। यत्तु अन्यत्रकरणीयस्येत्याद्यसंगतिप्रकारद्-
योतरकथनमयुक्तं। अपारिजातामित्युदाहरणे पारिजातहराहित्यचिकीर्षारूपकारणस्य कार्येण परिजातहरणेन वैय-
धिकरण्येपि तत्संबंधेन प्रायमिकासंगतितद्वैलक्षण्यानुपपत्तेः। आलेखवनारम्भविषयतासंबंधेन चिकीर्षायाः समानाधिक-
रणेन कार्यमात्रे प्रतिहेतुत्वात्। एवं नेत्रेषुकंकणत्वनेत्राञ्जनकारत्वयोर्विरुद्धयोः समानाधिकरणवर्णनाद्विरोधाभासत्व-
मुचितं। एवं गोत्रोद्धारप्रवृत्तोपीत्युदाहरणे विरुद्धकार्यसंपत्तिरूपा काचिद्विभावनाप्रकारे लेखगत्वार्थत्वादसंगतिभेदांतरकल्प-
नुचिता मोहमित्याद्यावपि मोहनिवर्तकत्वमोहजनकत्वयोर्विरुद्धयोरेकत्रवर्णनाद्विरोधाभास एवेति केचिदुक्तं। तदसंग-
तम्। उक्तसंबंधेन चिकीर्षाया हेतुत्वासिद्धेः। नहि यदधिकरणे कार्यचिकीर्षा तदधिकरणमेत मोव्याक्त संबंधेन चिकीर्षायाः
कार्यहेतुत्वे तान्त्रिकसंमते युक्तेवा। अन्यत्र चिकीर्षितस्यापि प्रमादादिनान्यत्र करणेन व्यभिचारात्। अतएवैवं विधि वैयधि-
करणस्याविरुद्धत्वादपि न प्रायमिकासंगत्यंतर्भावसंभवः। वस्तु विषं जलधरैः पीतं मूर्छिताः पथिकांगना इत्यत्रेव ना-
त्रकार्यकारणवैयधिकरणप्रयुक्तो विच्छित्तिविशेषो ऽपित्वन्यत्रकर्तव्यस्यान्यत्रकरणप्रयुक्त एवेति। स्वहृदयमेव द्रष्टव्यं।
एवं नेत्रेषुकंकणमित्यत्र सत्यविरोधाभासे ऽन्यत्र चमत्कारित्वेन तत्कृताङ्गालंकारभावान्यत्रकर्तव्यस्यान्यत्रकरणरूपा-
संगतिरपि प्रतीयमाना न शक्या निराकर्तुं। एवं गोत्रोद्धारप्रवृत्तोपीत्युदाहरणे गोत्रोद्धारविषयकप्रवृत्तेर्गोत्रोद्भेदरूप-
कार्यविरुद्धत्वाद्विरुद्धात्कार्यसंपत्तिरिति विभावनेत्यपि नयुक्तं। गोत्रोद्धारप्रवृत्तेर्गोत्रोद्भेदनिवर्तकत्वाभावेन तद्विरु-
द्धत्वाभावात्। कथंचित्तदभ्युपगमेपि अन्यत्कार्यकर्तुंप्रवृत्तेन तद्विरुद्धकार्यांतरकरणरूपासंगतिरपि मोहंजगत्त्रयभे-
षामित्यादौ चमत्कारित्वेन लक्ष्यालिका न निवारयितुं शक्यते। नचात्रापि मोहोत्पत्तेः सैव विभावनेति वाच्यं। मोहनिवर्त-
कस्य सिद्धवद्धप्रतीतेः अतएव न विरोधाभासोपि। विशेषोक्तिकथनं त्वत्रासंगतमेव नहि गोत्रोद्धारविषयकप्रवृत्तिरूप-
कारणसत्त्वेपि गोत्रोद्धाररूपकार्यस्यानुत्पत्तिरिह प्रतिपद्यते। किंतु विरुद्धकार्योत्पत्तिरेवेति विभावनीयं। इति अलंका-
रचंद्रिकायां संगतिप्रकरणं। विषममिति। परस्परमानुरूप्यरहितयोः पदार्थयोर्यत्र घटनासंबंधो वर्ण्यते तत्र विषमना-
मालंकारः। संबंधश्च संयोगादिरूपाश्रयाश्रयिभावश्चेति। सर्वप्रकारसाधारणमेतल्लक्षणं बोध्यम्। अभिलषसीति।
अकेकलंके। संतापलयप्रतापतय। अप्पलनानंतरं। नोचेत्तस्मात्स्वंकत्वकेति वदेत्यन्वयः। वस्तुसती। वस्तुगत्या विद्य-
माना। चंद्रेति। चंद्रस्य वदनलक्ष्मीं प्रतयोरिस्पर्धः। विरूपेति। कारणविलक्षणस्वरूपस्पर्धः। कृपाणिकारवड्गः। प्रद-
र्शनेति। प्रक्रमः परिपाटी स्वसजातीयकार्यगुणोत्पादकत्वरूपा। विरुद्धात्कार्यसंपत्तिरिति पंचमविभावनाप्रकारे-
णभेदमाशंक्याह। कार्यंति। अयं विषमः। उक्तविषयमालंकारभेदः। तृतीयप्रकारमाह। अनिष्टस्यापीति। अपिभि[illegible]

क्रमः। इष्टार्थसमुच्चयमात्। अनिष्टस्यावाप्तिरपि च तत्त विषममित्यर्थः। अपिनाद् इष्टानवाप्तिः संगच्छते। चकारः पूर्वोक्त
विषमसमुच्चयार्थः। भद्रेति। अहिमेजुषो सर्पपेटिकां दृष्ट्वा भक्ष्यस्याशया प्रविष्ट आखुर्मूषकस्तेनाहिना भक्षित इ
त्यन्वयः। यत्तु प्रविष्ट इत्यस्यागम्यमानत्वान्न्यूनपदत्वमिति केनचिदुक्तं। तदभिनिवेशादुक्तम्। हृदयं प्रविष्ट आखुर्मू
षकस्तेनाहिनानुभवविकल्पनमित्युपेक्षणीयं। अनिष्टस्यापि प्रतिलंभ इत्यपि भिन्नक्रमो बोधः। गोपाल इति। हे कृ
ष्ण त्वं गोपाल इति हेतोर्वृद्धदुग्धवांछयाश्रितः आश्रितः त्वया तु मातृस्तनदुग्धमपि लम्बद्धं तं मुक्तिदानेनेति भा
वः। पूर्वत्रेष्टानवाप्तिरर्थगम्या। इह त्वपि शब्दगम्येति विशेषः। इदमित्युदाहरणे इति जातावेकवचनम्। दिवीति
मुवि सैंहिकेयस्य सिंहीपुत्रस्य सिंहस्य भयात् दिवि आकाशे चंद्रमाश्रितवतः। शशस्य सा अयसहितस्य ततः सैंहिकेया
द्राहोर्भयमेतत्। हितं त्वेति पद्यस्यार्थः। वयः परस्यानिष्टावाप्तिरूपो परः इष्टार्थ इत्यर्थः। तदुभयं। इष्टानवाप्त्यनिष्टाव
प्तिद्वयम्। दिधक्षत्विति। दशाननो रावणः मारुते हनुमतो बाले पुच्छे दग्धुमिच्छन् तं बालमोदीप्य दीपयति स्मेत्यर्थः। पु
तीकमपीति। अपि नेष्टानवाप्तिसमुच्चितायामनिष्टाप्तेर्विषमपदेनान्वयः सूच्यते। विषमपदेन विषमपरामर्श
कतत्पदेनः तथा च तात्पर्यबलाद्वाक्यमावर्तनीयमिति भावः। यत्त्वनिष्टस्य वत तदुत्तरापि शब्दसमुच्चितायामिष्टानवा
प्तेरप्यावृत्तिनैवान्वयो न तु तत्पदपरामृष्टेन विषमेण। अद्भुतस्येति। तत्राजेवापि शब्दान्वयव्याख्यानेन निरस्तं वेदितव्यं।
पद्मेति। दयिता प्रतिनायकोक्तिः। पद्मस्यातपत्रं छत्रं तत्र रसिके हे तन्वि वापिकायां सरसीरुहस्य पद्मस्य कंदमपि पिहितं किमिती द्वे:
छसियतः हे अद्रे कलियुगरूपः कालः इदं जगत्खद्भूतं संचनभवति। ततः किं तत्राह। इदं सरसीरुहं स्थितत्वात् तवैव मुखस्य लक्ष्मी
हरिष्यति न त्वन्यस्या इत्यर्थः। खिन्नोसीति। विभ्रमः धारयामः वदत्सु गोपेषु शिथिलो भुजो यस्य सः। भरेण शैलभारेण भुग्ना
वक्राः वितता विस्तीर्णा बाहवो येषां तथाभूतेषु सत्सु रक्षन्। अत्रेति। नच भरभुग्नत्वतेन बाहुगतास्थिसंधिभंगरूपानिष्टप्राप्तेः
साक्षादुपात्तत्वात् सर्वांगचूर्णीभावगर्वापहाररूपायाश्च स्फुटं गम्यमानत्वात् कथमिष्टाप्राप्तिमात्रमित्युच्यते इति वाच्यम्। अस्थिसंधि
भंगस्याशब्दार्थत्वात्। भगवद्भुजे शैथिल्यप्रयुक्तभारधिक्ये नवक्रतामात्रस्य शब्देनोपात्तस्य च क्लेशविशेषानाधायकत्वेनानिष्टव्य
पदेशानर्हत्वात्। स्वहद्भुतानां गोपानामनिष्टप्राप्तेराहस्यानुपपत्तेश्च। अत एव न सर्वांगचूर्णीभावेपि गम्यः। सर्वप्रसक्तंभावा
चनतदपहारोपि। यतश्चिरकालशैलधारणेऽन्यश्रमपरिहृतिहीर्षय गोपानां प्रवृत्तिरिहावगम्यत इत्यनवद्यः श्लोक इति।
हे तन्वि लोके प्रसिद्धं कलंकमपहर्तुं निवारयितं मृगांकस्तव मुखं जातः। तत्रापि पुनस्तिलकव्याजेन कलंकरेखा स्वकल्पय

कुमा. सि करोषि। यस्मात्त्वं आर्यः समाश्रितजनेष्वाश्रितं कलं किं न कुर्वतीत्यन्वयः। शापोपीति। मृगयायां प्रमादतो हतपुत्रेण ताप
टी. सेन त्वमपि पुत्रशोकान्म्रियसीति शापे दत्ते तं प्रति दशरथस्योक्तिः। अदृष्टपुत्रमुखपंकजस्य मे मयि भगवता त्वया पाति
३३ तः। अयं शापोपि सानुग्रहो भवति। खलु निक्षिप्तेंधने दिद्धो दीप्तो दहनः। कृषियोग्यां क्षितिं दहन्नपि बीजांकुरजननीं करोती
33 ति दृष्टांतः। परेति परस्य दशरथस्यानिष्टप्रापणरूपं यद्दिष्टं तस्यानवाप्तिरर्थान्नापस्तस्यैत्यर्थः। कुतस्तत्राह। स्वत इति। नियोक्तुः
प्रेषयितुः तं प्रतीति मोघं व्यर्थं तत्वे। एवंविधाया मा भूत्त्वबुद्धेः। विधेर्दैवस्य विपाके परिपाके फलमिति यावत्। भानुरिति।
हे हरे भानुः सूर्यः भवच्चरणकिरणशोभायालो भात्कीयकिरणसमूहं निशासु प्रभातपर्यंतं प्रताप्य। रात्रौ सूर्यकिरणानाम
ग्नौ प्रवेशात् तापयित्वा तत्र तस्मिन्किरणोत्करे हुतवहाद् अग्नेः सकाशाद् दुहूते सति रक्ततादर्शनात् मंदसंतापः सन् क्षणं क्षणमात्रे
णलुप्तरागेण लौहित्यस्तत्पनुदिनं तापं भजतीत्यन्वयः। त्वद्भक्तेति। हे हरे ये विबुधः पर्वसिंधूर्मिमायांबुजस्य कोशः। कुद्मलः
चं सरोबुजरूपभां अग्रगृहं तस्य मुद्रा मुकुलीभावो मुद्रणं च तस्य भंजेनानाग्रहीता तत्त्वमुमातच्छोभा ये सा दशायेमित्रक
राः सूर्यकिरणाः स्फुटं तापरयस्ते तेषामुपलब्धप्राणलाभे न त्वद्भक्तस्य कीर्तिलव्धा व्यतिक्रमेण हीयमानः क्षीयमाणः। सद्भनीता
उपचिता प्ररूढा प्रिये भामभुना शो यस्या स्तां शांसति कथयतीत्यन्वयः। अग्नेति। आगमसिद्धं। तस्माद्दिवाग्निरादित्यं प्रविश
ति रात्रावादित्यं स्तेरति श्रुतिसिद्धं प्रवेशानंतरं तत्सूर्यकृते तेषां किरणानां अग्नेः प्रतापने रूपं परिकल्प्य उत्प्रेक्षः। एवं तेषां
किरणानामरुणिमानं आरक्तत्वं च अरुणिमानुवृत्तिरूपं परिकल्प्य इति दर्शितमित्यन्वयः। एवमग्रेपि। स्फुटं तेन सूर्यप
रिकल्पिततत्किरणस्य चंद्रानुप्रवेशं च यथा सुसिद्धं स्फुटं स्यालोर्यपाकविशेषण विशिष्टस्य चंद्रस्पर्शीरूपं च परिकल्प्य इति
दर्शितमित्यन्वयः। वल्लालेति। हे एतन्नाम भूपाल त्वच्छत्रुनगरे संचरती भिल्ली प्रकीर्णनिरस्तामानमद्दायतरतरा
ति महती यास्वदिरांगारस्पर्शकांतिस्तयाकुलांगी तदुपरि स्थितखंडकांचकलेहिपुमुकुलीभूतनेत्रा फूत्कारं कु
र्वती सती श्वासपरिमलेन प्रसन्नैर्भ्रमरसमूहैर्धूमशंकां करोतीत्यन्वयः। प्रभृतेति। बहुत्वेत्यर्थः। एतेषु सर्वेषु
त्वाद्योत्वादकभावरूपसंबंधगर्भेषु प्रभेदेषु कार्यकारणयोः क्वचिद्बिलक्षणगुणशालित्वेनानुरूप्याभावात्। क्वचिद्दोषत्वा
दकत्वेनाभिमतस्य कारणस्य शाननवाप्तिनिष्ठवाप्तिरूपकार्येणानुरूप्याभावात्सामान्यलक्षणसमन्वयो बोध्यः। इत्यलं
कारचंद्रिकायां विषमालंकारः। सममिति। अनुरूपयोरित्यनंतरं संबंधस्येति शेषः। परस्परमनुरूपयोः संबंधवर्ण
नं सममं नामालंकारः। पयस्यानेन मुखिखंडमंडनं चंद्रकलाभवं हरं। चित्रमिति। अत्र चित्रवतपाह्योर्वीप्ताविस्म
यातिशयद्योतनाय। परिणतं पक्वं स्फीतिः समृद्धिः एतस्याः फलसमृद्धेः कवलनकलाभक्षणचातुर्यं तत्र कोविदः पं

ऽितः॥ सारूप्यमपीति। कार्यस्य कारणेन सारूप्यमपि समालंकारः। नीचेति। नीचप्रवणता नीचास्तर्क्तता जलजाया। स
मुद्ररूपजलजाता या: उच्यते इति। जलस्य तादृशत्वादिति भावः। इदवेति। घनतां मेघरूपतां वर्षैः जलवर्षणैः शमयति
नाशयति। हि यस्मात् सोऽपि दवदहनोऽपि दवमेव स्वोत्पादकं विनिहन्ति। तथा च कारणस्य स्वोत्पादकनाशकत्वात् कार्य
स्यापि धूमस्य तथात्वमुचितमित्यर्थः। आदाविति। विहरणम् उक्तिः। सोऽयं चंद्रः मां किरणैस्तपतीत्येतत्स्वरूपं न्यायप्राप्तमित्य
र्थः। सः कः यः आदौ हालाहलरूपेण हुतभुजा ऽग्निना दूतो हस्तावलंबितो यस्य निटिलं ललाटं तत्स्थं वंधिमहसा नेत्राग्निना वहु
या मे आनिरूढः प्रसिद्धः प्रौढो युवा राहोर्मुखस्य वधिभिर्विषैः रंतरंगीकृतः ग्रहणकाले रूपकीर्तिस्तस्याः दंतरंगतां प्राप्ति
तइत्यर्थः। अत्र कार्यस्य तापस्य कारणीभूतचंद्रगतदुःसंसर्गानुरूपत्वं भेदोत्तरमाह। विनेति। अनिष्टविनायमर्थक
र्तुमुद्यतस्य तदसिद्धिरपि समम् इत्यनुवर्त्यायोज्यं। यदर्थमिति। पाठे यस्य सावर्थ्यं इत्यर्थः। युतादिति। वारणं निवारणं। वार
णाज्ञाजन्य। युक्तो न स्यादपि तु स्यादेवेत्यर्थः। प्रोन्मत्त इति क्वचित्पाठः साधुरेव। अपि संगृहीतस्य नर्मवचनं परिहासवचनं
अत्रेष्टावाप्तिः स्वबकल्प्येतावाध्या। इष्टार्थप्रतीतिरपि। इष्टार्थप्रतीतिरित्यर्थः। अप्रतिहत इति। अनिष्टस्येष्टाभिन्नत्वे न ज्ञा
नकाले ऽनिष्टत्वेन प्रतिभासादिति भावः। उच्चैरिति। गजैरटनं तदारोहणपूर्वकगमनं इहत्य नगरे। उषितोस्मि वासं कृत
वानस्मि। तदेव मत्प्रार्थ्यमानमेव उच्चाटनं दूरनिरसनमेव उच्चैर्गजैरटनं प्रतिमालं वयसे प्रापयति। हि यस्मात् महतां सेवा
विफला भवतीमुखे स्तुतिः। ततो दूरनिरसनरूपार्थान्तरपरिग्रहेण विषमालंकारस्फूर्त्या निंदायां पर्यवसानं एतेन वै
षम्यस्य निंदारूपस्य व्याजस्तुतिविषयत्वेन तयाऽपवाद इति निरस्तं। विषमस्य निंदामूलत्वेन तद्रूपत्वाभावादिति
इष्टार्थावाप्तिसत्वेपि। वास्तविकेष्टार्थप्राप्तसत्वेपि। नक्षतिरिति। अनिष्टप्रतीतेराभासरूपत्वे नापर्यवसानादिति
भावः। प्राप्तमिति॥ तदेव न खल्वेव। एकपदत्वेनेत्युपलक्षणं तृतीया। एकपदत्वोपलक्षितं यदस्तु सदर्थान्तररूपं रूपांत
रमित्यर्थः। अर्थान्तरं च वास्तविकं पदवृत्त्या निकथनेन दर्शितुमेव। अन्वेषलब्धेति। अन्वेषणलब्ध्यासती ऽविद्यमाना याऽदृष्टप्राप्ति
स्तत्प्रतीतिमात्रेण समालंकारोदाहरणमधिगतं। अधिगतं। मात्रपदं चानिष्टावाप्तिप्रतीतिव्यवच्छेदार्थम्। युक्तो वारणलाभोय
म्मलत्र किंचिदनिष्टस्यावेरित्यत्र चोत्कटानिष्टस्य प्रतीतिसत्वादुदाहरणांतरमाह। यत्येति। नायिकां प्रतिनायकोक्तिः। हे तन्वि
तव ऽशोभनगमनं भवतीति सत्यं यस्मादब्जेषु कमलं अंबुषु जलेषु रविं प्रतीक्षते तेन तादृशं सत्तत्प्रातपः कृत्वात्वत्पदरूपेज
न्मनि समस्तेभ्यः कमलेभ्यः कमनीयं सुंदरं सहृतिं शोभनां गतिं मत्तु भवतीत्यन्वयः। अत्र कमलस्योत्तमलोकरूपगतिप्रा
प्तये तपस्यतस्तदला मेपि शोभनगमनस्य गतिशापनेषवल्लादिष्टत्वेन प्रतीतेरिष्टावाप्तिप्रतीतिमात्रं न त्वनिष्टप्रतिभासो

कुव॰ टी॰ ३४ 34

पीति। इत्यलंकारचंद्रिकायां समालंकारः। विचित्रमिति। फलेच्छया विपरीतः प्रयत्नश्चेद्विचित्रं नामालंकारः। इष्टविपरीताचरणमिति या
वत्। नमंतीति। नम्रा भवंति। समुन्नतिं उच्चतां। मलिनयितुमिति। मलिनीकर्तुमित्यर्थः। विमलयति निर्मलीकरोति। मित्रं सहृतमि
त्रस्त्र्यर्थश्च ॥ इति विचित्रालंकारः॥ अधिकमिति। पृथुलादाधेयाद्वैपुल्याद्विशालादाधारादाधेयस्याधिक्यवर्णनमेकोऽधिकालं
कारः। युगांतेति। युगांतकाले प्रलये प्रतिसंहृतः स्वस्मिन्लयं प्रापितश्चात्मा स्वविलासरूपः प्रपंचो येन तादृशस्यकैटभद्विषः श्री
कृष्णस्य यस्यां तनौ जगंति भुवनानि विकासस्थितं यथा स्यात्तथा आसत स्थितानि तत्र तस्यां तनौ तपोधनस्य नारदस्य आभ्यागमात्सं
भवो यासां ता मुदः प्रीतयो न ममुरित्यन्वयः। एष्विति। विशालादाधेयाद्यदाधारस्याधिक्यं तदप्यधिकं। किं यदिति। अपरिमित
मित्यर्थः। वाक्पथ एव ब्रह्मद्वयं च परमेश्वरं प्रति भक्तस्योक्तिः। असंबाधे इति असंकटेत्यर्थः। अहो इति। माति स्वं माति। मातुम
शक्यः। अत्र भुवनत्रयोदरतन्वाधारयोः प्राग्वृत्तभुवनोदरयोरप्रस्तुतत्वेनाप्रशंसनीयत्वात्तदाधिक्यवर्णनमयुक्तमिति सा
मान्यलक्षणं बोध्यमित्याशंक्याह। अत्रेति। न चात्राप्रस्तुतप्रशंसाशंकनीया। प्रस्तुतस्याप्यभिधानादिति। इत्येवाधाराधेययोरन्य
तरस्य तनोरप्याधिक्यवर्णनमिति सामान्यलक्षणं बोध्यं ॥ इत्यधिकालंकारः॥ अल्पमिति॥ यदिति सामान्ये नपुंसकं स्था
पेक्षया सूक्ष्मादाधेयादाधारस्य सूक्ष्मता यत्तदल्पं नामालंकारः। मणीति॥ मणिपंक्तिरूपा ऊर्मिकांगुलीयकं तव करे अप्य
विरहात् वलयायोजपमालायत इत्यर्थः। वटप्रायो गुटिकापर्यायः। अतिसूक्ष्मता आधेयभूतमालापेक्षया अपि सूक्ष्मता। यदिति।
हे चंचलाक्षि तव मध्यभागादपि सूक्ष्मं यद्दृश्यते तन्मृणालसूत्रमपि ते स्तनयोरंतरे न छन्नं मातीत्यन्वयः। इत्यल्पालंकारः॥ ॥
अन्योन्यमिति। यत्र परस्परमुपकारः स्यात्तत्रान्योन्यं नामालंकारः। त्रियामा रात्रिः। यथेति। ऊर्द्ध्वकः ऊर्द्ध्वतनयः प्रपापालिका प्र
पादानाधिकृता काचिद्दूमिता धारां जलधारां। तनुस्तन्वी। अत्रेति। प्रपापालिकायाः पथिकेनोपकारः कृत इत्यन्वयः। स्वासक्तत्वा
दि प्रपापालिकाया विशेषणं। संपादनेन कारणभूतेन। एवं प्रपापालिकयापि पथिकस्योपकारः कृत इत्यन्वयः। यत्तु स्वमुखा
लोकनमभिलषंत्या इत्यत्र स्वशब्दस्य प्रपापालिकाबोधकत्वमेव नान्यन्न पांथबोधकत्वं। यद्विशेषणघटकत्वेन स्वनिजा
दिशब्दा उपात्तास्तद्बोधका इति व्युत्पत्तेरिति केचिदुक्तं तदयुक्तं। मुख्यविशेष्यविशेषणघटकस्यैव स्वनिजादिशब्दस्य मुख्य
विशेष्यमात्रगामित्वव्युत्पत्तेः। यथा देवदत्तस्य पुत्रः स्वमातृभक्त इत्यादौ स्वशब्दस्य तादृशपुत्रगामित्वं न तु गुणभूतदेवद
त्तगामित्वं अतएव दृशस्य लएव निजतनुस्वच्छलावण्यवापीसंभृतांभोजशोभां विदधदभिनवो दंडपादो भवान्या इत्य
त्राभवन्मतयोगत्वं दूषणमुदाहृतं मम्मटभट्टैः काव्यप्रकाशकायां। अन्यत्र तु स्वविशेष्यमात्रगामित्वनियमः। स्वाश्रुतानां विश
णमयपालिकः स्वाज्ञाकारिणं भृत्यानामयं कल्पवृक्ष इत्यादौ व्यभिचारात्। न चैवं स्वदाररतानां विप्राणामहं भक्त इत्य
त्रान्यदीयदाररतानामिति प्रतीतिः स्यादिति वाच्यं तात्पर्यस्यानियामकत्वेनापत्त्यभावादिति॥ इत्यन्योन्यालंकारः॥ वि

शेषइति।स्यात्तेप्रसिद्धं।तदुक्तं विनाप्रसिद्धमाधारमाधेयस्यव्यवस्थितिरितिछिंदतिनाशयंति।तत्करा:सूर्यकिरणा:
रात्रावादित्यस्याग्नौ प्रवेशाप्रवृणदीपस्यत्वं।कमलमिति।अत्रकमलत्वादिनामुखादेरध्यवसानंबोध्यं।कुवलयेत्
नेत्रेतान्निकमलकुवलयानिकनेकलतारूपायांकामिन्यांसाचकनकलतिकाचनिर्देश:कथनं।आप्रलयपर्यंतं।।
दिवमिति।दिवसमुपयातानामपि।येषांमनलगुणगणयुक्ताभिरिआकल्पंकल्पपर्यंतंजगंतिभुवनानिरमयंतीत्य
न्वयः।प्रभेदांतरमाह।यदीति।तृतीयप्रकामाह।किंचिदिति।किंचित्तस्यकार्यारंभेणशावयपदार्थारंभेणशास्ववस्त्वंतर
स्यकृति:करणंचस:विशेष:।त्वामिति।प्रभुप्रतियाचकोक्तिः।स्फुरदिति।उत्कटःप्रतापरूपोज्वलनोग्निर्यस्येत्यर्थ:।
उक्तविशेषणत्वात्स्वजनाविधिनाभुविमनोभवादि:सरसिजेस्वजइतिसत्वमित्यन्वयः।अत्रचोक्तभेदत्रयान्यतमत्वंसामान्य
लक्षणं ।।इतिविशेषालंकार:।स्यादिति।तथाकारितत्कार्यसाधनेवस्तुअन्यथाकारितत्कार्यविरुद्धकार्यसाधनेचे
त्क्रियेततदाव्याघातोऽलंकाकार:स्यादित्यर्थ:।येरिति।यैःकरणभूतैविभ्रमादिभिर्जगत्प्रतीयतेसंतुष्यतितैरेवकुसु
मायुधोहंतीत्यन्वय:।विरूपाक्षस्यहरस्यजयिनी:विजयकारिणी:स्तवेस्तोमिभेदांतरमाह।सोकार्यणेति।कारणस्यानु
गुणमायाधिकोनेत्यर्थ:।निवद्धा·कविवर्णिता·कार्यविरोधिनी·परामिमकार्यविरुद्धादयेति।दिग्जयायप्रस्थितंराजानंप्रति
युवराजस्योक्तिः।बालइत्यतोमयिदयायोवराज्यस्थापनरूपाचेत्तदातस्मादेवहेतोरहंतवापदित्याज्यएव·किंतुत्वेनस
हनेतव्यइत्यर्थ:।अर्थादितिहेतौपंचमी।अन्वयभ्रम्यस्यसमर्थ्यतइत्यन्येनवक्ता·जैत्रेति।यत्तुसाधनेत्यर्थ:।इत्यइति।तथे
वशंकया·दारिद्र्यशंकयैव।ननुनिक्षिप्तं।अत्रपूर्वार्द्धेलब्धस्यदानाभावसाधकत्वाभिमतदारिद्र्यशंकारूपपूर्वपक्षनिरू
पणंदानस्तुसैवविरुद्धदानसाधकत्वेनसमर्थितेतिपूर्वविरुद्धपक्षनिरूपणमुत्तरार्धे।यद्यपिदारिद्र्यस्यतात्कालिकत्वेनज
न्मांतरेणत्वेनवशंकाभिन्नात्तथाप्यभेदाध्यवसायात्तल्लक्षणसमन्वयइतिबोध्यं।सामान्यलक्षणंपूर्ववदत्रसमन्वय
इतमनुसंधेयं।इतिव्याघातालंकार:।। ।।गुंफइतिवक्ष्यतेनेत्यर्थ:।वैलक्षण्यमाह।यथेति।प्राक्चप्रोतंचप्राकप्रोतेतेऽनतिक्रम्ये
तियथाप्रकृप्रोतंयानिकारणानितैःपूर्वपूर्वप्रतिकारणैरुत्तरोत्तरंप्रतिकारणैश्चेत्यर्थः।एवंचोत्तरोत्तरेत्यादियुक्तमेणाभिधानमु पं:५
दाहरणक्रमात्प्रबोधनेतिज्ञेयं।इतिकारणमाला।।गृहीतेति।तस्यमाणचारुहीतमुक्तरीत्यानिवद्धा:पंक्तिरेकावलिरलंकार:।
नेत्रेति।तस्यम्भसिजइतिसर्वत्रसंबंध्यते।दोस्तंभयाभुजस्तंभयोर्दोलितमांदोलितंपयोस्तोदोलितावितिपाठेदोलादोलनयोरस्ती
तिविग्रहः।रत्नमुकुरोरत्नदर्पणः।दिक्कालेति।दिक्कालात्मभिस्तुल्यायस्याकाप्राप्तस्यविभुता·यस्मिंस्तत्राकाशेविशेषणद्योतनेत्यर्थ:।
यत्रचंद्रेप्रभुस्यसूर्यस्यकिरणाअमृतरूपाभवंति।सचचंद्रोयासामपांराशेः समुद्रादभवत्।यस्मात्ति स्तामसांप्रतंप्रचिर

कुव· स्थितमित्यमरात्।यश्चयजमानउषस्सुप्रातःकालेबुभुक्षुर्वह्नेर्हविषेहविर्दानायभवति।यश्चवायुःप्राणरूपस्तस्ययजमानस्य
टी· जीवातवेजीवनौषधायभवति।यस्याश्चपृथिव्यागुणंगंधएषवायुर्वोढातास्तामनन्यदिपोहरस्याष्टमूर्तयोवोयुष्मान्पां
३५ त्वितित्यन्वयः।इत्येकावलीमालादीपकमिति।मालादीपकंनामालंकारः।एकमितिवाचाकाम्यान्वयीअनेनान्वितं।अत
35 इति।एतावन्मात्रेणदीपसादृश्याद्दीपकंनतुप्रागुक्तदीपकालंकारः।प्रकृताप्रकृतानांसादृश्यस्यगम्यत्वेनतदंगीकारादि
तिभावः।संग्राममिति।कोदंडेनधनुषाशरांस्समासादिताःशरैःशत्रुमस्तकंसमासादितं।तेनशत्रुमस्तकेनापिभूमंडु
लंतेनभूमंडलेनत्वंपालकःसमासादितः।भवताकीर्तिरासादिता कीर्त्याचलोकत्रयंसमाहरमित्यनुषंगेणान्वयःभू
तिमालादीपकं॥ ॥सारइति।सारनामालंकारः तस्याःसुधायाःअंतरितिविशेषः ततःउदरेत्रयाणांलोकानांसमाहारस्त्रिलो
की·सापिविष्णुरपिफणिनामीश्वरेशेषेनिद्राति·सोपिशेषोपिसिंधोरेकदेशेतिष्ठतीतिशेषः।तमपिसिंधुमपिकुंभयोनिर
गस्त्यःचुलुकयांचकारपीतवान्।अयमगस्त्योपिनभसिगगनेखद्योतदोतनांधत्ते।इदंगगनमपिप्रेयस्यायेहृदरंत्वली
र्त्तिकर्णभूषणंनीलोत्पलंविभा तीत्यन्वयः।तूलःकर्पासः।पूरकृतार्थाशायांपूरकृतार्थरूपायामाशायां।इतिसारालंकारः।
यथासंख्यमिति।क्रमिकाणांक्रमेणैक्रानांपदार्थानांतेनैवक्रमेणान्वयोयथासंख्यंनामालंकारः।शरणमिति।रूपेणनघ
तानिर नानियत्रत्यजंतेतल्लिंशरणंप्रपन्नानियत्रनमुंचंतेतल्लिंविषवन्मारयंतीत्यन्वयः।केचित्।वामनादयः॥इतियथासंख्या
लंकारः॥।पर्यायइति।वर्णाधेएक्रमेणअनेकसंश्रयः।अनेकाश्रितत्वं।तदुक्तं।एकंक्रमेणानेकस्मिन्पर्यायइति।पद्ममिति।
रात्रौपद्मसंकोचात्त्यागः।अतएवत्यागेनपूर्वसंश्रयाणान्हेपाद्देव।श्रोणीति।जघनंवंधस्तनुतांकृशतांत्यजति।मध्यभागस्ते
सेवतेआश्रयति।वक्षस्थलंकुचसचिवतांकुचसाहित्यंधत्ते।वक्रत्वद्वितीयं।अत्रपूर्ववदसाऽद्वितीयत्वावगमात्पर्यायसंभवोज्ञेयः
अद्वितीयत्वंद्वितीयरहितत्वमनुपमत्वंचैकत्वेनाध्यवसितं·एवंचोदाहरणद्वयेपिपूर्वाधारसमाश्रयणंजघ्नंउत्तराधारसमाश्र
यणंशाब्दमिति।सर्वत्रसर्वाधारसमाश्रयणंशब्दो।नन्विति।हृत्कालकूटउत्तरोत्तरविशिष्टमुत्कृष्टंस्थानेयस्यातादृशीइयमाश्र
यस्थितिस्तवक्रेणापदिष्टेत्यन्वयः।हृदयेआभ्यंतरेअवसदितिशेषः।अथानंतरंखलजनानांहरस्यकंठे·अधुनापुनरिति
संबंधः।मुहुःसंकोचविकासाभ्यांअतः।प्रातइति।प्रोत्यप्रायोऽप्रेयोवसुधांचरित्वाततोवसंतेतरूणांछायासुविश्रम्यसंप्र
तिग्रीष्मेतिगममानोसूर्यप्रोष्ठिंप्रागलयंप्राप्तेसतिशनैरपांजलीनामंतरभ्यंतरेऽयासीत्।गच्छतिस्मेत्यर्थः।विंवोष्ठएवति।
विंवफलसदृशेऽउष्ठे·मार्जारक्तिमाऽनुरागश्चएषरागः।अत्ररागस्यभेदेप्यभेदाध्यवसायादेकत्वं।यत्तुएकसंवंधनाशो
त्तरमपरसंवंधेसत्येवलोकेपर्यायपदप्रयोगात्।श्रोणीवंधइति।प्रकाशोदाहृतेतत्पैवदृष्टत्वाच्चविंवोष्ठएवेत्यत्रपर्या

यकथनमयुक्तमितिकेनचिदुक्तं।तत्प्रकाशएवविंबोप्यस्योदाहरणेपर्यायसमर्थनाद्द्रोतप्रत्ययनस्तिविशेषेदम्।अलं
कारिकपरिभाषितप्राणानांलोकव्यवहारसंवादस्याकिंचित्करत्वादित्तिदिक्।भेदोतरमाह।एकस्मिन्निति।पर्यायेणत्य
नुवर्त्तते।एकस्मिन्नाधारेक्रमेणयद्यनेकंभवतिसोपिपर्यायालंकारःसमेतइत्यर्थः।पुरेति।अस्माकमित्यस्मदोद्वयो
श्चेतिद्वयोरपिबहुवचनं।पुरेत्यनेनस्पष्टोऽतीतकालउच्यते।तत्रापिप्रथमंतरुरविभिन्नोभूत्।ततोनुवितर्केत्वंप्रिय
तमःवयंप्रियतमाः।इदानींत्वंनाथःवयंभार्याः।इतोपरंकिमन्यत्स्यमितिशेषः।कुलिशंवज्रं।अत्रत्वेप्रियानित्येकवचनेनैक
रूपप्रेमपात्रत्वंव्यज्यते·प्रियतमाइत्यादिबहुवचनेनैकरूपतच्युतिरुक्तइतिबोध्यम्॥ ॥इतिपर्यायालंकारः॥ परिवृत्तिरिति।
न्यूनाधिकयोर्मिथःपरस्परंविनिमयःपरिवृत्तिरलंकारः।जग्राहेति।करात्पूर्वकंएककारमुत्कारिणो।प्रियंजग्राहेम
र्थः।तस्यचेति।अवयसोऽतिवृद्धस्यजटायुषोगृध्रविशेषस्यस्वर्गंगतवतः।किमिवशोचनीयंनकिंचिदित्यर्थः।जर्जरंजी
र्णंतरंकलेवरंशरीरंतस्यव्ययोरावणेनयुद्धेत्यागस्तस्माद्यशःक्रीतं·शरीरंदत्वायशोगृहीतमित्यर्थः।इतिपरिवृत्त्यलं
कारः।परिसंख्येति॥एकवस्तुप्रतिषिध्यापरस्मिन्वस्तुनोनियंत्रणंनियमनंपरिसंख्यालंकारः।स्नेहेति।स्नेहस्तैला
दिस्निग्धद्रव्यम्।अन्यत्रागम्य।स्वांतेषुचित्तेषुविलंघयंतीति।तस्यामुज्जयिन्यां।श्रुतिकर्णौवेदश्चकर्ममार्गम्।वक्रिमाणं
कौटिल्यवक्राकारतंचमहाकालइति।तत्रैवस्थातेशिवलिंगं।इतिपरिसंख्यालंकारः॥ ॥संधिविग्रहप्रमाणेति।संधिवि
ह ग्रहयोःकर्तव्यताबोधकप्रमाणेत्यर्थः॥ ॥इतिविकल्पालंकारः॥ ॥बहूनामिति॥ ॥युगपद्भावोभवनंतद्भावेबहू
नांगुंफोनिबंधःवर्णनमितियावत्।विधुरेति।नायकंप्रतिदूत्याइयमुक्तिः।हेहेसाधोत्वयातिनिहितंहृदयेप्रेमाभिधंशल्यंधारयं
तीविधुरितावियहविद्रुतासानायिकायहिदधातितदाकर्ण्यतामित्यन्वयः।किंतदित्यपेक्षायामाह।श्वसितेनिद्राति·तामि
तिग्लानिंप्राप्नोति·प्रकर्षेणम्लायति·प्रेंखतिचलतिप्रणश्यतिनेदल्पातिशयेनमृतप्रायाभवति·गलितस्वेदातिशाया
त्।शात्रुप्रतिक्षीणाभवति।कासौचितशयनभ्रमणादीनां·शतपत्रस्यकमलस्यपत्रप्रांतंदलप्रांतम्।अहंप्रायणकेति॥
अहंपूर्विकेत्यर्थः।अहंपूर्वमित्यहंपूर्विकास्त्रियामित्यमरः।एककार्यान्वये·एककार्यसाधकत्वे·सःसमुच्चयालंकारः।
अहमहमिकायाःपरस्पराहंकारेण·आभिजात्यंकुलीनत्वंसमग्रंसमुच्चकलं।प्रदानमिति।प्रश्नेनगुणग्रहंप्रत्युपगतेऽर्थी
इतिश्रीः।लक्ष्म्याःसत्तानिरुत्सेकोगर्वाभावः।अभिभावोनिंदातद्धेयश्रुत्याः।मौनंअनुद्घाटनंसदसिसभायांपरेणकृतेःक
थनेश्रुतेशास्त्रश्रवणेसर्वप्रथमोत्तानोपुरुषमभिजातंप्रथयतीत्यनेनान्वयः।अभिजातंकुलीनंप्रथयति॥इतिसमु

कु.व. च्चयालंकारः। क्रमकेति। क्रमिकाणामर्थक्रियाणामेककारकगतानां गुंफो निबंधः कारकदीपकं नामालंकारः। तदुक्तं। सेव
टी. क्रिया स्वबह्वीषु कारकस्येति दीपकमिति। सेवते सम्राड् धूर्तिः पश्यति सार्धं एच्छति मार्गं निद्रातीति। हे मृगाक्षि कन्ये प्रभूणामुद्यतदंडे। द्वारि
६ स्थितः शतैर्द्वारपालैरित्यसकृद्वारितानन्तरा वदीनानमस्कारस्मितरुहस्तुतीनां परमपदविचित्तैर्योगैः कटाक्षैः पश्यतीत्यन्वयः। इ
तिकिं। प्रभुर्निद्रातीत्यादि। अंतः अंतःपुरे। असुद्दैः पोशैर्व्याप्ति क्रीड इति। अथ पुनः छायासानुरूपं। सुखप्रदीपकस्य पर्वको प्रकारे
36 णासंभवादिति भावः। प्रतिद्वंद्वि विपरीतं। इति कारकदीपकालंकारः॥ समाधिरिति। कारणांतरागंतरसंनिधेर्वशात्का
र्यसुकरत्वं समाधिरलंकारः। उत्कंठिता नायकसमीपं गंतुं। मानमिति। मानं निराकर्तुमस्याः पादयोः पतिष्यतो मम
दा पकाराय दिष्ट्या भाग्येनेदं घनगर्जितमुदीर्णमुद्गतमित्यन्वयः। समुच्चयकारणानां तुल्यकक्षत्वमिह तु। तद्विपरीतम
तुल्यकक्षत्वमिति द्वंद्वित्वं तत्रेत्यादिना दर्शितम्। इति समाध्यलंकारः॥ प्रत्यनीकमिति॥ बलवतः प्राप्तोपदेशपक्षांतः
पातिनि तदीये यः पराक्रमस्तत्प्रत्यनीकं नामालंकारः। अनीकप्रतिनिधिरूपत्वात्॥ जेत्रेति॥ उत्पलाभ्यां स्वजयकारिने
त्रानुसारिणौ कर्णौ अधः कृतौ तिरस्कृतौ। अवतंसतया तदुपरिस्थितत्वादधस्तात्कृतौ चेति श्लेषः॥ मत्तेति॥ भुवि मूलोके
मम रूपख्यातिं यो हतवान् तस्मिन्नु विष्टमनुरक्तं हृदयं यस्याः बाताः हृगीयमिति। त्वयि मत्सरादिव खलु निश्चितं निरस्त
दयो मदनस्तां हिणोति ह्रीणां करोतीत्यन्वयः। अत्र मत्सरादिवेति हेतूत्प्रेक्षासत्वेपि तद्धेतुकप्रतिपक्षसंबंधिबाधनं
प्रत्यनीकालंकारस्य विविक्तो विषय इति बोध्यं। अत एव मम्मटभट्टैरपि। त्वं विनिर्जितमनोभवरूपः। सा च सुंदर भवत
नुरक्ता। पंचभिर्युगपदेव शरैस्तां तापयत्यनुशयादिव कामः इत्युदाहृतं। एवं च हेतूत्प्रेक्षयैव गतार्थत्वान्नेदमलंकारां
के तरं भवितुमर्हतीति कस्यचिद्वचनमनादेयं। कैमुतिकेति॥ तत्संबंधिबाधनापेक्षया मात्रातद्बाधने विशेषादिति भावः॥ म
ध्वेति। भ्रमरौघः स्वकीयमधुपपारूपस्य पद्मस्य निमीलनेन कुपितः सन् सुधांशोर्बिंबं... तस्मात्कथ्यते तस्याः के मध्यभागे क
लंकं ध्रुवमातनोतीत्यन्वयः। इति प्रत्यनीकालंकारः। कैमुत्येनेति। कैमुत्यन्यायेन सर्थः। काव्यालंकाररूपार्थापत्तिः। का ना
व्यार्थापत्तिः। दंडापूपिकेति। दंडाकर्षणेन तदवलंबिनां मालपूपानामाकर्षणं यथार्थसिद्धं तद्वदित्यर्थः। व्यावर्तयेति। लज्जतावा
रणायेत्यर्थः। अधश्चकारयमिति। बंधुजीवं बंधूकपुष्पं तत्स्नाहरः। बंधुकेभूतानां जीवानां प्रमाहरस्य। यत्वेतत्स्नेहरणं मु
क्तं। कैमुतिकन्यायस्य मूनार्थं विषयत्वेनाधिकार्यायन्यायव्याप्तेः। यथा तेनैवाग्रे यदि दारिद्र्यस्थितमप्यद्विजन्मनां। शनैः सवितु
रप्यग्रतमः स्यास्य तासप्रायं॥ यत्र प्राप्तेः श्राप्यमहिमा जागेन्द्र दारिद्र्यस्थित्यपेक्षया सर्योगेर यदि मावस्यानंदुःशोकमवेत
वगतमपि प्रायसाम्यासाद्यायते न तु कैमुतिकन्यायेनेति केचिदुक्तम्। तत्रेदं वक्तव्यं। केनचिद्दर्शनेन तुल्यन्यायत्वाद ३६

र्थीतरस्यापत्तिरर्थापत्तिरिति तल्लक्षणमयुक्तं। काव्यार्त्तासरसीरुहाममिति कैमुतिकन्यायविषयार्थापत्तावव
माधै कैमुतिकन्यायस्य न्यूनार्थविषयत्वेन तुल्यन्यायत्वाभावादापादानप्रतीतेश्चेति। न चात्र कैमुतन्यायत्वामा
त्रेन त्वलंकारत्वमिति युक्तं। अलंकारतत्वाभियुक्तानां प्राचीनानामस्पहृदयतायाअपामरेण संभावयितुमशक्यत्वात्। लोकव्य
वहारेपि कैमुत्यन्यायस्य चमत्कारित्वानुभवेन तेनैव न्यायेन तस्यालंकारतासिद्धश्चेति। इत्थं च त्वदुक्तार्थापत्त्युदाहरणे वस्तुमा
णः संभावनालंकारो यो न्यैर्यद्यर्थो लोचकल्पनमिति यद्यर्थातिशयोक्तित्वेनोक्तः। यद्यर्थातिशयोक्तावापादकयोर्विपरीता
र्थविश्रांतिरिह त्वापादकस्य सिद्धत्वमापाद्यस्य संभाव्यमानत्वमिति वैचित्र्यं तु तदवांतरभेदतायाः साधकं न तु तद्भिन्नतायाः
इति। न तत्राव्याप्तिशंकापीत्यलं विस्तरेण। इति काव्यार्थापत्त्यलंकारः॥ समर्थनीयस्येति॥ समर्थनापेक्षस्यार्थस्य समर्थनेका
व्यलिंगमलंकारः। अर्थांतरन्यासवारणाय समर्थनापेक्षस्येति। यदार्थांतरन्यासप्रकरणे वक्ष्यमाणरीत्या सामान्यविशेषभा
वातिरिक्तत्वेन विवक्ष्यते। तन्नोपादेयमेतदिति वोध्यं। दुष्करविषयत्वात्। दुष्करविषयरूपत्वात्। समर्थनापेक्षस्येत्यन
तरमर्थस्येति शेषः। नैयायिकेति। नैयायिकाभिमतलिंगस्य लक्षणतावारणायेत्यर्थः। भस्मोद्धूलनेति संबोधनं। ममममास्त्विति
षः। गिरिसुताकांतस्य शिवस्यालयः प्रसादस्तदलंकारभूते सोपानपरंपरे त्वपि संबोधनं। हृतिदैन्य विभुना प्रभुणा शिवे
नयुष्माकं या सपर्या पूजा तत्सुखस्यालोकप्रकाशस्तदुच्छेदके निधीयामहे वयमित्यर्थात्। चिकुरेति। चिकुरप्रकराः। के
शकलापाः विदुषी पंडिता सादमयंती। नूपुरस्य रुतेन गुंजनारतेन। पुरो मार्गेऽनिहितेन चापदार्थश्च अनेकपदार्थश्च॥
वपुरिति। पूर्वस्मिञ्जन्मनि किंचिदपि कृते भवं तं न प्रणतवानितीदं वपुषः शरीरस्य प्रादुर्भावादनुमितं संप्रति नमन्मुक्तः
अतनुरशरीरः अहमग्रेप्यनतिमान्नतिरहितः। समर्थनीयहेतुकथनेनोपपादनीयं। अस्पष्टार्थत्वात्। अस्पष्टहेतुक
त्वात्। अत्र अनयोर्वाक्यार्थयोर्मध्ये द्वितीयवाक्यार्थः। अग्रेप्यनतिमानिति वाक्यार्थः। अत्राप्यतनुत्वेपि नमन्मुक्त इत्यस्मा
वाक्यत्वादाह। अनेकपदार्थेवेति। असोढेति। तपस्यंतीमुमां प्रति वटुवेषेण जातस्य हरस्य वर्णनं। कपटेन यो वटोर्ब्रह्म
चारिणो वेषस्तस्यापनयने त्यागे त्वराशैघ्र्यं ताभ्यां युगपदभियुक्त आक्रांतः त्वराशैघ्र्येत्यहेतुगर्भक्रमेण विशेषणद्व
यमाह। तत्काले उल्लसन्प्रादुर्भवन्नसहभावो दुस्सहभावमर्षो द्वेषो यस्य तादृशस्य तपसोऽसोढासहनासमर्थः। शैल
कन्यायाः कथानां विस्रंभेषु विश्वासेषु रसिकश्चेति। ब्रह्मचर्यं ब्रह्मचारिवेषः। जीयादिति। अंबुधेस्तनयाया लक्ष्म्या अ
धररसमास्वादयन्नयं मुरारिर्जीयादिति। सर्वोत्कर्षेण वर्ततां। कीदृशः समुद्रमथनक्लेशं। एवंविधो गगनाल्लाभात्स
फलं कथयन्जानन्। एतदर्थमाधुर्यं सत्यमतस्य वैयर्थ्याद्धि फलं च कलयन्नित्यर्थः। हे गोदावरि इत्यत्राग्रे मध्येत्यादिवि
शायणस्य न्यसने क्लेशो वारक्षोऽगुण इति जयदेवेनोक्तमित्यन्वयः। तावकतटोद्देशे त्वदीयतीरमध्ये कलिंगाख्यः कविः

वहूनां देशानां दर्शने सहचारिणीं विरक्तिं मुक्तिं। एतां सरस्वतीं ब्रूह्माणं प्रतिगमनयेति संबंधः। कीदृशं। अर्णवमध्ये सप्तो यो मुरजिन्नरारिः तन्नाभिकमलस्थं। अन्वेषो विघटमानस्यानुपपद्यमानस्यार्थस्य घटकमुपपादको बोधः स्तस्य वर्णनेऽन्वेषणे गुण इत्यर्थः। पदार्थहेतुकं समस्तपदार्थहेतुकं। पदार्थवाक्यार्थेति द्वंद्वः। प्रतीयमानो व्यंग्योऽर्थः। प्रतिनिर्दिश्यत्वादिति। निर्दिश्यते उच्चार्यत इति निर्देशः शब्दः। तेन विपरीतार्थकशब्दत्वादित्यर्थः। तस्य॰ तादृशात् तृतीयलोचनवत्त्वस्य। तथा चोभयत्र प्रतिकरालंकारसत्त्वात् काव्यलिंगोदाहरणत्वमनुपपन्नमिति भावः॥ तयोः पश्चुनेत्युक्तोदाहरणयोः॥ तदुक्त्यापि तत्। परिकरोपपादितम्। व्यंग्यस्य हेतुकोटावेवानुप्रवेशादिति भावः। एतदेव विवृणोति। प्रतीयमानेति। वाचस्येव स्येव का रिस्त चितं व्यंग्याहारकत्वेनहीत्यादिना विवृतं। तदयमर्थः॥ यदि पश्वादिपदं व्यंग्यकेशपासाम्याभावादेरर्थस्य साक्षादुपपादकं स्यात्तदात्र परिकर एव स्यान्न काव्यलिंगं। नत्वेवमस्ति। पशुपदप्रतीतावविवेकित्वमात्रेण साम्याभावस्योपपादनासंभवात्। किंतु तद्विशिष्टपशुपुरस्कृतत्वाभाव एव साक्षादुपपादक इति तत्कोटिनिविष्टं व्यंग्यं काव्यलिंगरूपस्य तस्यांगमेव। व्यंग्यांतरं तु नोक्तकाव्यलिंगगम्यमर्थोपकारकमस्तीति निराबाधमेव काव्यलिंगमिति। ननु स्वयमन्योपपादकस्य काव्यलिंगस्याप्युपपादके कर एष मित्याशंक्योदाहरणम्। यत्त्वन्नेत्रेति। एतत्स्मृतिपालंकारे प्रागुदाहृतं। अनेकवाक्यार्थहेतुकेति। पूर्वपादत्रयवाक्यार्थत्रयस्य चतुर्थपादार्थहेतुत्वमिति ज्ञेयम्॥ हेतुभावोपपादकानीति। इंदीवरस्य नेत्रसमानकांतित्वं विना पटादेरिव तद्दर्शनस्य दैवगतकांतासादृश्यविनोदासहिष्णुहेतुत्वासंभवादिति भावः। समाहितमर्थमुपसंहरति। इतीति। तयोः पश्चुनापि॰ मच्चिन्नेस्तीत्येतयो॥ ॥ इति काव्यलिंगालंकारः॥ ॥ प्रस्तुतव्यंजकतयेति॥ प्रस्तुताभिधानं युज्यत इत्यनुषज्यते। एवमग्रेपि। विस्रब्धेति॥ खलस्य विस्रब्धघातरूपो दोषः स्वस्यैव वधाय भवति यतो वीराणां कोपकारकः। सिंहनिद्रापहारी नवतरभंगजन्यध्वनिः करिणो वधाय यच्छेतिस्मार्थः। तददर्शनात् उपमानत्वादर्शनात्। ननु महापुरुषाकृतिरिव गंभीरेयमस्याकृतिरित्यादौ सामान्यस्याप्युपमानता दृष्टेत्यरुचेराह। उपमानतेति। इवाद्यभावाज्ज्ञात्यर्थाभावाच्च उपमानतयान्वयस्यासामंजस्येनाप्रतीतेरित्यर्थः। इदानीत्यादिना काव्यलिंगस्य समुच्चयः। प्रतीतिवैभवात्। प्रतीतिपदार्थरूपप्रयोजनवशात्। प्रयोजनस्यापि हेतुत्वविवक्षायां पंचमी। उक्तं वैलक्षण्यमुदाहरणनिष्ठतया दर्शयति। नहीत्यादिना। इत्यादिकाव्यलिंगोदाहरणे ब्रूव। अयेत्याद्यर्थांतरन्यासोदाहरणे प्रस्तुताप्रस्तुतस्य समर्थनार्थित्वं नास्तीति संबंधः। शारदाप्राप्तौ कुउपगूढेत्यालिंगितेसति। अप्यानंतरं शांतास्तडिद्रूपाः कटाक्षा यस्याः सा प्रावृट् प्रयोगतवती। उक्तविशेषरूपमर्थं। सामान्यरूपेणार्थांतरेण समर्थयति। परिभ्रष्टपयोधराणां कासां मंगनानां सौभाग्यगुणेन नष्टइति पयोधराः कुचा मेघाश्च॥

दिवाकरादिति।कुमारसंभवे हिमालयवर्णने।यो हिमालय।ममत्वंमदीयताबुद्धिः।शिरोमस्तकंशेखरंचसमर्थनार्थि
त्वेसमर्थनापेक्षत्वे।अयमर्थान्तरन्यासेनसमर्थनापेक्षत्वेरूपःसामान्यस्यत्वस्यबुद्धौप्रतिष्ठितत्वासंभवादित्यानेना
न्वयः।संप्रतिपन्नेति।श्रोतःसमर्थितेसमर्थविशेषतरणम्।विशेषावमम्।तत्रवहूनामित्यादौ-सामान्यस्येतिविशेषा
वतरणंविनेवबुद्धौप्रतिष्ठितत्वसंभवतीत्यग्रिमेणान्वितं।तमसनो।त्वरणेदित्यादिविशेषव्यसनेनान्वयेवमर्थान्तर
न्यासेकश्चिदेवसमर्थनापेक्षाकाव्यलिंगेतुसर्वत्रसेत्यनयोर्भेदइत्याशयेनाह।किंचेति।कविकुलदूषणत्वेन।कविसम्
१६ भ्यस्तत्वेन।दास्यदास्य।नलमुखदासपर्वणिपूर्णिमायांभवःपार्वणःशर्वरीश्वरश्चन्द्रः।नविषयेणत्वादिः।स्त्रियःकृताइत्यने
नान्वयः।अपितुस्त्रीभिरेव।यतःप्रतीकाररहितपारुष्यकौर्ययासातयानृता।उभयतःअन्वयव्यतिरेकाभ्यांसमर्थनापे
क्षायामपितदास्यदास्यपीत्यादौतदभावात्।नविषयेणत्यादावपेक्षाविरहेपिसमर्थनसत्वात्।अपकृतेनेति।आद्येमहात्म
नांसर्वस्वकरत्वेनाप्रकृतेनसामान्येनहनूमदब्धितरणप्रकृतविशेषस्यसमर्थनम्।द्वितीयेपुष्पमाल्लास्त्रववृत्तेनाप्र
कृतेनविशेषरूपेणप्रकृतस्यगुणवत्संगप्रयुक्तपूज्यत्वस्यसामान्यरूपस्यसमर्थनमित्यर्थः।यदुच्यतइति।हेपार्वतिरूपंआ
कृतिसौंदर्यंपापवृत्तयेदुष्टाचरणायनभवति।यत्राकृतिस्तत्रगुणावसंतीतिन्यायादितियदुच्यतेतद्वचनमव्यभिचारियथा
र्थम्।तथाहिउदारंरमणीयंदर्शनंयस्यास्तस्याःमतेपार्वतितवशीलंआचरणंतपस्विनामप्युपदेशरूपतांप्राप्तमित्यतिप्रकृ
तेनविशेषेणप्रकृतस्यसामान्यस्यसमर्थनम्॥दानमिति।दानेवितरणेमदजलेच।जलेरुदकेजीडेश्चडलयोरभेदात्।अ
धिरूढेआक्रांतेसतिविद्यमानगतिःसगतिकः।बुद्धिमांश्चकः।आसितुंस्थातुंउत्सहेतशक्नुयात्।यस्मात्भिन्नंद्रोर्मजानं
कर्तुमिच्छतीतिनोगजस्यकटोगंडएवकराहस्तस्यतदाहरग्राहलीनापटलैःसमन्तैःपरितोमन्दशीघ्रउदपातितमित्यन्व
यः।अत्रापिपूर्ववत्क्रममकृतसामान्यमुत्तरार्धोक्तेनप्रकृतेनविशेषेणसमर्थितम्॥इत्यर्थान्तरन्यासालंकारः।यत्ति
र्थ न्निति॥काव्येइत्यर्थात्।निवध्यतइतिशेषः।समर्थ्यसमर्थकभावापन्नत्वेतुनलक्षणेनिवेशनीयम्।तद्विनाचमत्कारा
भावेनचमत्कारित्वविशेषणेनावश्यवक्तव्येनैवानतिप्रसंगात्।एवमेवार्थान्तरन्यासलक्षणेपिबोध्यम्।सनेति।सप्र
कृतोराजानजिष्णेनजितोऽस्यात्परैरितिविशेषः।प्रकृतःतत्समर्थनंहिमहतोदुर्धर्षाअनाक्रमणीयाइतिसामान्येनात
स्यापिसागराइवेतिविशेषोपमयेतिज्ञेयम्।प्रसिद्धेरल्पत्वात्तत्रापरितोषोबोध्यः।यथाकथंचिदिति।महतामनाक्रम
णीयत्वस्येतिप्रसिद्धत्वेनतत्समर्थनापेक्षाभावादितिभावः।इदंवक्ष्यमाणं।व्यक्तमिति।गुणसमुदायेएकस्यदोषस्या
नाकुलनमनतिप्रसिद्धतयासमर्थनापेक्षमिंदोरित्यादिविशेषणसमर्थितइत्यतःस्फुटमित्यर्थः॥कर्णेति।हेकाक
कर्णयोरहंतदंपीडाजनकंरणितंशब्दितमंतरेणविनास्वयंमकरंदःपुष्परसस्तच्छालिनंमाकंदमाम्रवृक्षंगाह

कुव॰ स्वस्याश्रय। इहाश्रुतरौ त्वां वयं कोकिलं मन्महे॰ जानीमहे॰ यतः स्थलवैभवेन स्थानमहिम्ना कतिचिद्वस्तूनि धन्यानि
टी॰ भवंतीति सामान्येन पूर्वोक्तविशेषसमर्थनं। अत्रापि तदेकोक्तायां विशेषरूपमर्थांतरंन्यस्यति॰ नेपालभूमिपालस्य
३८ भालेपतिते पंके कस्तूरिकाकोनशंकेत अपि तु सर्व इति। मालिन्यमिति। मधुलिट् भ्रमरः कलंकश्चेतौ अनुपाशिनो मालि
न्यं धत्तः कुरुतः। तवमुखेतु हंत चतिलकांजनं चतयोरामोषो माधत्त इत्यनुषज्यते। अंजनामेइति पाठे द्वितीया द्विवचनं॰ उ
38 क्तमर्थं सामान्येन समर्थयति॰ दोषावपि क्वचिन्मेलकतो मिथो मिलनात् गुणत्वं इतः प्राप्नुत इति॰ कथमेतत्तत्राह। द्वियतो वक्तु
र्वचसि भ्रमविप्रलाभौ भ्रांतिप्रतारणे गुणौ भवतः घटवति घटाभावे निर्णीय परप्रतारणाय घटोस्तीति प्रयुक्ते वाक्ये प्रमाज
नकत्वात्तयोर्गुणत्वमिति भावः। इति परिकरालंकारः। प्रौढोक्तिरिति। उत्कर्षस्याहेतावुत्कर्षहेतुत्वकल्पनं प्रौढोक्तिः। कलिं
दजायमुना॰ स्तोमः समूहः मेचकाः श्यामाः। रोहणउद्भवे॰ कल्पेति। एषराजा कल्पवृक्षादीनां क्रमेण रजोभरादिभिः पंचभिर्भ
तैरचित इत्यन्वयः। धनदः कुबेरः। शंखो निधिविशेषः। रजोभरः परागसमूहः पयो दुग्धं॰ ग्रासः प्रसिद्धः। अंतरांबरं शंखा
भ्यंतरमाकाशात्। अतिशायी त्यक्तिमवितरणेनान्वितम्। अहेतौ पंचभिर्निर्मितत्वे इति सामानाधिकरण्येनान्वयः। इति प्रौढोक्ति
रलंकारः। संभावनमिति। ऊहस्तर्कः। कस्तूरिकेति। अहं यदि सृष्टिकर्त्ता स्यां तदा कस्तूरिकामृगाणां मेउदखिलेगं रूपे गुण
मादोय खलजिह्वायां निवेशयिष्यामीत्यन्वयः। इति संभावना। किंचिदिति। कस्यचित्तदर्थस्य मिथ्यात्वसिद्ध्यर्थं मिथ्याभूता
र्थांतरकल्पनं मिथ्याध्यवसितरलंकारः। वेश्यामिति उदाहरणम्। खस्रजं गगनमालां। अत्र खपुष्पमालाधारणमिव वेश्या
वशीकरणमिति निदर्शनापि बोध्या। अस्येति। पराङ्कुपरया वराङ्गी स्वीयामतिक्रांतया॰ लक्षीकृता उपलक्षिता। प्रज्ञाचक्षुषा अं
धेनावेश्यमानाश्रुता वधिरस्त्र्याख्यातिकर्मधारयः। कलयता कुर्वता प्रकारेण समूहेन॰ कूर्मरमणी कच्छपी॰ रोधसि तीरे॰
मिथ्याध्यवसितेत्यस्य भेद इत्यत्रान्वयः। कल्पनाविच्छित्तिविशेषेण॰ कल्पनाप्रयुक्तविच्छित्तिविशेषेण। कल्पनात्मनेति पाठे
तिकल्पनास्वरूपेणेत्यर्थः। उपधेयसंकरेप्युपाधेरसंकरात्। विच्छित्तिविशेषेणेति च तस्यैव विशेषणं। विच्छि त्तिविशेषो
यस्मादिति। विच्छित्तिविशेषयति। व्यावर्त्तयतीति वा व्युत्पत्तेः। एतेन प्रौढोक्तौ चगतार्थतामाचक्षाणा निरस्ताः॥ न च मिथ्याध्यव
सितेरलंकारांतरत्वे॰ हरिश्चंद्रेण संजघ्नाः प्रतीता धर्मसूनुना खेलंति निगमा संगे मातर्गंगे गुणास्तवेत्यादौ हरिश्चंद्रादिसं
बंधानां सत्यताप्रतीतेः। सत्याध्यवसितिरपि स्यादिति वाच्यम्। सत्यताप्रतीत्यर्थकस्याप्यर्थस्य कविप्रतिभाकल्पितत्वाभा
वेन शब्दमात्रेणासत्यालंकारतायाः असंभवात्। कविप्रतिभामात्रकल्पिता अर्थाः काव्येऽलंकारपदास्पदमिति विषमा
लंकारप्रकरणे त्वयैवाभिधानादित्यलं विस्तरेण। इति मिथ्याध्यवसितिरलंकारः॥ प्रस्तुत इति॥ ललितमिति लक्ष्यनिर्देशः
निर्गत इति उदाहरणं। दाक्षिण्येत्यादि कप्रत्ययांत वतएयं नायकविशेषणं। दाक्षिण्यमनुरोधशीलत्वं। तद्व्यापारेति। सखी

प्रेषणरूपनायिकाव्यापारस्वरूपेत्यर्थः। सारूप्यं चात्र नैरर्थक्यं नन्वप्रालंकारेष्वेतदभाव इत्याशंक्य निराकरोति। नेयमित्यादिना॥ प्र
स्तुतेति। तथा च प्रकृते प्रस्तुतवृत्तान्तस्यैकस्यैवोपादानान्नयुक्तमिति भावः। ननु भयोः प्रशंसायां त्वत्वइवाप्रस्तुतमात्रस्य तत्त्वेपि निद
र्शनास्त्वित्याशंक्याह। यदीति। प्रतिबिंबतया तत्त्वं परिहरति। तर्हि सारूप्येति। एकः श्रुती शाकुंतेषु योन्येषु क्रान्त्यायाचतइत्यादाविस
त्वः। अप्रस्तुतेति। अप्रस्तुतस्य शकुंतादेस्तत्रावर्णितत्वादतिशयोक्तिस्थले च वापीकापीत्यादौ वापीकापीत्यादिना प्रस्तुतेनाप्रस्तुतना
म्पादेर्वर्णनीयत्वादतिशयोक्तिस्य दयितंशंक्येति भावः। प्रसिद्धेयं हेतुरित्याह। तत्रेति। प्रसिद्धेति वापीकापीत्यादि सर्वं समतेत्यर्थः
तद्धतेति। प्रस्तुतगतेत्यर्थः। अप्रस्तुतप्रशंसायां क्वचित्प्रस्तुताप्रस्तुतयोरभेदाध्यवसानमप्यप्रस्तुतवाक्यार्थप्रतीतिकाले इत्यप्र
ता० तो। ललितेतु नक्वापीति स्तुतरामतिशयोक्तेरभेद इत्याह। सोपूर्व इत्यादिना। रसनाविपर्ययैश्च भिन्नशापात्क वि णं जिह्वापरिवृत्तिः। प०
पूर्वविपरीताभिधानं च कर्णचापलं प्रसिद्धं पिशुनप्रतायत्वे च मदः प्रसिद्धो गर्वश्च। तेन विस्मृतास्वपरयोर्दिङ्मार्गः। आत्मा
नामविभागस्त्वयया सा दृष्टिः वारणगजो वारकश्च। मन्त्यः सरंध्रः धनरहितश्च गृहं न घटते तत्राह। अप्रस्तुत इति। एत कृ०तो ४
द्भ्रमरासेव्यत्व रत्नस्य विशेषणं। भ्रमरनिराकरणस्येति च कर्णचापलमात्रस्येत्यस्य कोडीकारः स्वार्थेन सममभेदाध्यवसायः। अ
प्रस्तुतसंबोधनादीति। आदिना सारूप्यनिबंधनप्रस्तुतवाक्यार्थावगतिपरिग्रहः। अत्रापि ललितोपि। वर्णनारूपस्येति। चम
त्कारितारूपायाविछित्तेरसदवछेदकवर्णनारूपत्वमित्यभिप्रायः। कस्यचित। नेत्रद्वंद्वादेः स्ववाचकेन नेत्रादिपदेनानिर्दिष्टत्वा
त्। अप्रतिपादितत्वात्। मतिशयोक्तिरस्तीति। अतिशयोक्तिर्वास्तीत्यर्थः। तत्प्रसंगात्। संबोध्यवोद्यारपितत्वयोरसंबंधवर्णनाद
तिशयोक्तिमात्रप्रसंगात्। अलंकालांतरं कस्त्वमित्यादावप्रस्तुतप्रशंसा प्रकृते तु ललितमिति। तत्प्रतिबिंबेति। प्रस्तुतार्थप्रतिबिंब
रूपस्याप्रस्तुतार्थस्येत्यर्थः। अदोपूर्वार्द्धं विषमेति। स्वमति सूर्यवंशयोरत्यंतानुरूपेत्यर्थः। तात्पर्यस्य। तादृशमतिकरणक
सूर्यवंशवर्णनेच्छाभिप्रायस्यानायीति। नन्वप्रतिदमयंत्या उक्तिः। हे नल। अद्यत्वयाकमतोदेशः। वसंतमुकुरस्य दशामनापिप्रा
पितः। त्वयिप्राप्तसंकेततयारूतार्थासंज्ञानामापि अनेन नमन्मलक्षणेन जनेन नन्वव्यासवर्णहीं। अपितु अस्येवेति। अत्र च ता
दृशवनदशारूपस्याप्रस्तुतार्थस्य। प्रस्तुतेदेशेकपनात्प्रस्तुतवृत्तान्तस्य तत्स्वरूपस्य प्रतीतिः। न चात्र वारणेंदुनीलामितिवत्पदार्थनिद
र्शनायुक्तेतिवाच्यं। तत्रपूर्वार्द्धे न प्रकृतवृत्तांतोपादानेन सादृश्यपर्यवसानरूपनिदर्शनासत्त्वेप्यत्र तदउपदानेन व्यंग्यतापयुक्तविछि
त्तिविशेषवत्त्वेन ललितालंकारस्यैवोचितत्वात्। एतेन दशापदलक्षितनिःश्रीकत्वरूपकार्यद्वारेणस्यराजकर्तृकत्वाकर्मत्वस्याभि
धानात्पर्यायोक्तमित्यपिस्तउपधेयसंकरेप्युपाधेरसंकरात्त्वेति संक्षेपः। इति ललितालंकारः। तामेति। दूतिकामेवेत्यर्थः। विसृष्ट
प्रेषिता ससंकल्पा। मनोरथसहिता। मेघैरिति। मेदुरं तुंदिलं नक्तं रात्रौ भीरुरित्यस्यैव। नंदनिदेशतः नंदाज्ञावशात्। प्रत्यध्वकुं
जद्रुमं अध्वसंबंधकुंजद्रुमं प्रतिगीतगोविंदकृता। चातकइति। यत्तु चातकस्यत्रिचतुरकणमात्रार्थितयाजलदक

तेकेणं भसाविभ्रमूरणे न ह्यर्थाधिक्यान्नावादयुक्तमुदाहरणमिति। तन्नुच्छं हेत्वसिद्धेः। नहि ततुपशमायास्यार्थाप्राप्तमात्रार्थिनस्त
दर्थिकान्नलाभे दर्थाधिक्यं नास्तीति वक्तुं शक्यं तदानीमुपयोगाभावेपि स्वस्यैव कालान्तरे तदुपयोगसंभवात्। नच चातकस्य ज
लसंग्रहानुपसंयोगाद्वैषम्यं शंकनीयम्। चातकवृत्तान्तस्याप्रस्तुततया तद्वाये प्रस्तुतदानेपावकवृत्तान्ते काव्यस्य पर्यवसानादि
ति। तृतीयं प्रभेदमाह। कल्पादिति। प्रकर्षेणेति सप्तम्यनुवर्त्तते। निध्यंति। निधिदर्शनसाधनं खननं तत्साधनैः सुधीमूलमित्यर्थः। साधि
तो लब्धः। छिन्नेति। अधःस्थितं वृक्षस्याधोदेशे स्थितं। अवस्थितमिति पाठे समीपशोकवृक्ष एव च वस्थितमित्यर्थः। सिक्ताः सिक्ताविटपाः
शाखा येनेति पुष्पो चविक्षोपणं। अददाघातस्मादिति नवतीयष्टिः स्वेदः। तेन पदाघाते न पुनरस्याप्यामूलं पुष्पिताभूदर्थादशोकयष्टिः।
अत्र च तदसाध्यकपत्नात्तल्लाभ इति प्रकारत्रयसाधारणं सामान्यलक्षणं बोध्यं। इति प्रहर्षणालंकारः। इच्छमाणेति। इच्छमाणविरु
द्धे योर्थस्तत्संप्राप्तिर्विषादनमलंकारः। उद्योजयेद्यावदित्यनेन तदिच्छामात्रेन तत्कारणमिति विषमाभेदः। एवमग्रिमोदाहरणेपी
च्छामात्रेन तद्विरोध्यनुकूलाचरणमिति। इति विषादनालंकारः। एकस्येति। एकस्य गुणदोषाभ्यामन्यस्य तौ गुणदोषौ यदि भवतस्त
दोल्लासालंकारः। अपीति। अपिः संभावनायां। साध्वी पतिव्रता सा त्वां मां पावयेदिति जाह्नवीच्छतीत्यन्वयः। तव घाटीषु युद्धयात्रासु
कुचयोः स्रष्टं काठिन्यं पादयोर्वीच्छतोरियोषितां विम्रधातारं निंदतीत्यन्वयः। स्रष्टुमिति पाठे कुचयोः काठिन्यं पादयोः स्रष्टुमिच्छ
तीत्यन्वयः। लाभोयमिति। भूपालसेवकानामयमेवलाभो यदि वधो न भवतीत्यन्वयः। यदयमिति। रघ्वस्य संज्ञो मोच्छलना
यद्दयमंसांसेनापीदपितापानिपीडितः। संघर्षणः मर्माणि वेषु मध्ये स एवैकः कृती कुशलः अवशिष्टमंगमनेनापि मात्रमित्यर्थः
दुर्वंशोदुष्षेवेणभिः दुष्कुलेत्यादिः अर्थोबोध्यः। वननाशरूपः वनसंबंधीनाशरूपः वनस्येति युक्ततरः पाठः। तत्सुतिज्ञेयो भ्रमरनिरा
सः। गजस्य दोषत्वेनेति संबंधः। आघ्रातमिति। मुहुः परिलीढं आस्वादितं। नीरसेन मनसा कारणभूतेन वानरेणकर्णीतत्र तस्मिन्नस्ति वि
चारणव्यवसिनाविचारतत्परेण अंजमनापाषाणेन। प्रथमचतुर्थयोः गुणेन गुणदोषेण वा गुणभेदयो उल्लासस्य शाब्दः अन्व
यं इति। उल्लासोल्लासः सुखयंत्रेत्यर्थानुगतइत्यर्थः। पश्चिन्यायेति। केषुचित् संबंधात्। मन्छतित्रिसमुदायेच्छतित्रिरणेया
तीति वदित्यर्थः। इत्युल्लासालंकारः। प्रस्थं प्रस्थपरिमाणपात्रं। मदुक्तिरिति। ममोक्तिः कविता सुधियोऽन्तःकरणं सुधीभ्यस्याम्रती
अपवेन्मदयति तदाऽस्मामनुक्ते अरसानीनीरसानापुरुषाणामनादरसमर्थैः किंनामस्यान्नकिंचिदर्थः। क्वचिदलसेति पाठः। प
रमरमणीयापि केवरमणीयूनस्तरुणस्यपाणांतःकरणहरणे कुरुते तद्वत्कुमाराणां वातानांनेत्यन्वयः। त्वं चेदिति।
शिवं प्रति कस्यापि कविरुक्तिः। जलांशु चंद्रः। पद्मेजडोंशुः। अंबुजबांधवः सूर्यः उल्लासरूपगुणभावः इत्यवज्ञालंकारः।
दोषस्येति। अभ्यर्थनादृष्टा तत्रैव दोषगुणएव। अनुज्ञेति लक्षणनिर्देशः। शश्वत् निरंतरं संपत्किंमित इत्यनेनान्वयः। मय्येवेति।
जीर्णतां प्रत्युपकाराद्धमतां। हरिर्वानरः। अतिरेकामुखीति। वैधर्म्यमुखेत्यर्थः। अस्य चार्थोऽन्तरन्यासेनेत्यनेनान्वयः। दर्शिते
ति। वैधर्म्यविपर्यः प्रत्युपकारानभिलाषीविपत्तिनाकांक्षतीत्यर्थः विपर्ययवसानादिति भावः। मजेमेति। हे प्रभयनायहर

यैश्चावतामेतत्प्राप्यम भवतोऽन्तिकं समीपदेशं भजेम अस्मत्संपत्तीः किमिति प्रार्थयामहे। यतो मघवादिभिरिंद्रप्रमुखैरपि
सचेद्वन्दे हत्लीसुविकट तेऽस्य वक्त्रं तंऽस्य दंष्ट्राघातैः स्फुटन्तः कुदाग्रे भूर्यत इत्यर्थः। इत्यनुज्ञालंकारः। लेश इ
ति। लक्ष्यनिर्देशः। प्रवसतीति सति सप्तम्यंतं। स्तुकस्य निंदायां निंदाव्याजेन स्तुतौ वेत्यन्वयः। संत इति। सच्चरितोदयो वृद्धिः सता समी
चीनेन कृतेनाचरणेन प्राकृतो दीनीचः। युवैव इति। वरार्थिनी कन्यकां प्रति सखीनं। चपल इत्यादि च नायिकायाः सखीं प्रति वच
नं। उत्सेक इति पाठे प्युत्सेक एवार्थः। कन्याया दोषत्वेन वर्णनं तत्राह। राजकोपेति। अन्येन विदितं यथा स्यादिति। विशेषणं लेश
तएवेति। तदुक्तं दंडिनैव लेशमेके विदुर्निंदा स्तुतिं वा लेशतः कृतामिति लेशपाजुस्पति। कृतस्नार्थकं। उदाहरणयोः अखिलेषु
त्याद्यो॥ भिन्नविषयेति। अन्यनिंदया अन्यस्य स्तुतिरन्यस्तुत्या चान्यनिंदेत्येवमादिरूपेत्यर्थः। ननु तथाप्येकविषया व्याजस्तुतिर्न
लेशाद्भिद्यते तत्राशंक्याह। विषयैक्येपीति। लेशस्य प्रसिद्धादित्संगृहीतनेनान्वयः। इंदोरिति। हे उर्वीवलयतिलकरूप राजन् त्वदी
यैर्यशोभिः किं धवलितं तद्धृदयतो घापि इंदुलक्ष्म्यादीनि स्पष्टमलिनतया पशम भर्वर्णनानुलिप्तान्याभासंते इत्यन्वयः। लक्ष्मलांछनं दि
ङ्नागानां दिग्गजानां मदजलमेव मषीतद्ग्रोजितयुक्तानि। परिसंख्येति। एतान्येव यशोमालिन्येन रूपेत्यर्थः। विषयेतरं दोषीकृता
दुर्ने गुणरूपमालंबनं। सर्वदेति। अरयः शत्रवः पुष्पमर्षीनव नत्नैभिरे पलायनाभावात्। दीनारः परिमाणविशेषपरिच्छिन्नाः सुव
र्णमुद्राः। एवं च लेशव्याजस्तुत्योरसंकीर्णविषयसत्त्वे चागुणदोषीकरणादिकमित्यादिपदेन दोषगुणीकरणसंग्रहः। ये
षि तूपक्रमास्तत्रेति पाठो युक्ततरः। अत्रेत्यपि क्रम एव। इदमेपि यच्छब्दार्थपरामर्शकत्वात्। इति लेशालंकारः। सूच्यार्थेति।
सूचनीयस्यार्थस्येत्यर्थः। समुद्रेति लक्ष्यनिर्देशः। दृग्युगं विपुलं यस्याः। अग्रग्रंथे। अस्मिन्नलंकारग्रंथे रत्नमालाख्येन भगव
त्स्तुतिपद्यावलीविशेषउच्यते। रत्नाम निवेशेन। प्रकृतार्थपरा रत्नवाचिपदघटनेन। तन्नामकजातिसूचनं। तन्नामप्रवृत्ति
निमित्तरत्नजातिसूचनं। नक्षत्रमालाप्राप्यर्थोपि पूर्वोक्त एव। अस्यादिदेवतानामभिन्नं नक्षत्राणं तद्देवतानां सूचनं बोध्यं। वक्ष्य
माणेति। यथा अनर्घ एव येति न्यायप्रवृत्तस्यतिर्यं चोपि सहायतां। अपयाने तु गच्छतं सोदरोपि विमुंचतीति हरिजधारपरेण वक्ष्य
माणत्रावणवृत्तांतसूचनमिति बोध्यं। इति मुद्रालंकारः। क्रमिकमिति। प्रकृतार्थानां क्रमिकं प्रसिद्धक्रमानुसारि न्यसनं प्रतिपा
दनं रत्नावलिरलंकारः। प्रकृतित्वं च यथा कथंचित्प्रकृतसंबंधित्वं बोध्यं। चतुरेति। चतुरमास्यं यस्य सः चतुर्मुखब्रह्मा। रत्याप्रेति।
हे वातेभ भवत्याः स्तने श्रीरमणस्य विष्णोरवतारदशकं भातीत्यन्वयः। कीदृशोरतावाप्रप्रायप्रियस्यल्लाघनं चिह्नं। नखचक्षता
[illegible]दिकं येन तथा मत्ते। कठिनतायाश्चाबासेस्थान मत्तेरसेनालिंगिते। प्रकृष्टाह्लादेऽएकरसेन नमेद्धे कमाद्धदशमत्स्यकादिपरि
माणलाभेनोपचितेपृथदृद्धे भृगुसन्तापर्वतानां गुरुत्वमपहंति नाशयतीति ताहशे। ततोपि महत्त्वात् चक्रवाकस्पर्द्धाशीलिनि सहमानत्वात् भोगः
सुखं शरीरं वा। तत्कुति मानितमदर्ने। खबिंदुरिये बलीनाम्यासंक्रांते अन्यस्यायस्मिन्तादृशे। एतैरेव विशेषणैरवतारदशकरूप

अलंकारकौस्तुभ

पुरुषाः सोमलता

कु.व.
टी.
५.
५०

ताधिस्तनस्य वोधं। तपस्यारत्या आप्तः प्रियः कामस्तस्य लांछनं मत्स्य तद्रूपे। कठिनतायामावासे क्रमेंद रसया पृथिव्या स्वोद्वार
काले। आलिंगिते वराहस्वरूपे एको रसः प्रीतिर्यस्य तस्मिन्नसिंहे। क्रमः पादविक्षेपस्तदनुसारेण पवित्रे वद्धे वामने। भृगुसुतो राज्ञां
जौरवनाशके भार्गवे। कोकस्य दुःखिसीता वियुक्त तया चक्रवाकशापदे रामे योगः। फलात तद्राजिशेषावतारे। वल्लभद्रे जनित
मन्नं गंगायां गस्य शरीरस्य विरुद्धमोनत्याग समाधिरूपं येन तस्मिन् बुद्धे। रवल्लीनमश्वस्य वल्गा तिदुःखे कल्किनीति। क्रमानन
नुसरणे पीतितया च प्रसिद्धं सहपठानामर्थानाम्पसने रत्नावलिरिति सामान्यलक्षणं। स क्रमाक्रमत्वे तद्भेदावितिभावः। यस्येति।
यस्य प्रतापः निहतानां प्रतिसामंतानां शत्रुभूपानामंतः पुरेषु पंचमहाभूतमयो मूर्त इवाह दृश्यते इत्यन्वयः। महाभूतमयत्व
मेव विशेषणेन दर्शयति। वह्निमय इति। अंगेषु दहमानमयः एष्वीमयः पीडामयसन्निधत्वात्। स्वांते षुतः करणेषु आकाशमयः
तेषां शून्यतामयत्वात्। यथाकथंचिदित्यस्य प्रपंचेन प्रकृतोपमानेत्यादि। उपरंमाने चोपरंजके चोपमानो परंजके
तयोर्भावस्तत्ता। प्रकृते प्रत्युपमानता। उपरंजकता चेत्यर्थः। उपरंजकता चारोप्यमाणता। तदुक्तं। उपरंजकतामेति विष
यी रूपकं तदेति। तत्रोपमानतारविरिव प्रतिदिवसोपजायमानोदय इत्यादिवत्। उपरंजकता तु वनुरागस्य इत्युदाहरणे। वह्निमय घो
इत्यादि प्रतापवर्णने च स्पष्टेति। प्रकृतात्वयं विनेति। भिन्नचंद्रमुखीकल्लालोहिताधरपल्लवेत्यादाविति भावः। क्रमिकेत्युपलक्ष
णं। तदभावेपि। गुरुणा जघनेनैषा तनुर्मध्ये लीमेद गामिनीत्यादावप्ययमलंकार इति बोध्यं। इति रत्नावलीअलंकारः। तद्गुण इति।
स्वगुणत्यागादनंतरमन्यदीयगुणग्रहणं तद्गुणालंकारः। पद्येति। तननासामौक्तिकमधरकांत्या पद्मरागवदाचरणीयं
यः। वीरेति। हे वीर त्वदरिकामिनी वनमृगविपरिधाने कर्तुं पल्लवानि केतेण संस्पृश्य पोड पुंजेषु आनहरति नगरुषाति। कीदृशानि नि अर्जुनः से तत्र =
जकररुहारुणेन रवानां रुच्या श्वेतकांत्या स्वचितानि व्याप्तानीत्यर्थः। इति तद्गुणालंकारः। पुनरिति। स्वगुणत्यागानंतरं पुनः स्वगुणप्राप्तिः
पूर्वरूपमलंकारः। हरेति। नीलोपीति पुस्तः पाठः। विभिन्नेति। माघे रैवतकवर्णने। गरुडाग्रजेनारुणेन विभिन्नवर्णा मिलितवर्णाः
सूर्यस्य रथ्या अश्वा यत्र गिरौ वंशांकुरवन्नीलैरहैः परितः स्फुरंत्या रुचा स्वां रुचं नीलद्युतिं आनेयिरे आनीतवंतः। रुचा विभि
न्नवर्णा इति वान्वयः। केचिदित्यस्य रसवीजं तु पञ्चमो यत इत्युदाहरणे तद्गुणालंकारो न स्यात्। न चेष्टापत्तिः। अननुभवसिद्धत्वम
त्कारस्य निरालंबनत्वापत्तेरित्यरुचनीयः। अपवाये तद्गुणएवेत्येवकारक्रमभंगेन काव्यप्रकाशकारादिमतोपन्यासपरत्वेन वाख्ये
यं तेरत्र तद्गुणस्योदाहृतत्वात्। अनन्तरं पूर्वमप्यनामरुणगुणत्वा। अनेन तरं रैवतकरत्ने रुमयेषां तद्गुणद्वयमिति तेषामभिमतम्।
पूर्वेति। वस्तुनि विकृते विगते सत्यपि पूर्वावस्थाया अनुवृत्तिरपि पूर्वरूपमलंकारः महः प्रकाशकः। द्वारमिति। से राजन्नतव
विद्विषां वैरिणां मंदिरे अन्येपि चिरंतनः पुण्यो यस्याः सेवराज्यस्य स्थितिर्मर्यादास्तीति शेषः। द्वारमिति। हे यतो द्वारं रवड्गभिगं
इकारवपश्चभिरेवरवड्गधारिभिरावृतं। वहिरपि भूमयः मदप्रस्विन्नगंडैर्गजैरध्यासिताः। अंतः पुरभूमयः विलसत्कांणिघा
रिभिः केचुकिभिः सर्पैरेव सर्त्तरध्यासिताः। शायनं तल्पे महिषीभिर्वनताभिरेव महिषस्त्रीभिराक्रांतमित्यन्वयः। इतिपूर्व ५.

रूपालंकारः। संगतेति। संगतः संबद्धो योऽन्यपदार्थस्तद्गुणेनांगीकारमतद्गुणालंकारमाहुः॥ चिरमिति। रागिणि अनुरागि
णि मंजिष्ठादिरंजनद्रव्ययुक्ते च विहितोऽपि त्वं न रज्यसि। रक्तोऽनुरक्तो न भवसीति श्लिष्टं। गंगेति। हे श्रीमन्नसिंहाख्यभूपते। ए
षा तव कीर्तिर्मदैः पिच्छले वं किल दिग्गजानां गंडप्रदेशे यद्यपि विहरति तथापि वैरिस्त्रीणां नयनकमलेषु स्थितान्यंजनानि धूमा
ख्रिप्रोञ्छति तदपि तथापि दिने हिमकरस्य चंद्रस्य यत्किरणाद्वैतं सौवस्तिकी स्वस्तीत्याह तस्यार्थे तदाहेति माघाद्यादिभ्य इति ठकाव
त्सदृशीति यावत्। स्फुरति प्रकाशते। विशेषाकारेणेति। प्राग्लसितविशेषरूपेणेत्यर्थः इति संगतितद्गुणालंकारः। प्रागि
ति। परसन्निधिवशात्पूर्वसिद्धस्य स्वगुणोत्कर्षः। अनुगुणो नामा इति स्वभावलोहिते चरणे लाक्षालंकारः॥ नीलोत्पलानि कर्णे
वतंसीकृतानि। कपिशायनेन मद्येन इत्यनुगुणालंकारः। मीलितमिति। लक्ष्यनिर्देशः। रसइति। स्वभावलोहिते चरणे लाक्षायार
सो नालक्षि न ज्ञातः। मल्लिकेति। क्षौमं दुकूलं तद्धारिण्यः। इति मीलितालंकारः॥ सामान्यमिति निर्देशः॥ विशेषो व्यावर्तकधर्मः
पद्मनामाकरः पद्माकरः। वालिसूनुना अंगदेन एकेन चरणे ज्योत्स्नादिना। अपरस्परलक्ष्यासाभिसारिकादेः॥ भिन्नरूपेति।
मुखपत्रादेर्भिन्नस्य स्वरूपस्यावभासेऽपीत्यर्थः। उक्तमेवार्थमुदाहरणे रूढतया विशदयति। मीलितोदाहरणे द्वीति। वस्व
तरत्वेन न भासत इत्यन्वयः। तत्स्मृतिविंबानां च कपोलतया भानमस्त्येवेत्यनुषंगः। केचिदित्याहुरित्यग्रिमेणान्वयः। केचित्तु प्रकाश
कारादयः। तदुक्तं समेन लक्ष्मणा वस्तुतस्तु नायमग्रहस्ते। निजेनांगेन तुल्येनाव्यापितत्त्वमीलितमिति सूत्रमिति। तयोर्मध्ये एवं चेत्प्रसे
त्वत्र मीलितालंकार इत्यग्रेतनेनान्वयः। अपांगस्तरलो ययोस्ते तरलाः सत्वरसंचारणेन। वक्रा वक्रोक्तिगर्भा वर्णैः प्रास्तुता गिरो वा
करूपाः। इति प्रकारेण मृगदृशामंगकेलीलया स्वतः स्वभावात्स्फुरिते प्रकटीभूते तत्र तस्मादत्रोके कृतपदः कृतस्थितिः॥
भेदाध्यवसायेऽपीति। मुखपद्मयोर्भेदावभासेऽपीत्यर्थः॥ आवर्ण्यकास्फुरणेन हेतुना अलंकारांतरेणेति। स्वरूपातिरोधाने
नच सामान्यस्याप्यसंभवादिति भावः। सामान्येति। तथा च गुणसामान्ये विशेषाग्रह इति सामान्यालंकारसामान्यलक्षणे विशेषा
ग्रहस्य क्वचिद्भेदे गृह्यमाणे क्वचिन्नागृह्यमाणे इत्याद्यप्रकारेण गतिरत्र तन्मते स्यादिति भावः। अवांतरभेदेन चैतन्नेतरमा
व्यक्तित्यनुवक्ष्यते। एवंस्मिन्निति मीलितं यदि सादृश्यादि पूर्वोक्तचंद्रालोककृन्मत इत्यर्थः। स्वरूपतिरोधाने। अपांगतरल इत्यादि
स्वरूपतिरोधानस्थले। अलंकारेणेत्यादि। स्वरूपता ज्ञायमाने सादृश्याद्भेदाग्रहणे मीलितमित्यंगीकारे प्रथमः। पद्मः सादृश्या
भेदाग्रहणमित्येतावन्मात्रं मीलितलक्षणेंगीकारे तु द्वितीय इति भावः। इति सामान्यालंकारः॥ भेदेति। वैशिष्ट्यस्य वैजात्यमुन्नी
लितं विशेषकक्रमेणालंकारौ मग्नेनोदयग्रहानदे तर्गतं। लक्षितानीति। संकुचितत्वादिति भावः। सामान्यरीत्या सामान्याल

कु॰ व॰ टी॰ ४२ ४१

कारन्यायेन एवं चैवेत्वं चातुल्यरुचावधनोकुर्णाग्रतोगं इतलोकतानि। भंगाः संहेलं यदिनायति ध्वनत्कोवेदयिष्यत्रवंधका
नीत्यपि विशेषकोदाहरणं बोध्यं। यत्वनुलंकारे ऐव गतार्थत्वात्रानयोरलंकारांतरत्वमितिं युक्तं। उदाहृतस्थले भेदे विशेषस्फूर्ति
विशेषदर्शनहेतुकप्रत्यक्षरूपत्वात्। तथापि स्वकपोलकल्पितपरिभाषया ऽनुमानालंकारं तां ब्रूषे तथापि सादृश्यमहिम्ना प्र
गतवगतयोर्भेदं वैजात्ययोः स्फुरणमनाविशेषाकारेणासीति तत्सामान्यप्रतिद्वंद्विनायुक्तमेवालंकारांतरत्वं। अतएव वक्तयो
रियविशेषोलंकारादिस्थले विस्तरेण। नत्सदिति। नित्यंकुर्वतो मर्गस्य हरस्य योहृहासस्तत्सरस्य समहस्य विस्तारस्य चास
हचरैः सदृशोरित्यर्थः। ईदृकवीन्द्रिवक्षुल्लो। एवकमलाकामुकः नाभीकमलपरिमलस्य प्रौढिं समृद्धिं यदिनासादयिष्यन्ना
धारयिष्यदित्यन्वयः। यत्नुतद्गुणस्यात्रनिर्वाधकत्वात्कयंततस्तुति द्वंद्वित्वमुन्मीलितस्येति तदनुकोपालंभरूपत्वादुपेक्षितद्गुणेन भेदा
नध्यवसायमात्रस्योक्तत्वात्। वारणसीति। लोछनेतती यल्लोचनादि चिह्नसाधारणेपि ससीत्यत्यन्वयः। पार्थो र्जुनस्तेन कृतोयः प्रहारस्तेन
चूलेयत्रतादृशमस्त्रम् गंपिरः। पूर्वत्रस्वाभाविकागुणसाम्यं उहतत्राउंगतुसाम्यमितिभेदः। इत्युन्मीलितविशेषकालंकारेभकिंचिदिति॥
किंचिदभिप्रायसहितं गूढमुत्तरं उत्तरं नामालंकारः। वेतसीवेतसलतासुखेन तरितुं योग्याः सुतराः ग्रामइति। प्रस्तरप्रायेण पाषाणेव
कुलेपाषाणतुल्येच। प्रायोवा हृत्स्यतुल्ययोरिति कोशात्। किंचिदासरणादिकं। समागमप्रतिबंधकं चपयोधरमेघं चस्तनम्। कश्चिद्व
गमिष्यतिज्ञास्यतीसेताहर्यो इत्यादिरूपं। उन्नेयः कल्प्यः प्रश्नोयेनतादृशस्योत्तरस्याईक्षामानेति। ईक्षाहेतुकमानेत्यर्थः। अनुतप्रायाः पक्षा
नापप्रयुक्तायाप्रश्नोत्तरेति। प्रश्नस्य उत्तरांतरं चप्रश्नोत्तरांतरे ताभ्यामभिन्नमुत्तरं चित्रमित्युच्यते इत्यर्थः। केदारेति। दाराणां पोषणे रताः के इति
प्रश्नः। केदारस्यक्षेत्रस्यपोषणेरताइत्युत्तरं तदेव। केखेटाः खेश्नाकाशेखेटतीति प्रश्नस्य यदुत्तरं वयः पक्षिणः इतितत्र चलमित्यस्य यदुत्तरांत
रंचयस्तारुण्यादीतितेनाभिन्नं॥ इत्युत्तरालंकारः॥ सूक्ष्ममिति। परापरायाभिज्ञस्येतरस्मिन्परविषये साभिप्रायं चेष्टितं सूक्ष्मालंकारः। पराश
या॥ भिज्ञस्यासावितरश्चतस्य साकूतचेष्टितमर्थान्तरविषयइतिवार्थः। संकेतेति॥ संकेतकाले मनोयस्य तज्जिज्ञासुमितिलक्ष्यनिर्देशः।
तलंप्रापनं। वक्रेति। वक्रप्रस्त्रवणशीलानां स्वेदविंदूनां प्रबंधैर्धाराभिः कंठेलग्नंभिन्नं कुंकुमं दृष्ट्वा कापिवयस्यासखी। स्मित्वास्मितं कृ
त्वापुंस्त्वं व्यंजयंतीसतीतन्व्याः पाणौ खड्गं लेखेत्यन्वयः। सूक्ष्मालंकारे पराभिप्रायमवगम्य साकूतचेष्टितेभोत्तरस्यर्पणं पिहितालंका
रे गूढं परवृत्तांतंज्ञात्वा साकूतचेष्टयातत्प्रकाशनमिति भेदोवाध्यः॥ इति पिहितालंकारः॥ व्याजोक्तिरिति लक्ष्यनिर्देशः। चौर्यरतेकृत
यत्केतभूमिप्रलुंठनमित्यन्वयः। उपपतिनाजारेण। तस्याछेकापहुतौ। आयातमिति। प्रतोल्यारथ्यायाम्। एका काचिद्ग्रामवनितासखाः
पुरस्तात्तरसा चक्रंपादिभिरनुभावैर्वीजमानमनुरागेण हरिं पूर्णमंतीसती जुगूहगोपितवतीत्यन्वयः। लक्ष्यतेव्यज्यते। एवमिति।
सूक्ष्मालंकारवदुक्तरूपव्यापारवर्णनमित्यर्थः। उदाहरणं व्यमिति। यथा वक्रस्पंदीति यच्च एवं पुंस्त्वंतन्व्याव्यंजयंतीवयस्यातामाहायत्वा

प्रपश्यामि नाथमित्युत्तरार्धमिमिलितनाथमित्युक्त्या प्रकाशनमिति बोध्यं। वस्तुसौंदर्येति। चेतस्यनितुंन रूपवस्तुसौंदर्यं त्वर्थः। ध्वनिभा
वात्स्यादत्वात् ध्वनित्वाश्रयत्वात्। उपसंहरति अतइति। ऐश्वर्यस्यभावा विष्करणमस्तीत्यनेनान्वयः अइति व्याजोक्तिरलंकारः। गू
ढोक्तिरिति। यदन्योद्देश्यकं वाक्यं तत्रदन्यप्रति कथ्यते चेद् गूढोक्तिरलंकारः। हे अत्रसंस्थादेः कलत्रं च। अन्ये इति दूरे भवः। अविवक्षित
त्वादिति। अयं भावः। प्रकृताप्रकृतश्लेषेऽप्यसावुदयमारूढ इत्यादावप्रकृतार्थस्य प्रकृतार्थोपमानतयोऽन्वयः स्वीक्रियते
सर्वथैव प्रकृतासंबद्धस्याप्रकृतार्थीकथनं। तन्नाहत स्येति। अप्रकृतार्थस्येत्यर्थः। ननु तादृशविवक्षाविरहेऽपि नानार्थविभा
सत्वेऽपि श्लेषबलवेत्याशंक्याह। विच्छित्तिविशेति। तथा च श्लेषसत्वेऽपि विच्छित्तिविशेषाद् गूढोक्तिरवश्यमंगीकार्य इत्याशयः।
अत एव श्लेषमात्रमिति। तन्मात्रनिराकरणमेवोपक्रांतं न तु श्लेषनिराकरणमिति। नाथइति। विपणिः पण्यवीथिका। पुष्पिणी
रजस्वला अगमेन वेदेन लालनीयः स्तुत्यः। आगमेन लालनीयस्य रजनी चास्ति त्वं तत्संयोगे द्वितीया। इति गूढोक्तिरलंकारः
श्लिष्टत्वमुपलक्षणं। अर्थशक्तिमूलगुप्तस्यापि गच्छाम्यच्युतेत्यादौ संग्राह्यत्वात्। वत्सेति। वत्से लक्ष्मिविषादेषे वेदेहरं उरुजवं
महावेगं ऊर्ध्वश्वासे पवनेऽवसंत्यजकं जलं पातीति तथा वरुणः पंकजस्य। गुरुर्महान् बृहस्पतिश्च। बलं प्रसिद्धं। तद्विदा
नाशकेन बलाख्यदैत्यनाशकेनेंद्रेण च। अत्र श्रीकृष्णसन्निधौ यादृ इति प्रकारेण भयनिवारणव्याजेन सत्याणं प्रत्याख्या
नं वर्जनं कारयित्वा मयोऽमयनेतेन मुग्धः पयोधिर्यस्मै लक्ष्मी मदात्सर्वो दुरितं दहत्वित्यन्वयः। परेति॥ परवंचनायगु
प्तस्याविष्करणमित्यर्थः। जयेति। न ज्ञाया गुप्तस्येत्यर्थः। हस्येति॥ गोपित्वयि यो रागस्तस्य सक्तिः सक्तहृतया अपहृतया गवां परागे
धूलिभिर्व्याप्ततया च। गोपेति संबोधनं वा किं चित्तमविषमे युक्तायुक्ते चा इहत्वयि भूमौ च पतत्सु भीवः पतितानां पतनं प्राप्तं च
विषमेषु पंचशिरस्तेन खिन्नमनसा। विषमेषु संकटेषु खिन्नानां च अबलानां स्त्रीणां बलरहितानां च सलेशं सस्सूचनं
जोसस्थानं। चेतानलमिति। लोको न ययौ तेग च्छतीत्यर्थेन नलं कामयते इच्छतीत्यर्थो गुप्तः तदविष्करणं च ह्रीणहृण
चेत्यनेनेति बोध्यं। शाद्वलाक्रीति। शाद्वलभूमिदर्शनेत्यर्थः। क्रीडीकृतः संगृहीतः। गच्छामीति। अच्युतमद्विधेयेसखलितेति
गुप्तार्थः। चिरकालं त्वद्दर्शनेनापिन तृप्तिरित्यर्थेन दर्शनेन न तृप्तिरपि तु संभोगेनेत्यर्थो गुप्तः। विजनस्थयोरेकांत
गतयोः हृतस्या सो जनस्य। अन्यथारत्यर्थस्थितावितिसंभावतितेनेह्वयोरकीर्त्तिजाते वदृप्ये वात्मानं वंचया वइतिगुप्तार्थः
सम्भुत्वमिति। सुभ्रू दयिता दृष्टिश्च। तयोः संबोधनं कोपोशोषः विकारश्च। राशिणानुरागिणीति। अवनतेन मृश इति च मयी
त्यस्य विशेषणं। पद्मेरागिणि रक्तिमशालिन मृइति हक्लेवोधनं। एवं दृष्टइत्यपि। उच्चारणेनेति। स्वरविशेषसहकृतो
अमेत्र एस्याच्युतेत्यादेर्भावार्चनयास्सूचितो यो वृथावस्थानखेदस्तेनालसां कवितिवदेति। कविनिवद्ध
वक्रा गुप्तस्येत्यर्थः २ अरिः

कु॰व॰
टी॰
५२
५२

चारणेनेत्यर्थः। इति विरुतोऽलंकारः। युक्तिरिति॥ स्वस्य मर्मगोपनाय क्रियया यत्परस्याभिसंधानं वंचनं सा युक्तिरलंकारः।
त्वामिति। नायकं प्रति दूत्युक्तिः। पुष्पस्वेदं पोष्यम्। दंपत्योरिति। तस्याभुकस्य अतिमात्रमत्यर्थं निगदत इति संबंधः। फलशरीरवी
जपरः। गोपनीयविषयभेदस्य विच्छित्तिभेदप्रयोजकत्वात्। यद्देहेति। नन्वेवं सत्यायां तमालोक्य तस्या दोषाजो युक्तिरेवेति प्रागुक्तं वि
रुद्धेत्याशंक्याह। एवं चेति। यद्वेति पक्षांगीकारे चेत्यर्थः। एवं च पूर्वग्रंथस्याद्यपक्षाभिप्रायेणेत्यर्थः। इति युक्त्यलंकारः। लोकेति। अ
नुकृतिरनुकरणं। सहस्वेति। अर्थ्याहिर हे मासाननभिव्याप्येत्यर्थः। नामैवेति। हे वरद नामैव वांछितदातृत्वमात्रं व्याख्यातिकथयति। अतस्त्वं
वरदानमुद्रामितरदेवतवद्धारयसि। यतो विश्वप्रसिद्धतरा विप्रकुले प्रसूतिरुत्पत्तिर्यस्येत्यर्थः॥ इति लोकोक्त्यलंकारः। छेकोक्तिरिति
लक्षणनिर्देशः। अर्थांतरगर्भिता अर्थांतरगर्भिता अर्थांतरव्यंजकता समीपस्थस्य हृदयात् एष तत्समीपस्थस्य सघायं चेति। पृच्छमानव
ह्नोतस्तत्समीपस्थस्येत्यर्थः। तेन लोकोक्त्यनुवादेन। मलयेति। व्राताः समूहा यातागताः विकासिनां मल्लिकाकुसुमानां परिमलस्य भ
रो यस्मिन्नाहृशो ग्रीष्मो भग्नो नष्टः। हिघनत्वं यद्युत्सहः उत्साहवान् असि नदातनिः स्नेहं नायकं घटय। अनया सह हंसयोर्युगं निवर्त्त
नेपराप्पहृतानां व्यावर्त्तनीयमेव प्रभवति स एव धनंजयोऽर्जुन इत्यन्वयः। निष्क्राया प्रोषितस्य यो गनात्तत्सखीवचनमिति संबंधः। अ
ध्यास्ते लेगा। इमां मत्सखीं गोप्रायो गोलुब्धः। इति छेकोक्त्यलंकारः। वक्रोक्तिरिति। काकुर्ध्वनेर्विकारः। अपरार्थस्य अभिप्रेतादर्थांतर
स्य नदीहरस्यागरणे विशेषः। दारुणः क्रूरेत्यभिप्रेतं। काणेनेति कल्पने। विकृतत्वं च कस्यचिद्दुर्णस्यावायोद्वापाभ्यां। भवित्रीति। सी
तां प्रति रावणोक्तिः। पादत्रयं चतुर्थं तं प्रति सीतायाः। ते तव पतिः यः पान्नरपराणं सप्रमानो त्रिनवीति वचनं विलोपाय त्रताहृशां
पुनः पदेत्यर्थः। शण्हलेष इति शण्हस्य परिवृत्त्यसहत्वादिति भावः। भिदेति। जलनिधिमथ हिमवाक्यतत्कन्ययोर्लक्ष्मीपार्वत्योः क्रमे
ण इत्यन्नीलया संलापो मिथ्याभाषणं नोऽस्मान् त्रायतामित्यन्वयः। नद्रूशोमनेतांडवं नृत्यमयचक्रवर्त्तेत इति लक्ष्मीप्रश्नः सोत्तरं वं
दावनस्थानेमध्ये इति श्रीकृष्णाभिप्रायां मृगाशिशुः महादेवेन करे धृतः परमृगवराभीतहस्तं प्रसन्नमिति ध्यानात्। इदं
लक्ष्मीवाक्यं। नैवेति पार्वत्याः। मृगः पशौ कुरंगे चेति विश्वः। किंचिदिति प्रश्नः। तरे रजीणः वृष अश्व इति हरस्य भावाभिप्राये ल
क्ष्मीवाक्यं। गोपो गवीपालकः इति कृष्णाभिप्रायमुत्तरमिति। अत्र भिक्षादिपदानां परिवृत्त्यसहत्वाद्दर्थश्लेषमूलत्वं। असमालो
च्येति अविचार्येत्यर्थः। मालया पुष्पमालया॥ इति वक्रोक्त्यलंकारः। स्वभावोक्तिरिति लक्षणनिर्देशः। जात्यादिस्तस्य जात्यादि संबं
धिनः आदिपदेन क्रियादिपरिग्रहः। उत्तरंगाणि तरंगायमाणानि। अक्षीणि येषां तैः ताविति। तौ उपक्रांतौ बधूवरौ गुरूणां स
मीपेऽन्योन्याभिमुखं प्रचलितौ परस्परस्य मार्गप्रदाने योरमसो वेगस्तेन स्खलितं अष्टं मुहुर्मुहुः कृत्वा सलज्जं यथा स्यात्तथा
पासरतो उपसमर्पणं चक्रतुरित्यर्थः। पूर्वोदाहरणे कुरंगजातिस्वभाववर्णनं। अत्र सलज्जादिक्रिया स्वभाववर्णनमिति भेदः॥
इति स्वभावोक्त्यलंकारः। भाविकमिति लक्षणनिर्देशः। अद्यापीति। सममनयनं नयनमिति। तस्या वाचे निशम्य स्तननतटात्पतित त ५२

मुत्तरं धर्मनुपुरः प्रवर्त्तने सति तदाश्चर्यायत ताञ्जीयत किंचित्स्मितमकरोत्। इदमद्यापि मम दृशोः पुरस्तिष्ठतीत्यन्वयः। अत्र नयनपदे
न स्ववाचकत्वरूपशक्त्यासंबंधेन नेत्रपदे लक्ष्यते तस्माच्च वक्त्रप्रतीतिः। किं वाक्यस्ववाचकत्वरूपसंबंधेन वक्त्रमेव लक्ष्यत इति व
चोवाणैरित्यादिवल्लक्षितलक्षणा वा बोध्या नेत्रमधिगुणे वक्त्रे इति विश्वः। इति भाविकालंकारः॥ उदात्तमिति। कद्रुसमद्रुमत्र
रितमुदात्तालंकारः। तथा श्लाघ्यं चरितमन्यस्योपलक्षणमंगं चेत्तथा सानोः शिखरैः यस्य पर्वतस्य किरीटी अर्जुनः शंभुनातक
ष्णात् अंजनेयेन हनूमता॥ इत्युदात्तालंकारः। तथा श्लाघ्यं चरितं अन्यस्योपलक्षणम्॥ अत्युक्तिरिति लक्षणनिर्देशः। अद्भुतं च
तदतथ्यं मिथ्यारूपं अकूपाराः समुद्राः। आह्वरिति। स्वमतेतत्तथ्यत्वात्तथ्यत्वाभिमानभेद इति भावः। अतएवाद्भुतत्वविशेषणस्य कृत्
दर्शयति। अनयोरित्यादि एतत्पद्यं योगेप्ययोगेऽसंबंधातिशयोक्तिरित्यत्र प्रागुदाहृतं। असदुक्तितारतम्येनेति। अनयोरि
त्यत्रासदुक्तिमात्रं। अत्यन्तमिति। यद्येत्वत्यंता सदुक्तिरिति तारतम्येनेत्यर्थः। तथा चाद्भुतेति विशेषणाद्यत्यंतातथ्यरूपत्वला
भोऽन्यातिशयोक्तावतिव्याप्तिरिति भावः। अतएवानयोरिति यद्यानंतरं दंडिनोक्तं इति संभाव्यमेवैतद्विशेषाख्यानसंस्कृ
तमिति। एवं लोकातीत इवात्यर्थमध्यारोप्य विवक्षितः। योगवर्षीस्तनातितुष्टेति विरुद्धानंतरे यथेत्युक्तमत्यंतंनिर्मितमि
त्युदाहृत इदमत्युक्तिरित्युक्तमिति चाद्भुतात्युक्त्यलंकारः। निरुक्तिरिति लक्षणं। योगवशान्नाम्नामर्थविशेषाभिधायिनामर्था
न्तरोपवर्णनमिति लक्षणं। ईदृशैर्जनसंतापनसंतानरूपैः दोषाया रात्रेः कर्त्री दोषाणामाकरस्था। पुरेति। कनिष्ठकांगुलि
विशेषः। अधिष्ठितः कालिदासो यस्याः सा अंगुलिविशेषरूपा। अर्थवती न विषयेक विनामयस्यासत्यन्वर्थनामवती॥ इति
निरुक्त्यलंकारः। कितवो द्यूतकृत्तमः। धूर्तोऽक्षदेवी कितव इत्यमरः। ननु प्रसिद्धानुवादस्य चमत्कारित्वात्कथमलंकारत्व
मत आह। निर्णीत इति॥ शाकुनैः पाशकैर्दीव्यति शाकुनिकः। आविष्कृतमिति। ध्वनित्वशंकानिवारणे स एव मार्गोऽपि॥ इति प्र
तिषेधालंकारः। पंचमस्य स्वरविशेषस्योदंचनमाविष्करणं यत्र तादृशे कालेऽकोकिलो मधुरस्वनिरभवदित्यर्थः। द्वि
य तीकोकिलपदस्यानुपयुक्तार्थत्वेनार्थान्तरसंक्रमितत्वात्। सकलजनहृद्यत्वप्रतीतिश्च प्रयोजनं। एवं च शालितये
त्यनंतरं लक्षितयेति विशेषो बोध्यः। पूर्ववत् ध्वनित्वाशंकानिवारणं यतश्चेत्याद्युक्तं। हसतेति। अद्भुतयस्याजनिबाध
मिवशादपूर्णे युधिष्ठिजबालके मृते तद्धेत्वादितत्रालस्य स्वहस्तप्रतीयमुक्तिः। जीवातवे जीवनाय भूः इत्येवं तपश्चरणान्क
निरिव मुनिः। तस्मिन् कृपाणं खड्गं विसर्जनिः क्षिप। यतो रामस्याकरुणस्य गात्रं शरीरमस्ति निर्भरमतिशयेन गर्भखि
न्नायाः सीतायाः प्रवासनं निर्वासनं तत्र पटोर्दक्षस्य तथा। अत्र रामपदमकरुणस्वरूपार्थान्तरसंक्रमितं। तादृशातिश
यो व्यंग्यः स चात्यंतमित्यनेनोक्तः। ध्वनिभास्यतानि ध्वनित्वप्रयोजकानि॥ व्यवस्थितत्वादिति॥ शब्दार्थशक्त्यादिरूपाविव्यंग्यार्थ

कु॰व॰ टी॰ ४३ 43

कविनापुमः। यत्राविष्क्रियते स्वोक्त्या सान्यैवालंकृतिर्ध्वनेरिति ध्वनिकारवचनेन निर्णीतत्वादित्यर्थः। उक्ताविति। निषेधाभास
मात्क्षेपं वुधाः केचन मन्वते। आक्षेपोन्यो विधौ व्यक्ते निषेधे च तिरोहिते इत्येताभ्यां नाहं दूती मच्छ गच्छसि चेत्युदाहरणयोः प्रतिपा
दितावित्यर्थः। प्रसिद्धत्वाद्बाधितप्रतिद्वंद्वित्वं॥ इति विध्यलंकारः॥ हेताविति। हेतुमता कार्येण मानच्छेदः कार्यं। एष इति। विद्रुम
च्छायः प्रवालकांतिः विगततरुच्छायस्य। मरुर्निर्जलदेशः। मानेति। मानेनेच्छति मनिच्छति सति एवमुपशमे वारयति सति
क्रियालज्जया हन्त भूमिमालिखंत्यां मय्यमुक्तखेखनस्य तदनुभावत्वात्। स्वातंत्र्ये च परिवृत्य पराङ्मुखीभूय गच्छति सति धै
र्यैकरोधाधूय ममनात्र मतमिति सूचनाय हस्तधूननं कृत्वा गते सति हे तत्क्षणं त्वामनुसरतामुना जनेनैतावत्फलं प्राप्तं।
यत्पादेनापि यो न स्पृष्टः स एव स्त्रीयोचरणौ स्पृष्टुं न सम्यक् मन्यते। अनुजानातीत्यन्वयः। अत्र तथारूपे हेतुतत्कार्ययोः स्पष्ट
मभिधानं। भेदांतरमाह। हेतुमतेरिति। केचित् भट्टोद्भटप्रभृतयः। तदुक्तं। हेतुमता सह हेतो रभिधानमभेदतो हेतुरिति। ल
क्ष्मीति॥ कार्याकयाक्ताः विदुषां लक्ष्मीविलासा इत्यन्वयः। अत्र विलासहेतोर्विलासाभिन्नत्वेनाभिधानं। एवं त्रिविधेलक्षणायाः प्र
योजनमाह। अत्र चेति। कार्यावश्यंभावक्षत्तच्छैघ्र्ये चेति विग्रहः। आदिना ऽपथ्याशने रोग इत्यादौ कार्यगतोपादेयत्वानुपादेयत्वा
दिसंग्रहः॥ आयुरिति॥ वीरः कलिंगेश्वरः कलिंगदेशाधिपो विजयते इत्यन्वयः। कीदृशः दानरूपस्य महोत्सवस्यायुरिति कार्या
भिन्नत्वेनाभिधानं। एवमग्रेपि। विशेषेण नतानां शोणीभृतां राज्ञां कलिताकृत्तिः धृताकारः वीरप्रियः वीरलक्ष्म्याः निकेतनं स्था
नं॥ ॥इत्यलंकारचंद्रिकायां हेत्वलंकारप्रकरणं संपूर्णम्॥ ॥भावस्येति। निर्वेदादयो व्यभिचारिणः। प्रमत्तप्रमुखाः प्रमाणा
घाः ते च प्रत्यक्षानुमानोपमानशाब्दार्थापत्त्युपलब्धिसंभवेतिह्याख्याः। विभावेत्यादि। इत्यादेरालंबनोद्दीपनरूपाणि। नायिकाचं
द्रोदयादीनि कारणानि काव्ये वर्ण्यमानानि विभावयंतीति व्युत्पत्त्या विभावपदेनाभिधीयंते। कार्याणि कटाक्षरोमांचादीनि कार
णानि काव्ये वर्ण्यमानानि विभावयंतीति व्युत्पत्त्या। न एषामेव कार्याणां इत्यादिनोत्पादने कर्तृत्वे सहकारिभूतामुत्कंठादीनि च
व्यभिचारपदेन विशेषादभितः समंततः तेस्थायिनं चारयंतीति व्युत्पत्तेः। एवं रतिरास्वादनानुरागादिपर्यायवोध्यांतःकरण
वृत्तिः। विकृतविदूषकादिचेष्टादर्शनजन्याचित्तस्य विकासरूपावृत्तिर्हासः। इष्टनाशानिष्टलाभादिजन्याचित्तवृत्तिः शोकः। प्रसि
द्धः। आदिपदेन क्रोधोत्साहभयजुगुप्साविस्मयनिर्वेदाख्यानां वक्ष्यमाणानां परिग्रहः। विशेषपदेन च रत्यादेः स्थायित्वप्रयोजकं परि
पुष्टत्वं कांताविषयत्वमितराऽनंगत्वं च विवक्षितं। तदुक्तं। रत्यादिश्चेन्निरंगः स्याद्देवादिविषयोऽथवा। अन्यांगभावभाग्वा स्यान्न तदा स्था
यिनशब्दभागिति॥ स्थायिन एव चाभिव्यक्तस्य रसत्वं। यदाहुः। कारणान्यथ कार्याणि सहकारीणि यानि च। रत्यादेः स्थायिनो लोके
तानि चेन्नाट्यकाव्ययोः। विभावा अनुभावास्तत्कथ्यंते व्यभिचारिणः। व्यक्तः स तैर्विभावाद्यैः स्थायीभावो रसः स्मृतः इति। अभिव्यक्ता
नां च रत्यादीनां रसरूपाणां क्रमात् शृंगारहास्यकरुणरौद्रवीरभयानकबीभत्साद्भुतशांतरूपविशेषसंज्ञा वोध्याः। निर्वे

दादिरिति। निर्वेदग्लानिशंकाख्यास्तथासूयामदश्रमाः। आलस्यं चैव दैन्यं च चिंतामोहः स्मृतिर्धृतिः। व्रीडा चपलता हर्ष आवेगो ज
डता तथा। गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च। सुप्तं विबोधो ऽमर्षश्चाप्यवहित्थमथोग्रता। मतिर्व्याधिस्तथोन्मादस्तथा म
रणमेव च। त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः। त्रयस्त्रिंशदमी भावाः समाख्यातास्तु नामतः इति भरतेनोक्ताः। लज्जादिना
विकारगोपनमवहित्थाख्यो भावः। देवतेत्याद्यपरिपुष्टत्वादेरुपलक्षणं रतिश्चापुष्टः हासादेः। अनौचित्येनेति। एतच्चोदाहरणे
दर्शयिष्यामः॥ मुनिरिति। कुंभसंभवो ऽगस्त्यः। एकचुलकेन समुद्रे पीयमाने तदंतर्गतयोरवताररूपयोर्मत्स्यकूर्मयोर्दर्शने
न गम्यो ऽद्भुतरसो मुनिप्रभावातिप्रायपर्यवसन्नत्वात्पोषकत्वात्तदंगमिति भावः॥ अयमिति। भूरिश्रवसश्छिन्नं हस्तमालोक्य
तद्वधूनामुक्तिः स पूर्वानुभूतो ऽयं करः। यः कांचीसमाकर्षणशीलः। नीवीवसनग्रंथिस्तस्या विस्रंसनो मोचक इति स्मर्यमाणया
शृंगारावस्थया करुणरसपरिपोषः॥ कदेति। निमिषिव दिवसा कदा नेष्यामीत्यन्वयः। कीदृशा काश्रपांगेगंगातीरवसनश्रयेरि
त्यादेरिति। कोपात्रित्यनेनान्वयः। अस्तुच्चा इति। स्फारा विस्तीर्णाः प्रस्तो ऽभिप्रसंजयामि। भुवः पृथिव्याः इमां भुवं विचित्रं तद्धारय
माणः॥ त्वत्प्रस्पर्धीति। हे वीर संत्रासतो भयाद्धने सत्वरं गच्छतीः तव प्रत्यर्थिनः शत्रवो वसुंधरेशा भूपास्तेषां तरुणीर्विलु
कितुं पाता किराता भिन्नास्तासां तरुणीनामुत्तरलैरतिचपलैः स्तनैरतितरामतिशयेन लोलैश्चचलैरपांगैर्नेत्रप्रांतैश्चात
त्तिमिताः स्तब्धाः प्रोहतरोमांचा विस्मृत उपक्रमो लुंठनरूपो यैस्तादृशाः स्तिष्ठंतीत्यन्वयः॥ अत्र शृंगाररसानुरक्तो राजवनिता
विषयत्वादनौचित्येन प्रवृत्तिरित्याभासरूपत्वं॥ त्वयीति। अजनि उत्पन्नं त्वयि युधि संग्रामे। तद्विषयेति। प्रभुविषयाद्विषज्जणस्य
या रतिस्तद्रूप इत्यर्थः। अत्र शत्रुविषयकत्वरूपानौचित्येन प्रवर्तितत्वाद्भावस्याभासत्वं॥ पश्याम इति। नायकस्य स्वमित्रं प्र
ति नायिकावृत्तोक्तिः। मयि तद्ग्रीभूते किमियं प्रतिपद्यते कुरुते तत्पश्याम इत्यभिप्रायेण मया स्थेयं मौनमालंवित्तमं
गीकृतं पश्याम इति बहुवचनेन सखीसमानाभिप्रायं। एवं तथापि खलु प्रौढो मां किमिति नालपति मा घत इति कोपश्चाश्रितः। इ
त्यन्योन्यं विलक्ष्या लज्जारहिता या दृष्टिस्तत्र चतुरे स्मस्थाजं निमित्तांतरव्याजसहितं॥ तदिति। एधमवनिनीयामिनेतृमिच्छामि
यस्तवैव रूपेण समः स मत्प्रियो नलः पत्रिणा हंसेन पादेन विनिरयादर्शि दर्शितः। एकेति॥ हे वीर क्षणमात्रेण युद्धप्रस्था
नाख्यावी यो विरहक्लेशस्तदसहिष्णुलोलाक्षी दयिता पश्यपतस्तस्याः प्रौढसंग्रामाडंबरमाकर्ण्यतश्च भवतः। एका कपोल
स्थली मंगलपालिका मंगलरूपा पालिका कुशकाशादिनिर्मिता उभयपार्श्वस्थस्तंभवृंतादिवद्धा मार्गयान्तीति प्रसिद्ध
तद्वदभूदित्यर्थः। अत्र प्रेमपदोक्ताया रतेरपरिपुष्टत्वाद्भावरूपत्वं बोध्यं। क्वाकार्यमिति॥ शुक्रस्य कन्यां देवयानीं दृष्ट्वा ताय
याते रियमुक्तिः। अकार्यं ब्राह्मणकन्यासक्तिः। क्व शशलांछनस्य चंद्रस्य कुलं सोमवंशः। अयं वितर्कः। तदयमर्दनभूयोपीत्योत्सु
क्यं एवमग्रे ऽपि श्रुतं शास्त्रप्रश्रवणमिति मतिः। अहो कोपेपीति स्मृतिः। अपगतकल्मषाः कृतेस्तु कृते धैर्यं पांते किं वदिष्यतीति

कु॰व॰ शोकास्वप्नदैन्येहेचेतःस्वास्थ्यमुपेहीतिधैर्यकःखलुधन्योयुवातरुणोधरंधास्यतिपास्यतीतिचिंताविप्रलंभोवियोगइतिपर्या
टी॰ यौ।क्रांतेति॥इंद्रियाणांवर्गःसमूहःमधुनिमद्येनिर्विवारनिर्वृत्तिंप्राप।किंभूतंमेक्रांतेप्रियमुखप्रतिबिंबमग्नकोमलाम्रप
४४ ल्लवयुक्तंगंधोस्वादुनिम्नास्वाद्यो।प्रकर्षेणनादयुतभ्रमरयुक्तो।प्रीतस्पर्धीचेति।अत्रेंद्रियतर्पणात्जन्यप्रत्यक्षालंकारः॥किमिति।
५५ आराद्दूरेइतिहंसानांसंदिग्धकश्चिद्बकसहवासिनांकमलानांपयोद्धैरदृष्टेविघोकेमीनात्प्रियकयालापेविघोकोऽनादरक्रियेत्तु
कालस्योणहीवविशेषेसुखमितिनिश्चिकायनिर्णीतवान्॥इतिप्रत्यक्षं।यथेति॥यथाप्राप्तोऽनुमानार्थाः।यथाशब्दस्तुनिर्दिष्ट
तुल्ययोगानुमानयोरितिविश्वः।तथाचचपलजलदरूपोधूमःव्योमआकाशस्यधूमवत्काशेयस्माच्चकीटमणयःखद्यो
ताःस्फुलिंगानोरूपंदधतिधारयंतीति।यस्माच्चविद्युद्भ्याभिर्ज्वालाभिरुल्लसिताःप्रकाशीभूताःपरितःपिंगवर्णाश्चककुभोदिश
स्तस्मात्पथिकरूपाणांखंडेसमूहेस्मरनलज्वालोद्दीपितोऽग्निर्लग्नइतिमन्येइत्यन्वयः।प्रयोगस्तुपथिकतरुखंडःस्मरदावानलवत्।व्यो
मव्यापिजलदधूमवत्त्वादित्यादिबोध्यः।यत्रेताइति॥लहरीवचलाचलाश्चचलादृष्टयोयासांताएताःकामिन्योयत्रजनेभ्रूलतां
व्यापरयंतिप्रेरयंतीतितत्रैवभ्रूसंज्ञाविषयएवयद्यस्मादमीमर्मस्पर्शिनोबाणाःसततंपतंतीतितत्तस्मान्मंडलीकृतचापपुंखिताया
ज्जितपुंखायेशरास्तेषुपुंखवान्चपलःकरोयस्यतादृशःक्रोधनःस्मरःशासनमाज्ञातद्धारकआसामग्रतोधावतीतिसत्यमित्यन्व
यः।अतिशयोक्तीति।मार्गणत्वेनमनोविकारणमध्यवसानादितिभावः।प्रयोगस्तुएताःचक्रीकृतचापसदापुरोधावत्कदाज्ञाकर
मदनका।मर्मभेदिबाणपातात्रयभ्रूसंज्ञास्थानकत्वादितिबोध्यः॥एवंनिलीयमानैरित्यत्रापिअयंकालःसूर्यास्तमयवान्प
क्षिनिलीयमानताद्याश्रयत्वादिति।रविरस्तगमनवान्तादृशकालसंबंधित्वादितिवाप्रयोगोज्ञेयः॥सौमित्रेइति।रामस्य
लक्ष्मणंप्रतिविरहोद्धुक्तिः॥अत्राप्ययंचंद्रःकुरंगधारित्वादितिप्रयोगः॥इत्युपमाने॥शातारकाणांन्यासःसंनिवेशः।तामि
ति॥शाकटस्याकारंसंस्थानमाश्रितस्तांरोहिणींविजानीतीतिदेशावाक्यार्थज्ञानमिहोपमाने॥इयंशकटाकारनक्षत्रपंक्तिःरो
हिणीपदवाच्येत्युपमितिंप्रकरणत्वात्।अत्रेति।अत्रेयुराजसुमध्येमन्मथमिवातिसुंदरंमहीपतिंवेंकटपतिसंज्ञंवेदरी
त्याद्यन्वयः।दानवारिंविष्णुं।शैलराजोहरंधैर्यशालिनंमदनशासकत्वात्।प्रत्यक्षरूपमिति॥साहृष्टपविशिष्टपिंडप्रत्यक्षस्या
पिफलायोगव्यवच्छिन्नत्वेनकरणत्वादितिभावः।फलेनउपमितिरूपेण।इत्युपमाने।विरहएवतेति।कुमारसंभवेवटुवे
षेहरंप्रतिपार्वत्युक्तिः।वरदोघ्वप्रकाशयतापिस्खलितांतःकरणेनत्वयाईशंमहादेवंप्रतिएकेअलक्ष्यजन्मत्वंसाधूक्तं
यतोयमीशमात्मभवोब्रह्मणोपिकारणमामनंतिवेदाःसकथंलक्ष्यःप्रभवउत्पत्तिस्थानंयस्यतादृक्कभविष्यतीत्यन्वयः।
विवहतेतिक्वचित्पाठः।वक्तुमिच्छतीतितदर्थः।बलादिति।नास्तिकोक्तिरियं।हेजनाःबलात्पापानिकुरुततानिपापा
निघोयुष्माकंअकृतान्येवभवेत्।यतोबलात्कारेणकृतासर्वान्यपापान्मनुरकृतानब्रवीदित्यन्वयः।दूषणपरेणसर्वा

भिमानतार्थदूषणपरेण आत्मनस्तुष्टिः प्रीतिः वैकल्पिके विषये गर्भाष्टमे वा द्वे ब्राह्मणस्योपनायनमित्यादौ प्रमाणमित्युक्तं
महाजनेति। दमयंतीप्रति नलोक्तिः। नाम वितर्के। नंददते नग्रह्णाति। आचारमुच्चैराचारत्यागिने विगायति निंदति। आसं
शयमिति। तत्रैणत्वक्रियेण परिगृह्य इत्यमायोग्या। यतः आर्यमेष्टं मम मनोऽस्याः शाकुंतलायां अभिलाषशीलं पदेषु विषयेषु॥
तेहीति। वरस्रक्रिको वरस्रक्ट्रे नाधत्ते नधारयति। श्रुतिर्वेदः संज्ञारूपालिंगादिकं पद्येभ्युत्थात् तीत्यादिरूपाया प्रकर्षलक्ष्मीप्र
सिद्धैः अर्थसंयोगाभावे सति लिंगमर्थप्रकाशनसामर्थ्यरूपं नाद्रियते। यथैन्द्र्या गार्हपत्यमुपतिष्ठत इति श्रुत्या गार्हपत्योप
स्थाने विनियुक्तस्य मंत्रस्येंद्रप्रकाशनरूपसामर्थ्यरूपेण लिंगेनेन्द्रोपस्थाने विनियोगो नाद्रियते इत्यर्थः। करिणीसीश्वरः का
लहस्ती स्वरः। विदितमिति। इत्थंभूतः परार्थकप्रवृत्तिकः अतद्दृत्यस्य चेणरूपप्रमाणांतरं नाशंकनीयमित्यर्थः। तेनेनान्व
यः। लोलदिति। गुरूणे सति धावपिधाभ्यां नायकाभ्यां समयोचितो विधिर्नोत्सृष्टः यथा लोलदूलतया नायिकया विप
त्तस्य सपत्न्यादृष्टिविशेष उपन्यासे तत्सकाशादागतोसीति सूचने कृते नायकेन नेति सूचनाय शिरो विधूतं चालितं। ततस्त
द्वतां तपरीक्षणेन नायिकया कृते सस्कृतनमस्कारः एवं लहूल एव स्थितः ततईषत्सम्भ्राकपोलकांतिर्यस्य ताद्दृशो नायिका
यामुखे कोपातिशयात्ज्ञाते सति तत्पादयोर्दृष्टिपातेनैवानतः प्रणत इति। किमसंभिरिति। व्याख्यातं प्राकृतत्येति। न
लमुखचंद्रविषयत्वव्याख्यातुः स्मरणेत्यर्थः। तर्चुसिद्धत्वात्कल्पितमिति भावः। इतिशास्त्रः निर्लज्जमितिमुत्सोति निर्लज्जेश
कमित्यन्वयः। मत्कमिति। माघपद्यमिदं हेलस्तर्कः। यदिवतः प्रकटे बलीयान् तदासा प्रकृता यमुना जलधिमपूरयत्
जाह्नवी नापूरयत्। अन्यथा पूर्णे सति अलं समृद्धसमृद्धजले गंगौघेन निर्भासितामस्मरदिती कृताया शंभुकंधरात
यासमानवर्णे नीलकंठस्यादिसन्वयः। इत्यर्थापत्तिः। स्फुटमिति। हेतन्वितर्कयंतस्तर्कशीलाः अपिस्त्रोकास्तदवलंब
अनुपलभमानाः अवश्यं तदवलंबं मद्ध्यमस्तदिति स्फुटमेव निश्चिन्वितैः कुलपर्वतश्रेणयुगमत्विनाध्यवसितं स्तनद्वं
द्वमाधारं विनायदास्ते तदिदं मकरध्वजस्येंद्रजालं माया चरितं प्रतीम इत्यन्वयः। इत्यनुपलब्धिः। अमृतेति। ईश्वरं प्रतिम
नस्योक्तिः। पूर्वममृतं अमृते पूर्वं ताद्दृशं मम किंवा भवने किंचित्। सर्वशी ततपादिद्वंद्वसहे। द्रियतामम सहजयेव दुःखमस्ति
किंतु हेतुनाप्यते तव शरणागतानां भक्तानां त्वदग्रे पुरा भवो नानुरूपो नोचित इत्यन्वयः। अप्यवातवनानुरूप इत्यन्वयः। अत्र
दुःखादेः संभवाख्यप्रमाणं सिद्धस्य कथनं। येनामेति। भवमृतेरुक्तिः। नामेति कुत्सने। नाम प्रकाशसंभाव्यक्रोधाय मकुत्स
न इत्यमरः। किमपीति। काकुः नकिमपीत्यर्थः। एषः काव्यनिर्माणरूपो पलः समको सिसतामानधर्मी सहशः यउ
त्सृज्यते। अस्ति वा तं प्रतियत्नः क्रियस्मान्निरवधिरयं कालः पृथ्वी च विपुलेति क्रमेण योज्यं अत्र कालो ह्ययमित्यादिना सोपप

कुव॰ त्विकं संभवमरव्यप्रमाणेनोपदर्शितं। भ्रातरिति। पथिकं प्रति ग्रामस्थस्य प्रश्नः। कुतस्त्वमेतरमागत इति शेषः। नगरादित्युत्त
टी॰ रे। वार्त्तेति पुनः पूर्वस्य प्रश्नः। बाढमित्युत्तरे। अंगीकारे अस्ति विधेयः। जहीति पूर्वस्योक्तिः। युवेति पोष्यवचनं। स त्वं जीवति पुनः पूर्वस्य
४५ प्रयत्नः जीवतीत्यादि सर्वं पोष्यवचनं इति संभवः। अनिर्दिष्टप्रवक्तृकेति। अनिर्दिष्टो विशेषतोऽनुक्तः प्रवक्ता यस्येत्यर्थः। एवं चै
तदेवेति सत्त्वलक्षणमिति दर्शितं। इत्यलंकारचंद्रिकायां प्रमाणालंकारप्रकरणम्॥ यथासंभवमिति। संसृष्टिसंकरयोर्द्वयो
45 स्तदधिकानां वेति यथासंभवमित्यर्थः। स्फुटेति॥ स्फुटमवगम्यमानो भेदो येषामिति विग्रहः। एकस्मिन्वाचकेऽनुपूर्वे
शेषावस्थितिः। एतत्सर्वमुदाहरणे व्यक्तीभविष्यति। कुसुमेति। माघे ऋतुवर्णने पद्यमिदं। अन्वया कयापि वनितया चलि
तया कलस्वरा मेखलायाः कांच्याः कलकलो विदधे। किंभूतया कुसुमसौरभलोभेन परिभ्रमतां भ्रमराणां संभ्रमेण स्वरा
विशेषेण संभृता समरूपो भायस्यास्तथा अमलकालोलायस्यास्तादृशा हृदयस्यास्तथाभूतयेति। आनंदेति। आनंदेन मेदुरं
यथा भवति तथा पुरंदरेणेंद्रेण मुक्तमर्पितं माल्यं यत्र तादृशं महिषासुरस्य मौलौ मस्तके हठेन हितं। मंजु मनोज्ञं मंजीरस्य नूपु
रस्य शिंजितं रणितं यत्र तादृशं मनोरमं भविकायाः पादांबुजं अंबुजसदृशं चरणं नोऽस्माकं विजयाय भवत्वित्यन्वयः। अत्र पा
दांबुजमित्युपमितसमास एव। न तु मयूरव्यंसकादिवत्पाद एवांबुजमिति। तथा सत्यंबुजप्राधान्ये मंजीरसिंजितान्वयायोगा
दित्युपमैव न रूपकमिति विज्ञेयं॥ इति संसृष्टिः॥ तत्त्वे स्थितिः॥ तदामारुतकं पित्तशरीरं [illegible] इवेति। गुणानां चेति। तार्तीया
धिकरणसूत्रे। अस्यार्थः। गुणानां गुणभूतपदार्थानां परार्थत्वात् मुख्यप्रधानार्थत्वात् परस्परमसंबंधः। कुतः समत्वात्। अप्र
प्रधानत्वसाम्यात्। यथा भाष्यकारमते पवमानेष्टीनामाधानस्य चाहवनीयाद्यर्थत्वात् परस्परं नांगांगिभावसंबंधः। यथा
वार्त्तिककारमतेऽग्निसमिंधनार्थानां मंत्रविशेषरूपाणां निविदां सामिधेनीनां चेति संक्षेपः। तदधिकरणपूर्वपक्षसिद्धांतौ प०
प्रकृतानुपयोगान्न दर्शितौ। स्वरूपनाशरूपोपचरितेयदाकृतिलवनमित्यर्थः। नन्वेवमर्पितमोशस्य विशेषणस्या
नन्वयात्कथं रूपकसिद्धिरित्याशंक्याह। स्वरूपेति। क्रोडीकारेण निगिरणेन लवनमित्यर्थः। लक्षणमूलेति। साध्यवसा
नालक्षणमूलेत्यर्थः। तथा च तमोंशे उपचारेणान्वयोपपत्तिः। तदपेक्षया प्रधाने तमोंशे तदंगीकारेण रूपकस्यैवोचितत्वा
दिति। न छायानामिति सिद्ध्येदित्यनुवर्त्तते। उत्प्रेक्षा न सिद्ध्येदित्यन्वयः। इवशब्दस्य सादृश्ये प्रसिद्धतरत्वेनासति तात्पर्यग्राहके सं
भावनाबोधकत्वासंभवादिति भावः। रूपकं विनाप्युत्प्रेक्षायां तात्पर्यग्राहकमस्तीति शंकिते। नन्विति। एवमुक्तौ तमोगजाना
मित्युक्तौ। तथा च साधकोतरस्य साधकोतराद्दूषकत्वाद्रूपकस्योत्प्रेक्षांगत्वमविकल्पमिति भावः। अन्वेति। सविता सूर्य
स्य तुरगावली अश्वपंक्तिर्वीक्ष्यमानवत्। केव नभःश्रियो गगनलक्ष्म्याः मरकतमणीनामेकलता एकावली वेत्युत्प्रेक्षा। स
यितुरगाणां हरितवर्णत्वात्। कथंभूताः सम्यग्गतिलंघितास्तुंगा उच्चाः पयोधरा मेघाः पयाएकावली पयोधरौ स्तनौ। त
यास्फुरतो दीप्यमानमध्यगतः। अरुणरूपो नायको नेता सा रश्मिरस्याः पक्षेऽरुणः आरक्तः नायको हारमध्यमणिः। नायको

इति भावः; नचैवं स[illegible]त्प्रेक्षांगीकारेपि किं बाधकमिति वाच्यम्
तदंगीकारे प्रधानान्वये उपचारात् [illegible]

ने तरि तोल्लीमिसा विभ्रं हेहार मधमस्त्रणव पीति विस्व:। अतिशयो क्षामेघानां स्तनत्वेनाध्यवसान रूपा यांगमैर्वें स्तनेमति
लतं तुलनापायेन स्फुरावगम्यमानमेदाया: संस्रहेसकापत्तावेलक्षणं दर्शितं। एवमग्रेपि। एकस्यां मत्यांति। उननेऽपराधे
सत्वादंगांगि भावमाशंकाह। परस्परेति। अंगुलीभिरिति। शशी अंगुलीभिरिव मरीचिभि: केशसंचयमिव तिम
रसंतिरसकुमलीकृतं सरोजलोचनं लोचनमिव सरोजं यत्र तादृशं रजनीमुखं चुंवतीवेत्यन्वय:। तत्राहेति। उप
मा वकुले संदर्भपाठादित्यर्थ:। मुख्यमिति। मुख्यमार्थ्यरूपं यत्कुड्मलीकरणरूपं निजं वृत्ता साधारणधर्मस्तस्यानुकूल्यादित्य
र्थ:। उत्पापकत्वाविशेषात्। अंगत्वाविशेषात्। चेद्रचुंवनोत्प्रेक्षायोदोपत्यव्यवहारसमासोक्तोवाऽपेक्षितस्य नायकस्य
धर्मस्योक्तोपमान्यामसमर्पणात्कथं तयोस्तदंगत्वमिति शंकते। यद्यपीति। मरीचिभिरिवांगुलीभिस्तिमिरं केशसंच मिव
यमिवेत्येवं रूपमित्यर्थ:। एकैकविषयस्यापीदृ यस्मामेदाध्यवसानेनेत्यन्वय:। तयो: वाक्यसमासोक्त्यो यमयो:। अप्रावश्य
कमेदाध्यवसायेनोपपन्नो कृतमन्वयांतरसमासांतरकल्पनागौरवेणेत्याशयेनाहोद्वेति। तनुदीर्घत्यादेः पूर्वनिपात
नियमानुरोधेन यथासंख्यक्रमपरित्याग:। तथा चांगुलमरीच्यो स्तनुनीरंध्रत्वांभसांतिमिर केशसंचयोश्यावणरूपत्व
नीलत्वाभ्यां सरोजलोचनयोर्दीर्घत्वकांतिमत्त्वाभ्यां च सादृश्यं वोध्यं प्रातिस्विकरूपेण अंगुलित्वमरीचित्वादिनात्व
नुगतेति। अनुगतं यत्सादृश्यप्रयोजकं रूपं तनुत्वादिकं तेनेत्यर्थ:। एतच्च सादृश्यमतिरिक्तमित्यभिप्रायेण सि
द्धांतादिति। तदुक्तं। साधर्म्यं त्रिविधं। भेदप्रधानमभेदप्रधानं चेत्युपक्रम्य विधानापेन। उपमानन्वयोपमेयोयस्स
रणनो भेदाभेदसाधारणसाधर्म्यमूलत्वमिति। ननु भेदाभेदरूपांशद्वयोपेताया उपमाया भेदांशस्यानुपयोगात्। कथं
तस्या उत्प्रेक्षायुपयोगित्वमित्याशंकापरिहरति। नहीति। प्रकाशेति। शशीतापनयने चेति द्वंद्व:। शीतालु:। शीतोत्कटप्रेम्यस्त
दहनइति चालु:। उक्तसिद्धांतस्य नियुक्तकत्वेनाभ्युदयत्वमाशंकामपरिहरति एवमिति। पांडुरायमितेति। पांडुनामायं नृप:। अद्रिरा
जइवाभाति। कथंभूत: अंससयोरर्पितो लंवोहारो येन स:। तथा हरिचेदनेनरक्तचेदनेनरूषित:। अगराजो अनुलेपनं ये नं अ
द्रिराज: कीदृक् वालातपेन रक्ता नितांतानूनिपूर्ण्या नियस्य स:। तथा निर्झरस्योद्भाहरेण दुर्मेनेन सहित:। पिनद्धेति व्याख्याता पो
वीपयोधिरेलेति। तथा च चमत्कारप्रयोजकपौर्वापर्यघटकत्वेन भेदानवभासासंसंरष्टिवेलक्षण्यमिति भाव:। दर्शादिवत्॥
दर्शपूर्णमासादिवत्। अयं च भिन्नकालीनयोरपि समप्राधान्यं दृष्टांत:। फलं तत्र स्वर्ग: प्रकृते च मत्कृति विशेष:। राशिनमि
ति। अत्र अजस्येंदुमत्याश्च यंवरे समगुणयोरजेंदुमत्योर्योगेन प्रीतिर्यथा तेपोरा नगरिकाः नृपाणामन्येषां वा प्रवणयो: कटु
पीडाकरं इति पूर्वार्द्धरूपं एकमेव वाक्यं विवियुउच्चारयासरित्यन्वय:। तेन सर्वनाम्ना इंदुमती विंवभूतो धर्म:। अजकार्य

कु॰व॰ टी॰ ४६ 47 कैवरणं। तत्रतस्मिन्पद्ये। विलीयेति॥ ग्रुतिसंयोगमहता दिवसेनापि हेमाविलीनतांप्राप्येत्यर्थः। विकचंविकसितं जडभा
वःशैत्यंमदनएवशिखीवह्निः सरंभसत्वात्यर्थः। सिक्तमिति। स्फुटमेकत्रविषयेशशधरोप्यलंकृतिद्वयमितिसूत्रेणेत्यर्थः। स्पष्ट
ति। अथोनंतरंदिवसरूपमरविंदंसंकोचमगमत्। कीदृक्स्पष्टमुक्तसंततः किरणएवकेसराणियस्यास्तथाभूता सूर्यवि
वरूपा विस्तीर्णकर्णिकावराटोयस्यतत्। [illegible]ष्टप्रकाशाभावेनपरस्परंमिलिताअष्टदिशाएवदलानांकलापस्तस्मिन्स्वरूपे
नावतारोयस्याःतादृशीवद्धा। अंधकाररूपामधुपावलिर्येनतथाभूतमित्यर्थः। पदभेदेनेति। सोपणिपत्यगामेजोपअम
हंतलाभूणंतरुणएणदृशि अस्मल्लिङ्गिपरिसकेतिएवारेइलयोसंस्तुः। वाच्यप्रतियोगिप्रतिसंबंधियस्यतद्वाच्यप्रतियोगि
कंतत्वादित्यर्थः। एवंचकाव्यावाच्यस्यानुप्रसादेः शब्दालंकारस्यतदनुप्रवेशोनवाचकानुप्रवेशाइतिवक्तुमितिभावः।
सत्पुष्करेति। यस्यांनगर्यांएणीदृशाउद्यानेसंबंधिवापीपयसीवनाघूर्जहेरमंतेक्रीडंति। कीदृशेसमीचीनेः पुष्करैकम
लैःद्योतितायेतरंगास्तच्छोभावतिजलदपद्येसमीचीनेःपुष्करैर्वाद्यभांडैर्द्योतितौरंगोनृत्यभूमिस्तच्छोभिनीत्यर्थः। पुष्करं
करिहस्ताग्रेवाद्यभांडमुखेजले। व्योम्निखड्गफलेयामद्वंसमरः। अवभितिकेति॥ अवभिलित्रिदिवमितिभूतलंयस्यास्त्यर्थः।
रागवतीति। राजोनुरागोरक्तिमाच। अंबरमाकाशंवस्त्रंवा। नचात्रविशेषणसाम्यायाभेदाध्यवसायापेक्षणेपिद्युक्षरे
त्वादेशब्दसाम्यमात्रेणाप्युपमोपपत्तेर्नतदपेक्षेत्यतआह। शब्देति॥ शब्दतोऽर्थितोवेति। शब्दप्रयुक्तमर्थप्रयोक्तंवायत्व
विसंमतंसाम्यंतत्प्रतिपादनमित्यर्थः। सर्वविधेसर्वप्रकारे। यद्येति। यदिआह्लादनप्रतिपात्वनुसाराच्चंद्रपदमन्व
र्थाः अन्वर्थोऽन्वर्थानामस्मत्। मतद्वयस्याप्ययुक्तत्वात्। विधुरिति। सहंसः तेनेमीवनेनदमयंत्यादुद्यानेनहृतचित्तो त्र
व्यरचिक्रतः। कथंभूतेनचंद्रकिरणप्रेषाद्यारंगीकृतैर्निष्पंदैः पूर्णैः चंद्रकांतघटितैस्तरुणमालावालैर्विपक्त्वी
कृतजलसेकप्रकाररूपजोरवेणेत्यर्थः। प्राप्तएवस्यति। शब्दप्रयुक्तस्येत्यर्थः। तयाचसमप्राधान्यमर्थभेदविषयमि
तिभावः। प्रतिक्षिप्यतिवार्यतेतिवार्यतेकोंतरमितिप्रतिक्षेपोविरोधः॥ मुक्ताइति। विदुषांभवनेषुकेलोसरतक्री
डायांविछिन्नस्तत्राहाराद्गलिताः संमार्जनीभिरपसारिताः प्रातःकालेगणएपूर्तिमेदंचपलतोबालानांचरणलता
रसेनारुणामुक्ताः दूरादाडिमीवीजशंकितधियः। क्रीडाशुकायत्तकर्षतिआकर्षतितद्धोजनत्यतेस्यागसपदान
स्यलीलायितमित्यन्वयः॥ तत्रैव। बालाधिपूनाशारुणइत्यत्रैव। वृक्षमालेति। शंकितधियइतिवक्ष्यमाणइत्यर्थः॥
तयोतन्मूलःसंकरमूलः। ताभ्यांसंकरभ्यां[illegible]मज्ञातयोःसंकरभ्रांतिमंतोःतस्यउदाहरणस्य। हेतुमतः। कार्यस्यभ्रमेद
कथनं। तस्मागतलीलायितस्यकार्यमितिवक्तव्येतदेवत्यागत्वीत्यलयतमित्यभेदकथनं। तदीयेतिराजकीयेत्य

कुव॰ र्थः॥ अत्र तयोरुदार्येति। अत्र सत्योदार्ययोरित्यर्थः। तन्मूलकस्येति। विस्तरेणोत्कर्षपर्यवसायिहेत्वलंकारमूलकस्येत्यर्थः। ननु
राजसंपत्समृद्धेर्व्यंजनागम्यत्वेनावाच्यत्वात्कथं तद्वर्णनात्मकोदात्तालंकारेण सहैकवाचकानुप्रवेशकथनमित्याशंक
टी॰ यामाह। वाचकशब्दस्येति। त्रयाणामिति॥ एकत्रोदात्तातिशयोक्त्योः परो हेतुर्हेतुरन्यो व्यंग्योदात्तप्रस्तुतप्रशंसाप्रस्तुतां
४७ कुरान्यतरयोरित्येवं त्रयाणां परस्परमित्यर्थः। उदात्तालंकारस्य हेत्वलंकारांगतायाः पूर्वमुक्तत्वादुदात्तातिशयोक्ति
47 संकरस्यापि तदंगत्वमित्यतिशयोक्तेर्निरस्यति। उदात्तादिमात्रस्यैवेति। उदात्तादीत्यादिपदेन हेत्वलंकारपरिग्रहः। तत्रापि निर
तिशयोक्तेरपि विस्तरेणोत्कर्षपर्यवसायिनो हेत्वलंकारस्यैव तादृशविस्तरणरूपकार्यपरिष्कारद्वारा तद्रूपप्रस्तुतराज
संपदुत्कर्षपुष्टांसारूपायामप्रस्तुतप्रशंसायामंगत्वेन त्वद्भुतातथ्यवर्णनारूपात्युक्तिसंकरस्याप्यपेक्षेतिभावः। यथा
योगमिति। तथाहि। उदात्तहेत्वोरंगांगिभावसंकरस्य मतिमदुदात्तयोरंगांगिभावसंकरस्योदात्तांगकहेत्वलं
कारादिसंदेहसंकरस्य चांगांगिभावेन संकर इति सूक्ष्ममतिरूह्यम्। स्वकीर्त्तिमनुवर्त्तयन् ग्रंथनाम स्वनाम चोपनिबध्नन् ग्रं
थपूर्त्तिमनुवदति। अमुमिति। स्वग्रंथस्य प्रामाणिकत्वं सूचयितुमाह। चंद्रालोक इति। शारदागमसंज्ञकश्चंद्रालोक
मूलमतो ग्रंथः। शारदागमेनेन चंद्रस्यालोक इति शिवः। तस्मात्कुवलयानंदस्य ग्रंथोऽमृतः। कुवलयस्य कु
च मुदस्यानंद इति श्लेष इति शिवमस्तु॥ विद्वद्वृंदमहामान्यरामचंद्रात्मजन्मना। विदुषा वैद्यनाथेन कृतालंका
रचंद्रिका॥ एना कुवलयानंदप्रकाशनविशारदा। विदां कुर्वंतु विद्वांसः काव्यतत्वविदो वराः॥ असौ कुवलया
नंदश्चंद्रालोकात्स्थितोपि सन्। प्रतिष्ठोत्तमतेनैव विनालंकारचंद्रिकाम्॥ ॥इति श्रीमत्पदवाक्यप्रमाणज्ञ
तत्सद्रामचंद्रात्मजवैद्यनाथकृतालंकारचंद्रिकाख्या कुवलयानंदव्याख्या संपूर्णम्॥ ॥शुभमस्तु॥ संवत् १८
३८॥ भाद्रपदशुक्लैकादश्यां बुधवासरे लिखितं स्वव्ययनेन नानकोनोपठनार्थं श्रीसरस्वत्याः प्रसादात्
शुभमस्तु॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

47